संख्या ८०
३ " १६०
ग्रंथ - दे.ना.
कागज - देशी
पंक्तिमें अक्षरसंख्या - ६६
पृष्ठमें पंक्तिसंख्या ३०
सं० १८८७

प्रथम स्कंधः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रीमते रामानुजाय नमः तृतीये स्वायंभुवस्य च मनोर्वंशः परमसंमत इत्यादिना तद्वंशकथनं प्रक्रम्य तावत्तत्र तदुहितुर्देवहूत्या वंशः कथितः चतुर्थे त्वाकूतिदे
वहूत्योस्तदुहित्रोर्देवहूतिदुहितॄणां वंशमभिधायाथ स्वायंभुववंशमुपक्रम्य तावदुत्तानपादसंततिं सावशेषामभिधाय याथांत्यगर्भिणीन्यायेन प्रसंगात्प्रिय
व्रतस्य वंशः पंचमे कथितः षष्ठे तु पुनः प्रसक्तानुप्रसक्तकथनानंतरमुत्तानपाद एव वंशो वशिष्टः कथितः सप्तमे तु तदनु प्रसक्तमुक्तं तदेवं स्वायंभुवमनुवंशकथ
नव्याजेन बहु भगवतो जन्मकर्मगुणादिरूपवर्णितेषु नन्तानेव शुश्रूषुस्तुल्यन्यायादन्येष्वपि मन्वंतरेषु कथ्यमानेषु हरेर्जन्मादिकथनमर्थात्प्रसक्तमे
व भविष्यतीत्यालोच्य प्राधान्येनान्यान्मनून्तदंतरं श्रोतुं पृच्छति राजा स्वायंभुवस्येति त्रिभिः तत्रानूमनुवदति यत्रेति त्रयेण हे गुरो गुरोरिति पाठे गुरोः स्वतः
इह वंशेऽयं स्वायंभुवस्य मनोर्वंशो विस्तराच्छ्रुतः वंशं विशिनष्टि यत्र वंशे विश्वसृजां मरीच्यादीनां मनुकन्यापुत्रपौत्रादिरूपः सर्गः अथ नो स्मभ्यम

राजोवाच स्वायंभुवस्येह गुरो वंशोऽयं विस्तराच्छ्रुतः यत्र विश्वसृजां सर्गो मनूनन्यान्वदस्व नः १ तत्र धर्मो हि विविधश्चातुर्वर्ण्यं
श्रवतां शुभान् यत्र यत्र हरेर्जन्म कर्माणि च महीयसः गृणंति कवयो ब्रह्मंस्तानि नो वद विस्तरात् २ यद्यस्मिन्नंतरे ब्रह्मन्भगवान्
विश्वभावनः कृतवान्कुरुते कर्ता ह्यतीतेऽनागतेऽद्य वा ३ ऋषिरुवाच मनवोऽस्मिन्व्यतीताः षट् कल्पे स्वायंभुवादयः आद्यस्ते कथितो य
त्र देवादीनां च संभवः ४ आकूत्यां देवहूत्यां च दुहित्रोस्तस्य वै मनोः धर्मज्ञानोपदेशार्थं भगवान्पुत्रतां गतः ५ कृतं पुरा भगवतः कपिल
स्यानुवर्णितम् उत्पत्तिः सर्वभूतानां वर्णितास्मरतर्षभ आख्यास्ये भगवान्यज्ञो यच्चकार कुरूद्वह ७

मान्मनून्स्वचरित्रान्कथयेत्यर्थः १ यत्र यत्र मन्वंतरे मनोरंतरभवस्यानदशातस्मिन्न २ विश्वभावनः विश्वपालको भगवान् कृतवान् य
स्मिन्नतीते यद्यत्कृतवान्कर्ता करिष्यति यस्मिन्नद्य वर्तमाने यत्करोति तद्वदेत्यन्वयः ३ एवमापृष्टो मुनिराह मनव इति अस्मिन्कल्पे स्वायंभुवादयः ष
ण्मनवो व्यतीताः तत्राद्यः स्वायंभुवो मनुस्तुभ्यं कथितः सचरित्रः यत्र देवादीनां संभवश्च कथितः ४ तस्य स्वायंभुवस्य मनोर्दुहित्रोराकूत्यां देवहूत्यां च भगवान्मे है
श्वरः सर्वेश्वरो धर्मज्ञानोपदेशार्थं पुत्रत्वं प्राप ५ तत्र भगवतः कपिलस्य चरितं वंशक्रमेऽशतिशेषः अनुवर्णितं चरित्रं त्वया हे भरतर्षभ श्रुतमेवमधुना यज्ञाख्यो भगवान्
यच्चकार तच्चेष्टितं हे कुरूद्वह आख्यास्ये कथयिष्यामि यद्यपि मन्वंतरांतरकथनमेव प्रतिज्ञातव्यं तेषामेव प्राधान्येन पृष्टत्वात् तथापि भावज्ञो मुनिः
भगवद्गुणकर्मजन्मादिशुश्रूषयैवापृच्छमित्यालोच्याद्यमन्वंतरस्थस्य यज्ञाख्यस्य भगवतश्चरित्रस्याकथितत्वात्तदेव कथयितुं प्रतिजानीते प्र
थमं तत्कथने मन्वंतरकथनमपि प्रसक्तं भविष्यतीति मुनेरभिप्रायः ७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नृपर्यालोचयतीत्यर्थः ५

तत्र

भा.श्र.टी. येन चेतयत इति श्लोकस्य स्थाने क्वचित् पुस्तके वासुदेवो वसत्येष सर्वदेहेष्वनन्यदृक् येनायं नयते विश्वं विश्ववीर्य्ये यतस्ततः पर
२ तिश्लोकः पठ्यते तत्रायमर्थः अनन्यदृगन्यानपेक्ष युगपत्सर्वसाक्षात्कर्त्ता सर्वेषु चिदचिदात्मकेषु वसति यतस्ततः एव वासुदे
वः वासुदेवशब्दप्रवृत्तिनिमित्ता तत्रानन्यदृगित्यनेन देवशब्दार्थ उक्तः अन्यानपेक्षस्वतेजसा दीप्यमानत्वं देवशब्दार्थः
वसत्येष सर्वदेव शरणव्युत्पत्तेरप्युपलक्षणं वसतीति वासुः वसत्यस्मिन्निति वासुरिति द्विधा व्युत्पत्त्या योनन्यदर्शनेना
यं वासुदेवो विश्वं नयति पर्य्यालोचयति विश्वस्य पर्य्यालोचयति विश्वस्य सृष्टिस्थित्यादौ यतः अनन्यदर्शने ततः तत्तः विश्वपर्य्यालोचनात्मकत्वमा देवता५
नर्द पन्नमन्यदर्शनं विश्ववीर्य्ये कृतं यतः इत्यनेनान्तः प्रविश्य नियन्तृत्वरूपं सूचितं तदेव भजयन् रूपेण द्योतयति आत्मेति ईशा

आत्मावास्यमिदं विश्वं यत्किंचिज्जगत्यां जगत् तेन त्यक्तेन भुंजीथा मा गृधः कस्यचिद्धनम् ११
यं न पश्यति पश्यंतं चक्षुर्यस्य न रिष्यति तं भूतनिलयं देवं सुपर्णमुपधावत १२ राम

शब्दस्थाने आत्मशब्दपाठः आत्मना परमात्मना अंतः प्रविश्य नियमनपूर्वकं भर्त्रा आवास्यं स्थितेषु सात्मके स्वतंत्रेव वस्तु निन
भुंजीथाः नानुभवेः अत्र हात्मत्वविवक्षया त्यक्त इति सप्तमी प्रयुक्ता मा गृधः तच्छेषभूतं सर्वं तदेव शेषत्वमेकाकादर्शयति
कस्यचिद्धनमिति कृत्स्नमात्मा जगतीति सर्वसाक्षात्कर्तृत्वसूचितं तदेव भजयन् तमेव भजनीयं भजनहेतुः यस्य चक्षुर्ज्ञानं न रिष्यति
न क्षयमेष्यति जीवस्येव न संकोचं यास्यतीत्यर्थः अत एव नित्यमसंकुचितपरिच्छिन्नज्ञानेन युगपत्सर्वं पश्यंतं साक्षात्कुर्वंतं यं न पश्यति क
र्मणा संकुचितज्ञानो लोको न साक्षात्करोति तं सर्वज्ञमिष्टप्रापणानिष्टनिवर्त्तनक्षमं देवं स्वतेजसा दीप्यमानं भूतानां निलय
माश्रयं धारणमिति यावत् सुपर्णं द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजात इति सुपर्णत्वेन रूपितम्
अनेन जीवं विनाभावेन तदंतरात्मतया तद्धितकारितयाऽवस्थितमिति लभ्यते उपधावत भजत इति १२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तत्र मन्वन्तरस्य भगवतः चरितं विवक्षुस्तदुपोद्घातेन स्वायंभुवस्य मनोर्वृत्तान्तमाह विरक्त इत्यादिना यद्यपि स्वपितृतो धेत नाम त्वं तस्यावतार रूप एव तथापि तस्य जगत्पालनानधिकृतत्वात् केवलं ज्ञानयोगप्रवर्त्तनाधिकृतत्वात् चरितं तस्य कथितं तत्र ... च ... तस्यावतारस्य इत्युक्तं शान्तरूपायाः पतिः भर्ता विभुः स्वायंभुवो मनुः कामं तदिति कामाः शब्दादयो विषयास्तेषां भोगेषु विरक्तः राज्यं विसृज्य तपसे तपश्चर्तुं वनं सभार्यो विवेश ८ सुनन्दायां सुनन्दानदीतीरे पदैकेन भुवं स्पृशन् वर्षशतं घोरं दुश्चरं तपस्तप्यमानः कुर्वाणो हे भारत इदं वक्ष्यमाणमन्वाह जजाप ९ जप्यं मन्त्रोपनिषदमाह येनेति अस्मिन् लोके शयाने सति स्वात्म परमात्म याथात्म्य ज्ञानाभावेन मायापारवश्येन शयानतुल्ये सति यो जागर्त्ति सर्वं युगपत्साक्षात्करोति अयं लोकस्तं परमात्मानं न वेद स तु परमात्मा लोकं वेद विश्वशब्दो जीववर्गपरः अचेतनवर्गस्य परमात्मनोपि चेतनीकर्त्तुमशक्यत्वात्तस्य ज्ञातृत्वप्रसक्त्यभावे न नायं वेद इत्युक्तं न वेदेति द्रष्टान्ताभिप्रायेण चिदचिदात्मकजगत्परि वा चेतयते इत्यत्र चेतीति ज्ञाने इति धातोः विषयसाक्षात्कारात्मकं ज्ञा

विरक्तः काम भोगेषु शान्तरूपा पतिः प्रभुः विहाय राज्यं तपसे सभार्यो वनमाविशत् ८ सुनन्दायां वर्षशतं पदैकेन भुवं स्पृशन्
तप्यमानस्तपो घोरमिदमन्वाह भारत ९ मनुरुः येन चेतयते विश्वं विश्वं चेतयते न यं यो जागर्त्ति शयानेस्मिन्नायं तं वेद वेद सः

नं तदनुकूलव्यापारो न तः प्रवृत्तिनियमनादिरूपोऽयं तात्पर्यः तत्र कर्माध्यक्षेति निर्दिष्टः परमात्मा साक्षात्कारात्मकं ज्ञानं तदनुकूल त यत्नः प्रविशन्ति येन तुः परमात्मन अधीनामिति फलितोर्थः एवं प्रवृत्तेः प्रवृत्तिस्तदधीनेत्युक्तं तस्माज्जीवस्य तत्स्वरूप प्रयोजककर्तृत्व कथनेन जीववर्गस्य तं प्रति शरीरत्वं ... शरीरस्यात्माधीनसत्तास्थितित्वलाभात् स्वं जगत्तदायत्तसत्तास्थितिप्रवृत्तिमदित्युक्तं भवति यतो यदधीनसत्तादिमज्जगदतएव यं न चेतयते न तु स्वात्माधीनसत्तादिकं करोतीति विश्वं चेतयते न यमित्यस्यार्थः परमात्मनश्चेतयितृत्वेवि श्वस्य तदभावे च नित्यं प्रकृत्यपारवश्येन युगपत्सर्वसाक्षात्कर्तृत्वं हेतुतयोच्यते यो जागर्त्ति शयानेऽस्मिन्निति त्य नेन यतो जागर्त्ति अतएव तं न शयानो वेद किं तु जाग्रत्स एव तद्विश्वं वेदेत्यर्थः १० श्रीरामो विजयतेतरां

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भगवदर्पितकर्मभिस्तत्परमपुरुषानुग्रहात् दुःखबु आ४

भा॰ अ॰ टी॰
३

निरीह आस्ते इत्येतदेव व्यंजयितुं तावज्जीवस्य तद्भावमाह अथेति अथानन्तरमग्रे प्रथमम[illegible] कर्म्महेतवे कर्म्महेतुर्यस्य तस्मै क
र्म्मसाध्यसुखरूपफलार्थं कर्म्माणीहंते फलसाधनतया कुर्वंतीत्यर्थः अनेन जीवस्यापरिपूर्णत्वं सूचितं कर्म्मानुसारिबुध्यापन्नप्रवृत्तिमत्त्वादृष
र्मी तु वाच्य परमात्मनः प्रथमं जीवस्यैव अग्रे ऋषयः कर्म्माणीहंते इत्युक्तं एवमीहमानोपि पुरुषो जीवः प्रायशोऽनीहां प्रपद्यते स्वविहितकर्म्मसाध्ये
फलेऽनीहां प्राप्य प्रपद्यते सुखार्थतया ---------- मे तु परस्य प्राप्तिपद्यत इत्यर्थः सुखार्थतया विहितानां कर्म्मणां प्रायशो दुःखजनकत्व
दर्शनात् प्राप ---------- इत्युक्तं १४ भगवान् षाड्गुण्यपरिपूर्णः ईशः परमात्मा तु ईहते जीवकर्म्मानुगुणामंतरात्मतया ---------- न तत्र
विषज्जते स्वप्रेर्यजीवकर्म्मसाध्यफले रक्तो न भवति तत्र हेतुं वदन्तं विशिनष्टि आत्मलाभेन निरतिशयानंदरूपं भेनैव पूर्णः सम्यगर्थं पुरु लार्द

अथाग्रे ऋषयः कर्म्माणीहंते कर्म्महेतवे ईहमानो हि पुरुषः प्रायोऽनीहां प्रपद्यते १४ ईहते भगवानीशो न हि तत्र विष
ज्जते आत्मलाभेन पूर्णार्थो नावसीदंति येनुतं १५ तमीहमानं निरहंकृतं बुधं निराशिषं पूर्णमनन्यचोदितं नॄन् शि
क्षयंतं निजवर्त्मसंस्थितं प्रभुं प्रपद्येऽखिलधर्म्मभावनं १६ श्री शु वा इति मंत्रोपनिषदं व्याहरंतं समाहितं दृष्ट्वा।
ऽसुरा यातुधाना जग्धुमभ्यद्रवन् क्षुधा १७

बार्थो यस्य महद्‌ज्ञात्मतो न विषज्जत इत्यर्थः न केवलं स एव न विषज्जते ऽपि तु तमनुये ऽनुवर्त्तमाना जनास्तेपि नावसीदंति कर्म्मफ
लेष्वसक्ता न भवति परमात्मन आत्मलाभपरिपूर्णार्थत्वेन कामेष्व नाशक्तो पूर्णार्थत्वमेव -- हेतुरित्युक्तं भवति १५ ईह
मानोप्यनीहां प्रपद्यत इत्यनेन जीवस्य सुखेच्छा हा दुःखे तु नस्य हेतुरुक्तं उक्तविशेषणसामर्थ्यलब्धगुणविशेषैर्विशिनष्टि शरण
व्रजति समिति तदुक्तविधं ईहमानं जीवकर्म्मानुगुणं प्रेरयंतं निरहं अहंकाररहितं बुधं सर्वज्ञं निराशिषं निरीहं पूर्णमात्म कृतं पू
लाभेनैव पूर्णमनन्यचोदितमनन्यप्रेर्यं स्वानुवर्त्तिनो मुक्तान् जनान् शिक्षयंतं [illegible] निजवर्त्मनि संस्थितं
प्रभुं सर्वशक्तिमखिलार्थधर्म्मान् भावयति पालयतीति तमहं प्रपद्ये शरणं व्रजामि १६ इतीत्थं मंत्रात्मिका
मुपनिषदं व्याहरंतं जपंतं समाहितचित्तं स्वायंभुवं मनुं दृष्ट्वा ऽसुरा यातुधाना राक्षसाः क्षुधानिमित्तेन जग्धुमत्तुमभ्य
द्रवन् १७ रामनारायण वासुदेव गोविंद दामोदर वासुदेव राम राम राम राम राम विष्णुर्भगवान् विजयतेतराम्

३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्थिति — ब्रह्मात्मकत्वाति — वेनात्मनानुभविरेषु — दपि

तेन त्यक्तेन भुंजीथा इति सर्वस्य ब्रह्मात्मकत्वं प्रदर्श्य रिक्तं स्व निष्ठं वस्तु नास्तीयुक्तमथ सर्वस्य तत्कारणकत्वा नतदन्यदित्याह नेति तस्य सर्वकार
णत्वं वक्तुं तस्यापि कारणांतरशंकामुदस्यति न यस्याद्यंतौ मध्यं चेति कार्य्ये मेवाद्यंतादि मध्यवत्स्वयमाद्यादि विरहात्सर्वकारणमित्यर्थः
कारणत्वं च निमित्तत्वरूपमुपादानरूपं चोभयमप्यभिप्रेतं तन्निमित्तकारणत्व प्रयुक्तं वैषम्यपरिहरति स्वः परश्च यस्य नास्तीति देवमनुष्यादि वै
चित्र्यस्य तत्तज्जीवकर्म्ममूलकत्वान्न तस्यानुग्रह निग्रहादि कर्तृत्वमिति भावः [illegible] त्यादि [illegible] तस्य [illegible] प्रवेशपूर्वकत्वं सूचयन् विश्वस्येत्याद्याह
[illegible]
[illegible] मध्यान्तिमावलयलक्षणनिभवंतिय स्मादिति हेत्वर्थे पंचमी — विश्वस्यैर्लयः यतो येन हे
[illegible] तेन कर्त्ता विश्वस्य रक्षणं भवतीत्यर्थः स्थूलचिदचिद्विशिष्टः परमात्मेत्यर्थः जगदाकारेण परिणतः स एवावतिष्ठत इति ततोऽन्यदेवज

न यस्याद्यंतौ मध्यं च स्वः परो नांतरं बहिः । विश्वस्यामूनि यद्यस्माद्विश्वं च तदृतं महत् ॥ १३ ॥ स विश्वकायः पुरुहू
त ईशः सत्यः स्वयंज्योतिरजः पुराणः । धत्तेऽस्य जन्माद्यजयात्मशक्त्या तां विद्ययोदस्य निरीह आस्ते ॥ १४ ॥

[illegible]

दित्यर्थः उपादानत्व प्रयुक्तं विकारित्वं परिहरति ऋतं इति ऋतं सत्यं [illegible] विकारस्पर्शित्वात् स्वकीय — शरीरभूत चिदचि
त्यर्थः [illegible] निर्विकारमेवैकारण [illegible] स्वरूपेण निरतिशयं महन्निरतिशयबृहदित्यर्थः १३ श्लोक
चतुष्टय प्रतिपादित विशेष सामर्थ्य [illegible] श्लोकचतुष्टयगत [illegible] निर्दिष्टस्य प्रतिनिर्देशापरः त
[illegible] विश्वकायः शरीरं यस्य [illegible] शरीरवाचिभिः [illegible] पर्यंत बोधकैः शब्दैः [illegible] अभिधीयत इति पुरु
हूतः सत्यः निर्विकारः विश्वकायो विश्वगत विकारैः [illegible] त्यर्थः ईशः सर्वावस्थ चेतनाचेतनयोर्नियंता स्वयंज्योतिः [illegible] स्व
प्रकाशः अनन्यापेक्षप्रकाश इत्यर्थः अजः जीववत्कर्म्माधीनोत्पत्तिरहितः पुराणः जगत्कारणभूतः पुरापि नवो वा स्य विश्व
स्य जन्मादिकमात्मनः स्वस्य शक्त्या [illegible] अजया प्रकृत्या करोति तां चाजां विद्यया निस्वाविभूता परिच्छिन्न [illegible] या
त्म विषयक ज्ञानेन [illegible] परिहृत्य [illegible] निरीहः जीववदीहा रहितः स्वानंदानुभव [illegible] वाप्तसमस्तकामो
ऽनाहृतकामः सर्वमिदमभ्याप्तो वाक्यनादर इति श्रुतेः आस्ते सर्वान्तरात्मतया तिष्ठतीत्यर्थः । १४ रामरामा

विश्वं च तदित्यनेन दुर्मतामिमता भेदभ्रान्तिः [illegible] — कृतान्नतिनाम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्री.भा.टी.
४
अवतारमाह धर्मस्य सूनृतायां भार्यायां भगवान्पुरुषोत्तमः सत्यसेनाख्यो जातः स सत्यव्रतादिभिर्देवैः सहितः सत्यजित इन्द्रस्य सखा ८२
भूत्वा यक्षराक्षसानवधीत् २५ तानेव विशिनष्टि स इति अनृतमेव व्रतं येषां ते दुःशीला [illegible] स्तानसतः भूतानि द्रुह्यंतीति तथा तांश्च २६ चतु
र्थ उत्तमस्य भ्राता प्रियव्रतसुतः स च नाम्ना तामस इति प्रसिद्धः पृथ्वादयो दश त [illegible] स्य तामसस्य सुताः २७ सत्यकादिसंज्ञा
देवगणाः त्रिशिख ईश्वर इन्द्रः २८ अन्यान् पि विशिष्य पराक्रमानुसारमाह देवा इति हे नृप विधृतेस्तनया वैधृतय इति प्रसि
द्धास्तामसमन्वंतरे देवाः बभूवुः तानेव विशिनष्टि यैर्वैधृतिभिः स्वेन तेजसा स्वबुद्धिबलेन वेदा धृताः कथंभूताः कालेन नष्टा विलुप्ता अ
ध्येतृपरंपराद्यभावादिति भावः २९ एवं मन्वादयः पंचोक्ताः अवतारमाह तत्रापीति चतुर्थेपि मन्वन्तरे हरिमेधसो भर्तुर्हरिण्यां
भार्यायां भगवान् हरिरित्याहूतः व्याहृतः ख्यातो जज्ञे लब्धावसरं पृ [illegible] च्छन् तं विशिनष्टि येन हरिणा भगवता ग्रहान्नक्राद्

धर्मस्यसूनृतायांतुभगवान्पुरुषोत्तमः सत्यसेनइतिख्यातोजातो सत्यव्रतैःसह २५ सोनृतव्रतदुःशीलानसतोयक्षराक्षसान्
भूतद्रुहोभूतगणानवधीत्सत्यजित्सखः चतुर्थउत्तमभ्राता मनुर्नाम्नाचतामसः पृथुःख्यातिर्नरःकेतुरित्याद्यादशतत्सुताः
२७ सत्यकाहरयोवीरादेवास्त्रिशिखईश्वरः ज्योतिर्धामादयःसप्तऋषयस्तामसेंतरे २८ देवावैधृतयोनामविधृतेस्तनयान्
प नष्टाःकालेनयैर्वेदाविधृताःस्वेनतेजसा २९ तत्रापिजज्ञेभगवान्हरिण्यांहरिमेधसः हरिरित्याहृतोयेनगजेन्द्रोमोचितोग्रहात्
३० राजोवाच बादरायणएतत्तेश्रोतुमिच्छामहेवयम् हरिर्यथागजपतिंग्राहग्रस्तममूमुचत् ३१ तत्कथासुमहत्पुण्यंधन्यंस्व
स्त्ययनंशुभम् यत्रयत्रोत्तमश्लोकोभगवान्गीयतेहरिः ३२

जेन्द्रो मोचितः ३० लब्धावसरः पृच्छति बादरायण इति हे बादरायण वयमेतच्छ्रोतुमिच्छामहे किमेतद्यथा भगवान्यथा ग्राहग्रस्तं ग्रं१
गजेन्द्रममूमुचन्मोचयामास तेतत् ३१ श्रवणेच्छायां हेतुं च पृच्छे विशिनष्टि तन्मयात् पृच्छे गजेन्द्रमोक्षणरूपे हरेश्चरित्रे कथासु
मध्ये महत्पुण्यं यद्वा तत्कथासु गजेन्द्रमोक्षणरूपं मया पृष्टं कथासु महत्पुण्यावहम् सामान्याभिप्रायेण प्रतिनिर्देशेन नपुंसक
निर्देशः धन्यं धनावहं कृतार्थत्वावहं स्वस्त्ययनं शुभावहं तत एव महद्गुणवत्त्वं पुण्यत्वादिकं श्रवणपठनद्वारे सर्वग
तमं पुण्यत्वादौ हेतुना यत्रेति यासु कथासु हरिराश्रिताश्रयो हरेर्भगवान्गीयते सा सा कथा पुण्यादिगुणयुक्ता हि स्पर्थः यद्वा यत्र कथा
यां हरिर्गीयते सा पुण्यादिगुणयुक्ता तो गजेन्द्रकथा यामपि हरिर्गीयते एवेति सापि पुण्यावहा तस्मात्तामपि शुश्रूषतां कथयेत्यर्थः ३२ रा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तथावसितान् मनुं हन्तुं समुद्युक्तान् असुरान् यातुधानांश्च दृष्ट्वा सर्वगतः सर्वान्तर्यामी भगवान् यज्ञाख्यः यामैर्युगपत्प्रसूतैः स्वपुत्रैर्देवैः परिवृतः तान्
हत्वा त्रिविष्टपं स्वर्गमशासत् पालयामास स्वयमेवेन्द्रो बभूवेत्यर्थः तत्र प्रतिमन्वन्तरं मन्वादयः षडेते भवन्ति तथा हि स्कान्दे वक्ष्यति मन्वन्तरं मनुर्देवा
मनुपुत्राः सुरेश्वरः ऋषयोंऽशावताराश्च हरेः षड्विधमुच्यते इति तत्राद्यः स्वायंभुवो मनुः प्रियव्रतोत्तानपादौ मनुपुत्रौ तोषप्रतोषभद्रशा
न्तीडस्पतीध्मकविविभुस्वह्नसुदेवरोचनाख्या द्वादश यज्ञस्य पुत्रा एत एव तत्र देवाः मरीचिप्रमुखाः सप्तर्षयः यज्ञो हरेरवतारः इन्द्रश्च स एव यद्य
पि पृथगिन्द्राभावात् षाड्विध्यं नास्ति तथापि यज्ञोंऽशावतारत्वेनाधिपत्येनेन्द्रत्वेनाधिकृत इत्यधिकारद्वयमेव १८
द्वितीयादिषु मन्वन्तरेषु मन्वादिकमाह स्वारोचिष इति यावदर्जिन्द्रः सप्तर्षिः अग्नेः स्वारोचिषः सुतः तस्यात्मजाः १९ तत्र द्वितीय

तांस्तथावसितान् दृष्ट्वा यज्ञः सर्वगतो हरिः यामैः परिवृतो देवैर्हत्वाशासत्त्रिविष्टपम् १८ स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतो
भवत् द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्य चात्मजाः १९ तत्रेन्द्रो रोचनस्त्वासीद्देवाश्च तुषितादयः ऊर्जस्तम्भादयः सप्त ऋषयो
ब्रह्मवादिनः २० ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत् तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः २१ अष्टाशीतिसहस्राणि मुनयो
ये धृतव्रताः अन्वशिक्षन्व्रतं तस्य कौमारब्रह्मचारिणः २२ तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः पवनः सृञ्जयो यज्ञहोत्राद्या
स्तत्सुता नृप २३ वसिष्ठतनयाः सप्त ऋषयः प्रमदादयः सत्या वेदश्रुता भद्रा देवा इन्द्रस्तु सत्यजित् २४ रामानुजाय नमः

यमन्वन्तरे रोचनो भगवतो यज्ञस्य पुत्र एवेन्द्रो बभूव देवास्तु तत्र द्वितीयास्तुषितसंज्ञा --- एकादशादिषादादन्ये चाभवन् ऊर्जस्तम्भादयः सप्त ब्र
ह्मवादिनो ऋषयो बभूवुः २० एवं मन्वादयः पञ्चोक्ताः अथावतारमाह ऋषेरिति वेदशिरस ऋषेस्तुषितेति प्रसिद्धा भार्या ब
भूव तस्यां तु तुषितायां भगवान् देवैः प्रार्थित इति शेषः विभुरिति प्रसिद्धो जज्ञे २१ विभोर्भगवतोऽसाधारणं चरित्रमाह अ
ष्टाशीतीति तस्य कौमारब्रह्मचारिणः विभ्वाख्यस्य भगवतो व्रतमाचारमन्वशिक्षन्ननुकृतवन्तः २२ प्रियव्रतस्य सुत उत्त
माख्यस्तृतीयो मनुः तस्योत्तमस्य मनोः सुताः पवनादय अभवन् २३ वसिष्ठस्य सुताः प्रमदादयः सप्तर्षयः सत्यादि
संज्ञकादेवगणाः इन्द्रस्तु सत्यजिदाख्यः २४ राम राराम राम रामराम राम राम राम राम राम राम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नानाविधा ये रण्यभवाः पशवो मृगा महिषादयस्तेषां व्रातैः संघैः संकुलाभिर्याभिर्द्रोणीभिरलंकृतोस्ति किंचित्राद्रुमा येषु कलकंठा मधुरस्वरा वि
हंगमा यस्मिन् ७ किंच सरितश्च सरांसि चैतैरच्छोदैर्निर्मलोदकैर्युक्तो मणय एव वालुका येषु तैः पुलिनैश्च देवस्त्रीणां मज्जनेन य आमोदस्तेन सौ
रभेन युक्ता अंबूनि अनिलाश्च तैश्च युक्तः आस्ते ८ येमां वाचमरक्षीदमिमं शाहिनागिर्यादिसर्वं ध्येयमिति वक्ष्यति भगवानतो गिरिमुपवर्ण्य
न वर्णयति तस्याः त्रिकूटस्य द्रोण्यां महात्मनो वरुणस्य ऋतुमन्नाम उद्यानमस्ति कथंभूतं सुरयोषितामाक्रीडं क्रीडास्थानं नित्यं फला
नि पुष्पाणि च येषां तैर्द्रुमैः परितोलंकृतं ९ द्रुमानेव कांश्चिद्दर्शयति मंदारादिभिर्वृतैः वनप्रदेशा येषु यानि उद्यानं गिरिनिर्द्वराः १० ११ १२ १३ त

नानारण्यपशुव्रातसंकुलद्रोण्यलंकृतः चित्रद्रुमसुरोद्यानकलकंठविहंगमः ७ सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालु
कैः देवस्त्रीमज्जनामोदसौरभांबुनिलैर्युतः ८ तस्य द्रोण्यां भगवतो वरुणस्य महात्मनः उद्यानमृतुमन्नाम आक्रीडं
सुरयोषितां सर्वतोलंकृतं दिव्यैर्नित्यपुष्पफलद्रुमैः ९ मंदारैः पारिजातैश्च पाटलाशोकचंपकैः चूतैः प्रियालैः
पनसैराम्रैराम्रातकैरपि १० क्रमुकैर्नारिकेलैश्च खर्जूरैर्बीजपूरकैः मधुकैः शालतालैश्च तमालैरसनार्जुनैः ११
अरिष्टोडुंबरप्लक्षैर्वटैः किंशुकचंदनैः पिचुमर्दैः कोविदारैः सरलैः सुरदारुभिः १२ द्राक्षेक्षुरंभाजंबूभिर्बदर्यक्षा
भयामलैः बिल्वैः कपित्थैर्जंबीरैर्वृतो भल्लातकादिभिः १३ तस्मिन्सरः सुविपुलं लसत्कांचनपंकजं कुमुदोत्पलक
ह्लारशतपत्रश्रियोर्जितम् १४ निर्घुष्टं षट्पदैर्मत्तैः शकुंतैश्च कलस्वनैः हंसकारंडवाकीर्णं चक्रवाकैश्च संकुलं १५
मत्स्यकच्छपसंचारचलत्पद्मरजःपयः कदंबवेतसनलनीपवंजुलकैर्वृतं १६ कुंदैः कुरवकाशोकैः शिरीषैः कुटजेंगुदैः कुब्ज
कैः स्वर्णयूथीभिर्नागपुंनागजातिभिः १७

स्मिन्नुद्याने सरोस्ति कथंभूतं सुविपुलं विस्तृतं लसंति कांचनमयानि पद्मानि यस्मिन् कुमुदादीनां श्रियोर्जितं समृद्धं १४ मत्तैर्मधुपानमत्तैः षट्पदैर्नि
गैः कलो मधुरः स्वनो येषां तैः शकुंतैः पक्षिभिश्च निर्घुष्टं ध्वनितं हंसैः कारंडवैश्चाकीर्णं संकुलं चक्रवाकैः सारसैश्चाकीर्णं समस्त
स्याकीर्णपदस्य प्रधानत्वात्सापेक्षेण योन्वयः १५ जलकुक्कुटादीनां कुलैः कूजितं कलेति पाठान्तरं तत्र कलं मधुरं
भवति यथा तथा कूजितं मत्स्यानां कच्छपानां च संचारेण चलतां चलितानां पद्मानां रजसा युक्तं पयो जलं य
स्मिन् कदंबादिभिर्वृतम् १६ कुंदादिभिः शोभितं उत्तरेणान्वयः १७ रामराम गोविंद माधव कृष्णाय नमः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एवमाद्यष्टगजेन्द्रमोक्षकथाः श्रीशुकस्तां कथयामासेत्याह सूतः परीक्षितेति हे विप्राः प्रायोपविष्टेन परीक्षिता राज्ञा कथासु हरिकथने चोदितः
प्रवर्तितः सबादरायणिर्व्यासपुत्रः पार्थिवं परीक्षितं प्रति नंद्याहो साधु पृष्टमित्यभिनंद्य सदसि सभायां मुनीनां शृण्वतां सतामुवाच पृष्टां क
थामिति शेषः ३३ इत्यष्टमे प्रथमः १ उक्तमेवाह आसीदित्यादिनाध्यायत्रयेण स्वाह ग्रहणात्मानं गजेन्द्रस्यावस्थां वक्तुं ता
वत्तावासस्थानं त्रिकूटाचलं वर्णयति आसीदिति हे राजन् त्रिकूट इति प्रसिद्धः कश्चिद्गिरिश्रेष्ठः आसीत्स च क्षीरसमुद्रेणावृतः क्षीराब्धि
परिवृत इत्यर्थः श्रीमान् शोभामान् रत्नादिसमृद्धिमान्वा योजनायुतोन्नतः १ परितस्तावता योजनायुतेन विस्तृतश्च त्रिकूटस
मारव्यावीजमाह रौप्यायसहिरण्मयैस्त्रिभिः शृंगैर्मुख्यैः पयोनिधिं दिशश्च रोचयन्नाप्यास्ते २ तथा रत्नैर्धातुभिर्गैरिकादि

सूत उ० परीक्षितैवं स तु बादरायणिः प्रायोपविष्टेन कथासु चोदितः उवाच विप्राः प्रतिनंद्य पार्थिवं मुदा मुनीनां सदसि स्म
शृण्वतां ३३ श्री ज्ञा व म रा ष्ट स्क प्र मो यः १ श्रु उ च आसीद्गिरिवरो राजंस्त्रिकूट इति
विश्रुतः क्षीरोदेनावृतः श्रीमान्योजनायुतमुच्छ्रितः १ तावता विस्तृतः पर्यक्त्रिभिः शृंगैः पयोनिधिं दिशश्च रो
चयन्नास्ते रौप्यायसहिरण्मयैः २ अन्यैश्च ककुभः सर्वा रत्नधातुविचित्रितैः नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झ
राम्भसां ३ स चावनिज्यमानांघ्रिः समंतात्पयऊर्मिभिः करोति श्यामलां भूमिं हरिन्मरकताश्मभिः ४ सिद्धचारण
गंधर्वविद्याधरमहोरगैः किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकंदरः ५ यत्र संगीतसन्नादैर्नदद्गुहममर्षया अभिगर्जंति हरयः
श्लाघिनः परशंकया ६

भिश्च विचित्रैरन्यैश्च शृंगैः ककुभो दिशाः रोचयन्नास्त इति पूर्वेणान्वयः नानाविधैर्द्रुमैर्लतानां गुल्मैर्लताभिर्गुल्मैश्चेति वा निर्झराम्भसां
गिरिनदीजलानां घोषैश्च रोचयन्नास्त इति पूर्वेणान्वयः ३ स च त्रिकूटः पयोधेः क्षीराब्धेरूर्मिभिः परितः अवनिज्यमानाविशोध्यमा
ना अंघ्रयः प्रत्यंतपर्वता यस्य सः इति पाठे निज्यमानांघ्रिरित्यर्थः इन्द्रनीलमयात्मके रश्मभिः पाषाणैः श्यामलां भूमिं करोति
बिभर्तीत्यर्थः ४ क्रीडद्भिः सिद्धादिभिः जुष्टाः कंदरा यस्य कंदरे निवासांतरे तद्वासिसिद्धादिभिः जुष्टाः सेविताः [illegible] यस्येत्यर्थः ५ कि
न्नरादीनां संगीतसन्नादैर्नदंत्यो गुहा यस्मिन्स्तद्रोतमभिगर्जंति हरयः सिंहाः कथंभूताः परशंकया सिंहांतरागमनशंकया निमित्तभूतया अमर्षयाः सह
नेन श्लाघिनः स्वबीर्यश्लाघायुक्ताः ६
कंदरा २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मि

भा॰अ॰बी॰ कृष्णमेव दर्शयन्नाह तत्रेति हे नृप तत्र सरसि दैवेन प्रारब्धकर्मानुगुणेन प्रवर्तनेन प्रेरणेन नोदितः कश्चिद्बलीयान् ग्राहो मकरः गजेन्द्रं चरणे
६ पादे रुषा क्रोधेनाग्रहीत् जग्राह यदृच्छया दैवात्प्राप्तं व्यसनं दुःखं गतः प्राप्तः सोतिबलो गजेन्द्रो यथाबलं विचक्रमे त्याजयितुं पराक्र
ममकरोत् २६ तदा बलीयसा ग्राहेण तरसा बलेन विकृष्यमाणमत एवातुरं दुःखितं गजेन्द्रं प्रतिक्षीनधियः करेणवो विचुक्रु
शुः रुरुदुः पार्ष्णिग्राहः पृष्ठतः पोषकाः अन्ये गजास्तारयितुं दुःखात्तारयितुं नाशक्नुवन् २७ हे महीपते इत्थं गजेन्द्रग्राहयोर्मिथो
तरतो बहिः अन्तर्विकर्षतोः सहस्रं समाः वर्षाण्यतिक्रान्ताः बभूवुः सप्राणयोः समानबलयोः तद्विकर्षणरूपं कर्म सुरा विचित्रं मेनिरे
२८ ततः सहस्रसमानन्तरं दीर्घेण भूयसा कालेन जले विकृष्यमाणस्य तस्यैवावसीदतः क्षिप्यतः गजेन्द्रस्य मनसः आसीन्मोव्ययः ह्र

तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो बलीयांश्चरणे रुषाग्रहीत् यदृच्छयैवं व्यसनं गतो गजो यथाबलं सोतिबलो विचक्रमे
२६ तथातुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा विचुक्रुशुर्दीनधियोपरे गजाः पार्ष्णिग्रहास्तारयितुं न चा
शकन् २७ नियुध्यतोरेवमिभेन्द्रनक्रयोर्विकर्षतोरन्तरतो बहिर्मिथः समाः सहस्रं व्यगमन्महीपते सप्राणयोश्चित्रममंसतामराः
२८ ततो गजेन्द्रस्य मनोबलौजसां कालेन दीर्घेण महानभूद्व्ययः विकृष्यमाणस्य जलेवसीदतो विपर्ययोभूत्सकलं जलौकसः
२९ इत्थं गजेन्द्रः स यदाप संकटं प्राणस्य देही विवशो यदृच्छया अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत
३० गजेन्द्र उ॰ न मामिमे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवन्ति मोचितुं ग्राहेण पाशेन विधातुरावृतोप्यहं
च तं यामि परं परायणम् ३१ रामश्रीमन्नारायणायाँ रास मरा रामरा मरा मराम रामराम रामराम

योभूत् तत्र मन उत्साहः शक्तिः बलं शारीरम् ओजः ऐन्द्रियम् जलमोकः आश्रयो यस्य ग्राहस्य तु इदं हेतुगर्भं सकलं बलादिकं विपर्ययोभू
दधिकमभूदित्यर्थः २९ स गजेन्द्र इत्थं प्राणस्य संकटं संशयं यदा आपयत् सोपि देही देहभृत् तदा विवश आत्मनः स्वस्य मोक्षणे अपारय
न्नसमर्थः सन् चिरं दध्यौ चिन्तितवान् अथ चिन्तानन्तरं इमां वक्ष्यमाणां बुद्धिमभ्यपद्यत कृतवान् ३० तामेवाह नेति आतुरं
पीडितं न मामिमे ज्ञातयो गजा एव मोचयितुं न प्रभवन्ति हेतुं न प्रभुरेव कुतः कथं करिण्यः प्रभवेयुः अतो विधातुर्दैव
स्य पाशरूपेण ग्राहेणावृतोहं तमेव विधातारं केवलं उत्कृष्टमयनं शरणं रक्षणोपायं यामि अथवा स्वामीत्यर्थः यत्त्व
कल्पान्ममायं ग्राहः ग्रहमत्तमेव शरणं व्रजामीत्यर्थः ३१ कोसौ शरण्यो विधातेत्यत आह राम ५५५ रामश्रीभूयात्

6

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नित्यमृतवः फलपुष्पादिसंपत्तिहेतवो येषां तैरन्यैश्च नीरजैर्द्रुमैरलंकृतमलमत्यर्थं शोभितमित्यन्वयः १८ तत्रैव स्थिते एकदा तद्गिरिकाननाश्रयः वारणयूथपः गजेन्द्रः करिणीभिर्गजीभिः चिरं तृषार्दितेन स्वयूथेन वृतस्तस्य सरोवरस्याभ्यासं समीपमगमदिति पंचमेनान्वयः किं कुर्वन् कंटकैः सहितं कीचकवेणुवेत्रवंतं विशालगुल्मलतादिसंदर्भं वनस्पतींश्च प्ररुजन् प्रभंजन् १९ तमेव विशिनष्टि यस्य गजेन्द्रस्य गंधमात्रादाघ्राय प्रसरमात्रात् सिंहमुख्या हरयः मृगाः प्रतिपक्षिणो गजाश्च भयात्पलायंते २० अन्ये क्षुद्रा हरिणादयो मृगास्तु यस्य गजेन्द्रस्यानुग्रहेणानुज्ञानेनाभीता निर्भयाश्चरंति चेह २१ स गजेन्द्रो घर्मेणातपेन तप्तः मदस्राविकरिभिः करेणुभिः कलभैश्चानुद्रुतः गरिम्णा स्थौल्येन गिरिं प्रकंपयन् मदमत्त इति तथा तेर

मल्लिकाशतपत्रैश्च माधवीजालकादिभिः शोभितं नीरजैश्चान्यैर्नित्यर्तुभिरलं द्रुमैः १८ तत्रैकदा तद्गिरिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन् सकंटकान्कीचकवेणुवेत्रवद्विशालगुल्मं प्ररुजन्वनस्पतीन् १९ यद्गंधमात्राद्धरयो गजेन्द्रा व्याघ्रादयो व्यालमृगाः सखड्गाः महोरगाश्चापि भयाद्द्रवंति सगौरकृष्णाः सरभाश्चमर्यः २० वृका वराहा महिषर्क्षशल्या गोपुच्छशालावृकमर्कटाश्च अन्यत्र क्षुद्रा हरिणाः शशादयश्चरंत्यभीता यदनुग्रहेण २१ स घर्मतप्तः करिभिः करेणुभिर्वृतो मदच्युत्कलभैरनुद्रुतः गिरिं गरिम्णा परितः प्रकंपयन्निषेव्यमाणोऽलिकुलैर्मदाशनैः २२ सरोऽनिलं पंकजरेणुरूषितं जिघ्रन्विदूरान्मदविह्वलेक्षणः वृतः स्वयूथेन तृषार्दितेन तत्सरोवराभ्यासमथागमद्द्रुतं २३ विगाह्य तस्मिन्नमृताम्बु निर्मलं हेमारविंदोत्पलरेणुवासितं पपौ निकामं निजपुष्करोद्धृतमात्मानमद्भिः स्नपयन्गतक्लमः २४ स्वपुष्करेणोद्धृतशीकरांबुभिर्निपाययन्संस्नपयन्यथा गृही घृणी करेणूः कलभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोऽजमायया २५

ग५

लिकुलैर्निषेव्यमाणः २२ सरसः संबंधिनमनिलं वायुं पंकजरेणुभिः रूषितं व्याप्तं विदूराद्दूरादेव जिघ्रन् मदेन विह्वले चलिते ईक्षणे यस्य तृषार्दितेन पीडितेन स्वयूथेन वृतः तत्सरोवराभ्यासं द्रुतं सत्वरमगात् २३ तस्मिन्सरसि विगाह्य प्रवेशपूर्वकं विलोड्य कल्हारादीनां रेणुभिर्वासितं परिमलितं निर्मलममृताम्बु स्वपुष्करेण तुंडाग्रेणोद्धृतं कामं यथेष्टं पपौ अथ च अद्भिः सरोजजलैरात्मानं स्नपयन् गतश्रमो बभूव गतक्लमः पपाविति वान्वयः २४ स्वपुष्करेणोद्धृतैः शीकरांबुभिर्जलबिंदुभिर्दुर्मदान्कलभान्कृपितकान् करेणूश्च यथा गृही तासक्तस्तथा कृपावान् निपाययन् संस्नपयन्नजमायया भगवन्मायया यदागतं कृच्छ्रं दुःखं तन्नाचष्ट नालोचितवानित्यर्थः २५

ग५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तदेतत्सर्वमभिप्रेत्य विशिंषन् शरणं व्रजति यस्मिन्निति इदं चिदचिदात्मकं जगद्यस्मिन्नलीनं सदेहरूपपूर्वकत्वात् तथा
धिकरणत्वसूचनाय तावद्यस्मिन्निति सूक्तं यत उपादानभूतात् कस्माच्चिदचित्प्रविष्टादेतत्स्थूलचिदचिदात्मकं जगज्जातं येन क
र्त्रा सृष्टं रक्षितं च येनेति तत्र एतस्य कर्तृत्वं रक्षितृत्वं चोभयमपि विवक्षितं तथा यस्मिन्नित्यनेन सृज्यमानचिदचिदधि
करणत्वमपि विवक्षितं यत इदमित्यनेन जगदुत्पत्तौ उपादानोपादेयभाव उक्तः तस्मात् तयोर्मिथोऽनन्यत्वमाह य
इदं स्वयमिति इदं सर्वं यदात्मकमित्यर्थः उपादानत्वप्रयुक्तं विकारित्वं परिहरति योऽस्मात्परस्माच्च पर इति अस्मात्स्वरू
पान्यथाभावमापद्यमानाच्चेतनज्ञानात्मनो विलक्षणः सः स्वभावान्यथाभावमापद्यमानो जीवस्तस्माच्च परो विल
क्षणः स्वरूपेण स्वभावेनैव विकाररहितश्चिदचिद्द्वारकत्वाद्विकाराणामिति भावः तमेवंभूतं स्वयंभुवं स्वीयसत्तादिमंतं

यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयं योऽस्मात्परस्मा
च्च परस्तं प्रपद्ये स्वयंभुवम् ३ रामाय नमः

नतु जीववदन्यायत्तसत्तादिमन्तमित्यर्थः प्रपद्ये शरणं गतोऽस्मीत्यर्थः यद्यप्यत्र गत्यर्थेन पद्यतिना बुद्ध्यर्थेन
सता अध्यवसायमात्रमुपस्थाप्यते तथापि प्रमाणान्तरसंवादरणं तमीमहीति पूर्वप्रशरणरूपपर्यायप्रपत्त्या शरणशब्दस्य
प्रयोगाच्च प्रार्थनाद्यनन्तरं रक्षाभरन्यासं करोतीत्युच्यते अनन्यसाध्यस्वाभीष्टे महाविश्वासपूर्वकं तदेकोपायता
याच्ञा प्रपत्तिः शरणागतिः रक्षाप्रार्थनं तु समनन्तरश्लोके अवतु मां परात्पर इत्यादिषु स्फुटम् इयं च गजेन्द्रेण विहि
ता प्राणनिर्मुक्त्यर्थैव नतु प्राणसंरक्षणार्था गजेन्द्रो भगवत्स्पर्शाद्विमुक्तोऽज्ञानबंधनात् प्राप्तो भगवतोरू
पं पीतवासाश्चतुर्भुज इति तत्फलतया मुक्तेरेव वक्ष्यमाणत्वादिति भावः ३ यस्मिन्निदमित्यनेनाभिप्रेतं संक्षिप्य संहारवि
षय चेतनाचेतनात्मकजगदधिकरणत्वं विवृण्वन्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यइति वलिनो तं करोतीत्येतत् कः अन्योऽपि प्रपद्यत इति कः मृत्युः सकलसुरगोमहासर्पः तस्माद् दुःसहवेगाद् अभिधावतो निमित्ताद् भीतं प्रपन्नं च यः कश्चन यो यमीशः परिपाति यस्य भयात् मृत्युरपि प्रधावति तदपि स्वव्यापारे प्रवर्तते तम् शरणं ईमहे याम यः कश्चनेकः अवश्यं यः कश्चिदपि भविता कोऽसौ यो तं कोऽस्माद्भीतं प्रपन्नं पाति यस्य भयान्मृत्युः प्रधावति तं शरणं व्रजेम सर्पः इत्य समस्य तत्पादे मस्येशे ईश्वरे यः कश्चिन्नास्ति न तस्येशे कश्चन नेति श्रुतेः यश्च मृत्युभयाद्भीतं प्रपन्नं परिपाति यस्य च भयान्मृत्युः प्रधावति मृत्युर्धावति पञ्चम इति श्रुतेः तं शरणमीमहि सर्पः इति बुद्धिमप्यपद्यते त्वन्वयः [illegible] हि यः २ तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं यतते च ततो भूयः संसिद्धौ कुरुनन्दन पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि स इति भगवदुक्तरीत्यैव कृतनिश्चययोगजे पूर्वजन्मार्जितं जायेत्याह मुनिः एवं नमामि त्यादि श्लोकद्वयी करी त्याथ वसितः निश्चितमनाः मनो हृदि समाधाय हृदयस्य कृत्वा विषयात् [illegible] प्राप्य जन्मनि इन्द्रद्युम्नाख्य जन्मन्यनुशिक्षितमभ्यस्तं परमं जप्यस्तोत्रं जजाप १ जप्यमेवाह ॐ इति तावत्कारणत्वेनोक्तम्

यः कश्चनेशो वलिनोऽन्तकोरगात् प्रचण्डवेगादभिधावतो भृशं भीतं प्रपन्नं परिपाति यद्भयान्मृत्युः प्रधावत्यरणं तमीमहि २२ इ श्री भा अ म
धे ती ध्या २ स्तु ३ च एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि जजाप परमं जप्यं प्राग्जन्मन्यनुशिक्षितम् १ ग न्द्र वा
ॐ नमो भगवते तस्मै यत एतच्चिदात्मकम् पुरुषायादिबीजाय परेशायाभिधीमहि २ रामरामराम रामरामरामराम

अस्तु विधया जगत्सृष्ट्यादिकारणं प्रकृतिपुरुषविलक्षणो नमस्कृत्य शरणं व्रजति ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति स्मृतेरीशा ब्रह्मणो निर्देशापरः ओंकारः [illegible] इत्यर्थः ओंकाराभिप्रेतब्रह्मशब्दप्रवृत्तिनिर्गुणत्वहेतुत्वं भगवत इत्यनेन षाड्गुण्य निरर वाच्चिनास्पष्टीकृते एवं कारणत्वोपयुक्तगुणयोग उक्तः एवंविधाय तस्मै भगवते नमः कोऽसौ भगवान्यं नमस्करोषि इति तं लक्ष यस्तत्प्रमाने प्रतिजानीते यतो भगवत एतच्चित्संस्थचेतनात्मकं चिदचिदात्मकं इति यावत् यत एवमतः आदिबीजाय परमकारणाय तत् एव परेशाय ब्रह्मादीनामपीशाय परमपुरुषायाभिधीमहि ध्यायेम ध्यायतेर्लोडर्थत्वाद् [illegible] तेन पदे विकरणाभावे संप्रसारणे च रूपं क्रियया यमभिप्रेति सोऽपि संप्रदानमिति वचने नपरस्येशोऽत इत्यात् विवक्षा नक्रियायाः संवध्यमानत्वेन विवक्षया [illegible] संप्रदानसंज्ञा यां पुरुषायेति चतुर्थी स संपरं धीमही त्यादेतु अप्यय [illegible] विवक्षया [illegible] कर्मसंज्ञायां द्वितीया यत इति हेत्वर्थे पञ्चमी हेतुत्वं चाधिकरणोपादानकर्त्रादिसाधारणम् ततश्च यस्मिन् यतः येनेति विवक्षितम् तदन्वयानुगुणानि लीनजातरक्षि तानि पदान्यध्याजिहीर्षितानि २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कर्माणि विधिवन्ति तानि नियमनरूपलालितानि जीवसंबंधिनानाविधविचित्रकर्मानुगुणनियमनरूपलालित्यं
कश्चिदिह तमोऽस्ति कश्च नेति लोकेषु हर्षेण तस्यैव सर्वाणि रूपाणि ज्ञातुमनुष्ठानाद्यवस्था जीवसंबंधिनानाविधमेव तिर्दर्शयितुं स्वरूपस्य दुर्ज्ञेयत्वं वदन् तं प्रार्थयते
तथा दुरवबोधमिति वक्तुं तावत्तत्स्वरूपस्य दुर्ज्ञेयत्वात् तदीयसरणमपि दुरवबोधमेवेति दर्शयितुं स्वरूपस्य दुर्ज्ञेयत्वं वदन् तं प्रार्थयते अथ योयोगिनोऽनेनापि
न मम स्येति देवाः सत्वप्रधुराः तत्रसत्वनिर्मलत्वात्प्रकाशात्मनामयं इत्यतोऽनिर्द्वियार्थदर्शनयोग्यत्वं सूच्यते उभयोरपि तु वक्तुं चकेः उनरहंति न
तदेव सूच्यते अत एव यस्य पदं पद्यत इति पदं स्वरूपं न विदुः सर्वार्थी चीनो जंतुः प्राणी तत्पदं गंतुं यथावद्बोद्धुं ईरितुं वक्तुं च कः पुनरर्हतीत्यर्थः स एवं दुरवबोधस्वरूपो तदेव
दृष्टांतः यथाकृतिभिर्वेषैर्विचेष्टतो नटस्यायमसौ इति तत्त्वरूपमतज्ज्ञा न विदुस्तद्वदित्यर्थः स एवं दुरवबोधस्वरूपोऽप्यानंदस्ते वा कृतिभिर्दे वादिवि
दुरत्ययानुक्रमणः दुर्गमव्यापारः इत्येतमादुरवबोध्यनियमनरूपव्यापारयुक्तो मामवतु यद्वा नटस्येवाकृतिभिर्देवादिदिवि दुरवगमो क्रियमाणः
चित्रशरीरैर्विचेष्टतो जीवद्वारा यस्येति वान्वयः आकृतिभिरवतारविशेषैर्विचेष्टतो यस्येति वार्थः दुरवगमो क्रियमाणो दिदृक्षव
पास्यत्वं प्राकाशिकत्वं विकीर्षुस्तस्य दृष्टांतसाधर्म्येण लब्धं केचित्सुबोध्यत्वं वदन्तस्यैव स्वरूपोपायत्वमध्यवस्यति दिदृक्षव

न यस्य देवा ऋषयः पदं विदुर्जंतुः पुनः कोऽर्हति गंतुमीरितुं यथा नटस्याकृतिभिर्विचेष्टतो दुरत्ययानुक्रमणः स मावतु ६
दिदृक्षवो यस्य पदं सुमंगलं विमुक्तसंगा मुनयः सुसाधवः चरंत्यलोकव्रतमव्रणं वने भूतात्मभूताः सुहृदः स मे गतिः ७

इति सुमंगलं नित्यसुखरूपं यस्य स्वरूपं दिदृक्षवः साक्षात्कर्तुमिच्छवो मुनयः विमुक्तः संगो दारागारादिषु शरीरादिविषयेषु वा ये
ते सुसाधवः अत्यंत साधवो नो धर्मयुक्ताः भूते भूतात्मभूताः आत्मतुल्यतां प्राप्ताः स्वात्मसमदर्शिनः संतो वने एकाकिनः अव्रण
मच्छिद्रमलोकव्रतमितरैर्जनैः कर्तुमशक्यं व्रतमुपासनात्मकं च करोति उपासनामकव्रतपरिपुष्टमनसा तत्पदं साक्षात्कुर्वं
तीति भावः तथा च श्रुतिः हृदा मनीषा ... मनसाभिक्लृप्तः इत्येतत्पश्यानुत्साहयासु स्वदर्शिभिरित्येतदुपलेशयोगी
मनुप्रविश्य यत्तदद्रेश्यमग्राह्यं तत्समासच्चक्षुरभिवीक्षते तं नचक्षुषा पश्यति कश्चनैनमित्याद्यदृश्यत्वश्रुतयस्तु योगरहि
तिसुप्तमतिभिरग्राह्यत्वं वदंतीति भावः स एवंभूतो मे गतिः रक्षोपाय इत्यर्थः ७ एवं दृश्यत्वादृश्यत्वश्रुतीनां विषयवि
विभागो दर्शितः अथ तत्त्वज्ञानयाऽजायमानो निष्कलं निष्क्रियं तद्रूपमनामयमित्यादिजन्मादिप्रतिषेधपराणां
बहुधा विजायते यस्यैवैतत्कर्मसंवेदितव्यः सर्वकर्मा सर्वकामः सर्वगंधः सर्वरसः हिरण्मयः पुरुषो दृश्यते इत्यादीनां जन्मा
दिप्रतिपा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वात्मन्यपवृत्तं सार्वकालिकमुत्तमेश्वरस्यापेक्ष्यते यदिति स्वात्मनि स्वस्मिन्नेव क्वचित्कल्पे निजमायया लीयते कल्पे न विभातं प्रकाशितं
देवादिनामरूपविभागवत्त्वेन प्रकाशितं क्वचित्तु तिरोहितं नामरूपविभागाभावेन सूक्ष्मरूपतया प्रलीनमित्यर्थः उभयं कार्यावस्थं
कारणावस्थं च चिदचिदात्मकं जगत् अविद्धदृक् सेको चाविकारादिरहिततापरिच्छिन्नधर्मभूतज्ञानाश्रयः साक्षी सर्वज्ञ ईक्षते
आत्ममूलः अनन्याधारः परात् प्रधानात् परात् जीवात् परो विलक्षणः मामवतु परस्माच्च परः स्नुपादानत्वे [illegible] विकारप्रसंगपरिजिहीर्षया प्रयुक्त४
२५ र्ष्ययोक्तम् अत्र जीवान्तरस्यापि स्वसदृशत्वे स्वरक्षणासामर्थ्यं सूचनायोक्तं अवत्विति प्रार्थितारक्षा च यावदनिष्टपरिहारपू मिहानुपार्द
४२ र्वकं प्रापणरूपा सा च मुक्तिरेव अस्मिन् गजेन्द्रस्य केवल प्राणमात्ररक्षाप्रार्थनानुपपत्तेः जिजीविषे नाहं [illegible] किमन्तर्वहिश्चा
पेमत वृतयेत्यनुपपन्नपशुपाशविमोक्षणायेति स्वयं तदुक्तेश्च अत एव सर्वज्ञो भगवान् तदभिप्रायमालोच्य मोक्षमे

पः स्वात्मनीदं निजमाययार्पितं क्वचिद्विभातं क्व च तत्तिरोहितं अविद्धदृक् साक्ष्युभयं तदीक्षते स आत्ममूलोऽवतु मां परात्परः ४
कालेन पञ्चत्वमितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु तमस्तदासीद्गहनं गभीरं यस्तस्य पारेऽभिविराजते विभुः ५

विर वादाविति भावयन्नो ४ क्वचित्तिरोहितमिदमीक्षत इत्युक्तं तज्जगत्तिरोभावप्रकारं दर्शयामाप स्यात्तेसुचतद्दशायां कथं भूतो वस्थित ईक्षत इत्यपे
क्षायां तद्दर्शयति कालेनेति द्विपरार्धावसानरूपेण कालेन निमित्तेन सर्वस्य जगतो हेतुषु सर्वेषु हेतुषु वा पृथिव्यादितत्त्वेषु तत्कार्येषु
लोकेषु तत्पालकेषु ब्रह्मादिषु च पञ्चत्वं लयमितेषु प्राप्तेषु सत्सु गहनं सूक्ष्मत्वाद्दुरवबोधं गभीरं परिच्छेत्तुमशक्यमप्रमे
यत्वाद्विनापि परिच्छेत्तुमशक्यं निरतिशयसूक्ष्मदशापन्नत्वादिति भावः एवंविधं तम आसीन्नासदासीन्नो सदासीत्तदानीं
तम आसीदिति श्रुतेः तमः प्राकृतनिरतिशयसूक्ष्मदशारूपं [illegible] प्रकृतिद्रव्यवाची अक्षरं तमसि लीयते तमः
परे देव एकीभवतीति श्रुतेः तदेवंभूत तमसः पारे योऽभिविराजते पारोत्र पालने विनियमनरूपम् पपालनपूरणयो
रिति धात्वर्थानुरोधात् उक्तविध तमोनियमनेकार्थ्यं क्षमे [illegible] यादनेकरूपे स्थित इति विराजते प्रकाशते न तु जीववत्
संकुचितज्ञानो भवतीत्यर्थः ५ रामराम रामराम रामराम रामराम रामराम रामराम रामराम रामराम रामराम रामराम राम

त्वां स्मर्त्वा २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भा०प्र०टी० क्षेत्रज्ञ शरीरज्ञाय सर्वाध्यक्षाय सर्वभूताधिपतये साक्षिणे सर्वद्रष्ट्रे पुरुषायान्तः प्रविश्य नियन्त्रे आत्ममूलाय स्वयंकारणाय तद्रहिताय मू-
लप्रकृतये सर्वोपादानभूताय १३ सर्वेषां इन्द्रियाणां तद्गुणानां च प्रकाशित विषयाणां च तद्गुणानां द्रष्ट्रे सर्वप्रत्ययहेतवे संशयविपर्य-
याद्(?) सर्वधर्मप्रत्ययहेतवे असता सन्तत [illegible] परिणामिन्या छाया [illegible] यावद् प्रपञ्चक सिद्ध्या माययोक्ताय सूचिताय जडत्वेन स्वयं प्र-
वृत्तिशून्यया मायया प्रवर्त्तयितृत्वेन सूचिताय इत्यर्थः असक्तायेति पाठान्तरे तदा असक्तायेत्यर्थः यद्वा सूक्ष्माय गुणधर्मिणे निर्विशेषा-
वृत्तिशून्यया मायया प्रवर्त्तयितृत्वेन सूचिताय अनन्तरं समष्टिशरीरकत्वमुक्तं तत्र सूक्ष्माय तमोमयाय गुणधर्मिणे सत्त्वादिगुणानामाश्रयाय नि-
यसाम्याय ज्ञानघनाय सच्चिदानन्दसमष्टिशरीरकत्वमुक्तं सामान्याय गुणसाम्यावस्थाय अज्ञानघनायेति वा
विशेषाय पश्चिमादिविशेषरहिताय महदाद्यविशेषान्ता इति प्रयोगात् सूक्ष्मत्वादिकं च का [illegible] भिन्नं वा यो विभक्तीति वक्ष्यतीत्यर्थकं विशेषणम् क्षेत्रज्ञाय सर्वाध्यक्षा-
येदः तदजाड्यस्वभावायेत्यर्थः सूक्ष्मत्वादिकं च का [illegible] भिन्नं वा यो विभक्तीति
यसाक्षिणे पुरुषायेति समष्टिजीवशरीरकत्वमुच्यते क्षेत्रज्ञाय एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः इत्युक्तविधक्षेत्र

क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे पुरुषायात्ममूलाय मूलप्रकृतये नमः १३ सर्वेन्द्रियगुणद्रष्ट्रे सर्वप्र-
त्ययहेतवे असताच्छाययोक्ताय सदाभासाय ते नमः १४ नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुत-
कारणाय सर्वागमाम्नायमहार्णवाय नमोऽपवर्गाय परायणाय १५

ज्ञाय सर्वाध्यक्षाय करणाधिपतये साक्षिणे बुद्धीन्द्रियादीनां साक्षाद्द्रष्ट्रे पुरुषाय सर्वशरीरान्तर्वर्त्तिने एतान्यपि संहा-
रकाण्येव विशेषणानि ज्ञेयानि १३ सर्वेन्द्रियगुणद्रष्ट्र इति श्लोके तु व्यष्टिजीवशरीरकं नमस्कारः तत्रासता लिङ्ग १५२
माय२ च्छाया [illegible] यावत्संसारानुबन्धिन्या मायया प्रकाशाय सूचिताय उक्तायेति पाठे सूचितायाश्रयमन्तरेण वासनाया अनुपपत्तेः त
या सूचितायेति भावः [illegible] स्वप्रकाशाय इमान्यपि संहारकाण्येव विशेषणानि उत्तराणि तु संहारकाणीति विवेकः
ज्ञा३ १४ अखिलकारणाय सर्वकार [illegible] शरीरकाय निष्कारणाय स्वयंकारकान्तरासाध्यायाद्भुतकारणाय मृदादिवत्स्व
रूपपरिणामरहितकारणस्वरूपाय सर्वे आगमाः पञ्चरात्रादयः आम्नायाः ऋगादयो वेदास्तेषां महार्णवाय स्रोत-
सामिव पर्यवसानभूमयेऽपवर्गाय मोक्षहेतुभूताय परायणाय परमाश्रयाय परमप्राप्याय ते तुभ्यं नमः १५ रामः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दनपराणां च श्रुतीनां विषयविभागं दर्शयन्स्तौति नेति यद्यपि अस्य जन्मादयो न सन्ति जीवस्येव कर्माधीनतया न सन्तीत्यभावः तथापि लोका-
नां उत्पत्तिनाशयोर्विनाशः संभवः साधूनां परित्राणं तयोः समाहारस्तस्मै तदर्थं तानि जन्मादीन्यनुकालं यदा यदा हि धर्मस्य ग्लानिर्भव-
तीत्याद्युक्तकाले ऋच्छतीत्यर्थः स्वमायया आत्मीयसङ्कल्पेन न तु कर्मणा ऋच्छति प्राप्नोति अकर्माधीनतानि जन्मादीनि स्वेच्छयैवोपादत्त इत्यर्थः तत्र दोषो
विकारः इममेव विषयविभागमभिप्रेत्य वरदगुरुभिरुक्तं यत्तु ललितगुणशरीरविकारभेदकर्मादिगोचरविधिप्रतिषेधवाचः अन्योन्यवि- भिन्नाः४
षयान्न विरोधगन्धमर्हन्ति तत्र विषयः प्रतिषेधबाध्यात्रैति यस्तानि ऋच्छति समेयातीति पूर्वेणान्वयः ८ एवं शरण्योपयुक्तगुणकथनपू- ऋच्छे
र्वकं स्वरक्षार्थं शरणमुपगम्यास्य पात्रपरिच्छिन्नबहुभञ्जनोपेतान्नादिभोजनमवतस्य येन [illegible] मारुतविधूतचूतादिफलादानप्रवे-
न स्मायेन पुनरुक्तो मा भावनाद्दत्या नुतिश्च गुणैर्यथामनुपस्थितैः शरण्यत्वोपयुक्तैः स्तुवन्नमति तस्मा इति परेशाय ब्रह्मणे

न विद्यते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा तथापि लोकाप्ययसंभवाय यः स्वमायया तान्यनुकालमृच्छति ८ तस्मै
नमः परेशाय ब्रह्मणेऽनन्तशक्तये अरूपायोरुरूपाय नम आश्चर्यकर्मणे ९ नम आत्मप्रदीपाय साक्षिणे परमात्मने नमो
गिरां विदूराय मनसश्चेतसामपि १० सत्त्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिता नमः कैवल्यनाथाय निर्वाणसुखसंविदे ११ नमः
शान्ताय घोराय मूढाय गुणधर्मिणे निर्विशेषाय साम्याय नमो ज्ञानघनाय च १२

दीनामपीशाय अनन्ताः शक्तयः यस्य स्वतः प्राकृतं यो यस्य न विद्यते रूपं कर्माधीनं शरीरं यस्य उरूणि बहून्यकर्माधीनानि स्वेच्छयोपात्तान्यप्राकृतानि
विर रूपाणि यस्य आश्चर्याणि लोकसजातीयत्वेनाद्भुतानि कर्माणि जगद्व्यापारात्मकानि यस्य ९ आत्मने दीप्यत इत्यात्मप्रदीपः तस्मै स्वयंप्रकाशाय साक्षिणे सर्व-
स्य युगपत्साक्षाद्द्रष्ट्रे परमात्मने लोकत्रयस्याविषमप्रशासनेन भर्त्रे गिरां शब्दादीनामपि विदूराय अविषयाय वाङ्मनसापरिच्छेद्यस्वरूप-
स्वभावाय चित्तावस्थस्य मनसः सत्त्वप्रचुरत्वेनाधिकार्यविषयीकरणयोग्यत्वसूचनाय मनसः पृथक्चेतसामपीत्युक्तम् १०
विपश्चिता [illegible] विशुद्धेनानन्यप्रयोजनेन नैष्कर्म्येण उपासनात्मकनिवृत्तधर्मेणोपलभ्याय कैवल्यं प्रकृ-
तिसम्बन्धराहित्यं मोक्ष इति यावत् तस्यापि पतये निर्वाणसुखसंविदे निर्दुःखानन्दज्ञानस्वरूपाय ११ शान्ताय अशना-
पिपासाशोकमोहरहिताय सत्त्वादिगुणाश्रयत्वेऽपि तद्वत्पाय इत्यर्थः घोराय घोरप्रकृतिप्रवर्तकाय — — मूढाय प्रका-
शायगुणानां सत्त्वादीनां धर्मिणे साम्याय वैषम्यादिरहिताय ज्ञानघनाय जाड्यरहितायेत्यर्थः १२ ॥ रामरामराम
गुणत्रयप्रवर्तकायेत्यर्थः ।

नमस्तेनाः४ नः४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

निर्विशेषाय प्राकृतविशेषरहिताय अन्यत्सर्वे कर्मत्वादीनां विशेषप्रतिपादकानां श्रुतीनां विरोधायतः ५१

भा·स्कं·टी· न वांछन्ति वै अनिच्छायां हेतुं वदंस्तान्विशिनष्टि अत्यद्भुतं सुमंगलं च तस्य चरित्रं गायन्तस्तद्गुणानुभवानंदसमुद्रमग्नाः २० तमक्षरं
१० नित्यं परं ब्रह्म परेशं ब्रह्मादीनामपीशमव्यक्तं चक्षुराद्यगम्यमाध्यात्मिकयोगेन भक्तियोगेनैव गम्यमत एवातीन्द्रियं इन्द्रियाविषयं सूक्ष्मम
तोऽस्य अणीयांसं इव पाठेन महतो महीयांसमिति लभ्यते अतिदूरं उपायान्तरागम्यत्वात् यद्वा सूक्ष्ममनति च दूरयस्तु तद्विवाती
न्द्रियं त्रिविधपरिच्छेदरहितं माद्यं भवमाद्यं परिपूर्णमन्तर्बहिश्च व्याप्य वर्त्तमानं मवाप्तसमस्तकामं स्तौमि २१ चतुर्मुखप्रमु परिपूर्णं४
तयो देवाश्चराचराश्च लोका वेदाश्च नामरूपविभागेन यस्य फल्ग्व्या कलया कृताः यस्याप्युताप्युतनशांतेकेलोप्राकोऽप्यो वि
श्च विचित्रचिदचिद्विभागवृत्तमिदं तत्तद्विधया निर्मीय वृत्ता इत्यर्थः यस्य तस्य सर्वेश्वरस्य परिस्थादन्वयः २२ कथं कृता
इत्यपेक्षया दृष्टान्तौ तत्राद्यः प्रवाहे द्वितीयस्त्वावतारे यथाग्नेरर्चिषः यथा च सवितुर्गभस्तयो मरीचयोऽसकृन्निर्यान्ति उ
द्भवन्ति संयान्ति पुनस्तत्रैव लीयन्ते स्वरोचिषः स्वांशभूता रोचिषः हेतुगर्भमिदं स्वरोचिष इति यान्ति संयान्ति चेत्यर्थः तथा बुद्धि

एकान्तिनो यस्य न कंचनार्थं वांछन्ति ये वै भगवत्प्रपन्नाः अत्यद्भुतं तच्चरितं सुमंगलं गायंत आनंदसमुद्रमग्नाः २० तमक्षरं
ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यम् अतीन्द्रियं सूक्ष्ममतीवदूरमनंतमाद्यं परिपूर्णमीडे २१ यस्य ब्रह्मादयो देवा
चर् वेदा लोकाश्चराचराः नामरूपविभेदेन फल्ग्व्या कलया कृताः २२ यथार्चिषोऽग्नेः सवितुर्गभस्तयो निर्यान्ति संयान्त्यस
कृत्स्वरोचिषः तथा यतोऽयं गुणसंप्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः २३ स वै न देवासुरमर्त्यतिर्यङ् स्त्री न षण्ढो
न पुमान्न जंतुः नायं गुणः कर्म न सन्न चासन्निषेधशेषो जयतादशेषः २४

र्मनः खानि इन्द्रियाणि शरीरसर्गाः देवादिशरीरसंघाताश्चेत्ययं गुणप्रवाहः गुणपरिणामरूपः प्रपंचो यतो निर्याति यत्र संयाति यदंश
त्वादिति भावः य एवंभूतः स वै न देवादीनामन्यतमोऽपि देवतादिजातिरहित इत्यर्थः तथा स्त्रीत्वादिलिंगरहितः न जंतुर्नापि प्राणी गु
णः कर्म चायं न भवति गुणः कर्म मिश्ररहित इत्यर्थः अत एव न सज्जीववर्गान्तर्भूतः न चासन्नाप्यचेतनवर्गान्तर्भूतः
चिदचितोरेव जात्याद्याश्रयत्वादिति भावः जात्यादिरूपो न भवतीति वार्थः किंतु निषेधशेषः जात्यादिषु ॐ नमो भ
गवते इत्याद्युक्तकल्याणगुणाश्रयत्वे प्रतिषिद्धे सति यस्तद्गुणाश्रयतया अवशिष्यते यच्छेषः अशेषाश्रयः साक्षात्परं
परात्परः संबंधेन जात्यादीनामाश्रयः तत्र चिदचितो साक्षादाश्रयः जात्यादीनां तु चिदचिद्द्वारेति विवेकः एवंभूतः स जयतां स
र्वोत्कृष्टत्वं प्राप्नोतु यद्वा जि अभिभवे इति धातुर्ज्ञेयः तदा जयतादभिभवतात् मम सर्वप्राप्तिविरोधिवर्गं स निरस्यतु इत्यर्थः २५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गुणारणिछन्नचिदूष्मपाय सत्वादिगुणात्मिकप्रकृतिरेवारणिस्तया संछन्नं जीवसमष्टिरूपमूष्माणमग्निं पिबतिसंहारकाले यस्मिन्नुद्
भूतमयोनिरस्यातिसतथैकस्तस्मै मानसशब्देन मनःकार्यसंकल्पपरः तत्क्षोभेविस्फूर्जितो विक्षोभकाले सृष्टिकाले स्फुरितसंकल्पाय नै
ष्कर्म्यमोक्षः स येन भाव्यते तस्मै निवर्तितागमस्वयंप्रकाशाय यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेत्युक्तप्रकारेण वाङ्मनसा
परिछेद्यज्ञानस्वरूपाय नैष्कर्म्यभावेनेति पाठे मोक्षलाभे न निवर्तितः आगमः शास्त्रं येषां ते तेषां स्वयमेव प्रकाशमानाय मु
क्तिपर्यन्तं हि शास्त्रवश्यता मुक्तानां तु निवर्तितागमानामकर्मवश्यानां तत्फलतया प्रकाशमानाय १६ मादृशो यः प्र
पन्नः पशुस्तस्य यः पाशः कर्मबंधस्तस्य मोक्षणं यस्मात्तस्मै तं मोक्षयतीति सततस्मै मुक्ताय स्वयं प्रकृतिपारवश्यरहिताय
भूरिकरुणाय दयासमुद्राय मनसो लयः शब्दादिविषयेभ्यो वैमुख्यं यस्माव एवं तस्मै नमोऽलयायेति पाठेऽलयायेति छेदः

गुणारणिछन्नचिदूष्मपाय तत्क्षोभविस्फूर्जितमानसाय नैष्कर्म्यभावेन विवर्तितागमस्वयंप्रकाशाय नमस्करोमि १६ मा
दृक्प्रपन्नपशुपाशविमोक्षणाय मुक्ताय भूरिकरुणाय नमोऽलयाय स्वांशेन सर्वतनुभृन्मनसि प्रतीतप्रत्यग्दृशे भ
बृहते३ गवते नमस्ते १७ आत्मात्मजाप्तगृहवित्तजनेषु सक्तैर्दुःप्रापणाय गुणसंगविवर्जिताय मुक्तात्मभिः स्वहृदये परिभा
विताय ज्ञानात्मने भगवते नम ईश्वराय १८ यं धर्मकामार्थविमुक्तिकामा भजंत इष्टां गतिमाप्नुवंति किं त्वाशिषो रा
त्यपि देहमव्ययं करोतु मेऽदभ्रदयो विमोक्षणम् १९

नविद्यते लयो नाशो यस्य जनादित्वलयस्तस्मैनमे भक्तः प्रणश्यतीति भगवदुक्तेः योगदृष्ट्या जीवशरीरकतया गृहीतमाणत्वमा स्य
जीवपरः२ ह स्वांशेनेति प्रत्यक्शब्दो देहबुद्धिबोध्यजीवस्य दृक् तद्विषयकं ज्ञानं यस्य तस्मै स्वांशभूतजीवांतरात्मत्वेन तद्रूपतया प्रतीय॥
मानायेत्यर्थः १७ देहपुत्रमित्रादिषु सक्तैर्दुःखेनापि प्राप्तुमशक्याय गुणाः शब्दादयः विषयास्तेषु संगस्तेन विवर्जित
स्तस्मै शब्दादिविषयसंगरहितायेत्यर्थः मुक्तात्मभिः रागादिनिर्मुक्तमनोभिः स्वहृदये परिभाविताय मुहुर्मुहुरभ्यस्ता
य ज्ञानात्मरूपायेश्वराय सर्वनियंत्रे १८ धर्मादिचतुर्विधपुरुषार्थान्कामयमाना यं भजंत इष्टां स्वाभिप्रेतां गतिं ध
र्मादिफलं प्राप्नुवंत्येव न तु तावदेव किंतु याः स्तोत्रकामिता अन्या अप्याशिषो राति ददात्य[illegible] अव्ययमक्षरं च देहं राति स्व
देहतुल्यं देहं च ददाति मुक्तिं चेति यावत् सोऽदभ्रदयो पारकरुणो मम विमोक्षणं करोतु मुक्तिं ददातु इत्यर्थः मूर्खत्वाद
हं मुक्तिं प्रार्थये एकांतिनस्तु तामपि न प्रार्थयंते इत्याह एकांतिनो नन्यप्रयोजना भगवत्प्रपन्ना यस्य यस्मात् कंचनार्थं मुक्तिमपि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भा॰ कृष्णी
११

एवमित्यनुपवर्णितं निर्विशेषं हेयगुणवर्जितं भगवत्स्वरूपं येन यद्वा ब्रह्मादिषु कस्यचिदसाधारणशब्दविशेषरहितं येन वर्णितं स
तथोक्तस्तं गजेन्द्रं [illegible] अत एव ते ब्रह्मादयो यदा नोपससृपुर्नोपजग्मुः कथंभूताः लिङ्गशरीरे नानाविधनामरूपाभिमा
नवन्तः यद्वा लिङ्गं चिह्नं चतुर्मुखत्वहंसवाहनत्वादिरूपं तस्य भिदा अक्षत्ववृषभवाहनत्वशूलपाणित्वादिर्भेदस्तेनाभि स्याभ३
मानो येषां ते परस्परव्यावृत्तचतुर्मुखत्वहंसवाहनत्वअक्षत्ववृषभवाहनत्वसहस्राक्षत्वैरावतवाहनत्वादिलिङ्गाभिमा
नयुक्ताः गजेन्द्रवर्णितचिह्नेषु मदसाधारणानि लिङ्गानि न कानिचिदपि सन्तीत्यभिमानयुक्ताः सन्त इति फलितोऽर्थः
तत्र तदा हर्याख्यो भगवानखिलदेवप्रचुरः सर्वात्मा सर्वगाम्यादिवताडितिश्रुतेः निखिलानां गजेन्द्रोपवर्णितानां गुणानाम्
आत्मत्वादाश्रयत्वादद्वैतादिविभूवस्तोत्रे ब्रह्मविष्णुशिवादिशब्दरहितेऽप्युक्तविशेषणानां ब्रह्मादिष्वसंभवान्न ते समागताः वस्तुसामर्थ्या

श्रीशुक उवाच एवं गजेन्द्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिङ्गभिदाभिमानाः नैते यदोपससृपुर्निखिलात्मकत्वा
त्तत्राखिलामरमयो हरिराविरासीत् ३० तं तद्वदार्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः छन्दो
मयेन गरुडेन समुह्यमानश्चक्रायुधोऽभ्यगमदाशु यतो गजेन्द्रः ३१ सोऽन्तःसरस्युरुबलेन गृहीत आर्तो दृष्ट्वा गरुत्म
ति हरिं ख उपात्तचक्रं उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छ्रान्नारायणाखिलगुरो भगवन्नमस्ते ३२ राम राम राम राम

त्पुरुषोत्तम एव विशेषणानामन्वितत्वात् ३० स एवागत इति भगवतो वास्तवानवच्छिन्नमहात्म्ययोगो दर्शितः आवि
र्भावप्रकारमाह तमिति तद्वत्तथार्तं ग्राहेणापीडितं गजेन्द्रमुपलभ्य ज्ञात्वा दृष्ट्वा तत्कृतं स्तोत्रं च निशम्य श्रुत्वाऽऽगतः यतो यं जग
न्निवासः जगति कृत्स्नं निवासयतीति तथा तदुपलभ्य निशम्य च छन्दोमयेन त्रिवृत्साय आदि छन्दोरूपत्वेनोपास्यमानशि
रश्चक्षुरादि अवयवत्वाच्छन्दःप्रचुरस्तेन गरुडेन समुह्यमानः अनेन शीघ्रातिशयः सूचितः चक्रं सुदर्शनमायुधं यस्य ता
दृशः संस्तुवद्भिर्देवैः सह यत्र गजेन्द्रः तत्राशु अभ्यगमदभिजगाम ३१ अन्तःसरस्युरुबलं यस्य तेन ग्राहेण गृही
तोऽत एवार्तः स गजेन्द्रो गरुत्मति गरुडे स्थितं इति शेषः उपात्तं धृतं चक्रं येन तं हरिं खे अन्तरिक्षे दृष्ट्वा साम्बुजं करं शुण्डां उत्क्षिप्य
रिक्तहस्तो न उपेयाद्राजानं दैवतं गुरुं इत्युक्तन्यायेन गृहीताम्बुजं करं उत्क्षिप्य इत्यर्थः कृच्छ्रात् श्रमात् नारायणेत्यादिकां
गिरं वाचमाह ३२ रामराम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वाभिप्रायमाविःकरोति जिजीविषइति नाहंजीवितुमिच्छामि तत्रहेतुरमुयांतर्बहिश्चावृतया इंकारममकारास्पदयेत्यर्थः इभयो
न्यागजजन्मना किंनकोपिपुरुषार्थः इत्यर्थः किंत्वात्मलोकावरणस्यमोक्षणं इच्छामि लोक्यतेइतिलोकः आत्मारव्यलोकस्या
वरणरूपात्कर्मणो मोक्षणंइच्छामियद्वात्मनोलोकः धर्मभूतज्ञानंतस्यावरकात्कर्मणोमोक्षणंइच्छामि यस्यमोक्षणस्यकालेन
निमित्तेननविप्लवः नपुनरावृत्तिरित्यन्वयः २५ सोहमात्मलोकावरणस्यमोक्षणामिच्छुर्विश्वस्यस्रष्टारंविश्वशरीरकम
विश्वंविश्वविलक्षणं विश्ववेदनं सर्वविदं विश्ववेदसमितिपाठे विश्वस्यवेदसंधनंपुरुषार्थरूपंइत्यर्थः यद्वाविश्वंवेदोधनंशेष
ता:६ भूतंयस्यतेइत्यर्थः विश्वस्यांप्रविश्यभर्तारमजंधर्मायतोत्पत्यादिरहितं गुणपूर्णपरमप्राप्यंपरंकेवलंनतोऽस्मीतिवाप्रणमामि रन्धितानि ७
तेशेणतत्प्रसादतोपायंनजानामीतिभावः २६ योगेनोपासनात्मकेनदग्धानि कर्माणि दर्शनविरोधीनिपुण्यपापात्मका
नियैस्तेयोगिनः योगेनविभाविते विशोधिते हृदिये प्रपश्यंति साक्षात्कुर्वंति तंयोगानांईशं अहंनतोस्मि प्रकास्ते

जिजीविषेनाहमिहामुयाकिमंतर्बहिश्चावृतयेभयोन्या इच्छामिकालेननयस्यविप्लवोयस्यात्मलोकावरणस्यमोक्षणं
विश्वं२ २५ सोहंविश्वसृजंविश्वमविश्वंवेदनं विश्वात्मानमजंब्रह्मप्रणतोस्मिपरंपदं २६ योगरंधितकर्माणोहृदियोगवि
भाविते योगिनोयंप्रपश्यंतियोगेशंतंनतोऽस्म्यहम् २७ नमोनमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय प्र
पन्नपालायदुरंतशक्तये कदिंद्रियाणामनवाप्यवर्त्मने २८ नायंवेदस्वमात्मानंयच्छक्त्याहंधियाहतं तंदुरत्ययमाहा
त्म्यंभगवंतंनतोऽस्म्यहम् २९

सा१ वंयोगविभुक्तमनसःसाक्षात्कुर्वंति तत्कर्तुमशक्तोहंतुकेवलंनतोस्मीतिभावः २७ असह्योऽप्रतिहतोवेगोव्यापारो यस्यत
च्छक्तीनांसत्त्वादिशक्तीनांत्रयंयस्यतस्मै शक्तित्रियायेतिपाठांतरं तदाऽप्रतिहताशक्तिरघटितघटनात्मिकाक्रियाजगत्
सृष्ट्यादिरूपाचयस्यतस्मै अखिलाधीगुणाः धीमतांसंशयविपर्ययाद्यवस्था यस्मात्सत्त्वोत्कर्षस्तस्मै प्रपन्नानांपा
लायरक्षित्रे दुरंतोऽपारशक्तिर्यस्य कदिंद्रियाणामजितेन्द्रियाणामनवाप्यं दुरवगम्यंमहात्म्यंयस्यतस्मै तुभ्यंन
मोनमः २८ अयंजनोयस्यशक्त्यामायया हेभूतयाहंधियादेहात्माभिमानेन यन्माया जीवः देहात्माभिमानेन
हतेहतआयंस्वमात्मानंनवेदने दुरत्ययमहात्म्यमनतिक्रमणीयमहिमानंभगवंतमहंनतोस्मि इतोस्मीतिपाठांतरे तदाप्रपन्नोस्मीत्यर्थः
२९ न्या२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गजेन्द्रपूर्वजन्मवृत्तान्तमाह सवै गजेन्द्रः पूर्वस्मिन्जन्मनि पाण्ड्यदेशपतिः द्रविडेषु श्रेष्ठः इन्द्रद्युम्नाख्यः राजा बभूव स च विष्णुव्रते भजनात्म
कं तदेव स्वस्वोत्कृष्टं महत्त्वमनुष्ठेयं यस्य तादृशः आसीत् ७ एवं स्थिते जन्मनि भवतीति तथा तापसस्तपोनिष्ठः कुलाचले मलयाख्ये वा आश्रमो
यस्य तादृशः स इन्द्रद्युम्नः एकदा भगवदाराधनकाले समाहितचित्तः सन् गृहीत[illegible]मौनात्मकं व्रतं येन तादृशः ईश्वरं हरिं समर्चया
मास ८ तदा शिष्यगणैः परिवृतो महायशा मुनिरगस्त्यस्तत्रेन्द्रद्युम्नाश्रमे समागतः तमिन्द्रद्युम्नं तूष्णीमवस्थितमकृ
तमसमर्पितमर्घ्यादिकं येन तं रहस्येकान्ते उपासीनमुपविष्टं वीक्ष्य ऋषिरगस्त्यश्चुकोप हेति कष्टं ईदृशस्यापि महतो [illegible] विष
यतावमुं वेतिखिद्यति मुनिः ९ तस्मै इन्द्रद्युम्नाय शापमदात् ऋषिरित्यनुषङ्गः शापमेवाह असाधुरिति अयं इन्द्रद्युम्नोऽसा

सवै पूर्वमभूद्राजा पाण्ड्यो द्रविडसत्तमः इन्द्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः ७ स एकदाराधनकाल आत्मवान् गृ
हीतमौनव्रत ईश्वरं हरिम् जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचलाश्रयः ८ यदृच्छया तत्र महायशा
मुनिः समागमच्छिष्यगणैः परिश्रितः तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह ९ तस्मा
इमं शापमदादसाधुरयं दुरात्माकृतबुद्धिरद्य विप्रावमन्ता विशतां तमोऽन्धं यथा गजः स्तब्धमतिः स एव १० श्रीशु
क उवाच एवं शप्त्वा गतोऽगस्त्यो भगवान्नृप सानुगः इन्द्रद्युम्नोऽपि राजर्षिर्दिष्टं तदुपधारयन् ११ आपन्नः कौञ्ज
रीं योनिमात्मस्मृतिविनाशिनीं हर्यर्चनानुभावेन यद्गजत्वेऽप्यनुस्मृतिः १२ एवं विमोक्ष्य गजयूथपमब्जनाभस्ते
नापि पार्षदगतिं गमितेन युक्तः गन्धर्वसिद्धविबुधैरुपगीयमानकर्माद्भुतं स्वभवनं गरुडासनोऽगात् १३

धुर्दुरात्माऽकृताऽशिक्षिता बुद्धिर्यस्य तादृशो ह्यधुना विप्रानस्मानवमन्यते परिभवतीति तथाऽतो हेतोस्तमिस्त्रमज्ञानं विशतां प्राप्नोतु
यथा गजः स्तब्धमतिर्गजस्तथैवायमप्यभवतु स एव गज एव भवत्विति शेषः १० हे नृप एवं शप्त्वा भगवानगस्त्यः सानुगः सशिष्यो गतः
ययौ तत इन्द्रद्युम्नोऽपि राजर्षिस्तदगस्त्यशापात्मकं दिष्टं प्रारब्धमेव उपधारयन् निश्चिन्वन् आत्मनः स्मृतिविनाशिनीं कौञ्ज
रीं योनिमापन्नः प्राप्तः तर्हि पश्चात्कथं स्मृतिर्जाता तत्राह यद्गजत्वेऽप्यनुस्मृतिस्तद्धर्यर्चनानुभावेन पूर्वजन्मनि [illegible] भगवदा
राधनप्रभावेनाभूदित्यर्थः ११ १२ एवमित्थं गजेन्द्रं वि[illegible]मोच्य पार्षदत्वं प्रापितेनापि गजेन्द्राख्यजीवेनापि अपिशब्दात्स्वपा
र्षदैश्च युक्तो [illegible]ब्जनाभो हरिर्गन्धर्वादिभिरुपगीयमानं कर्म यस्य गरुड आसनं वाहनं यस्य सः अद्भुतं स्वभवनं ययौ इत्यर्थः १३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रीः २

ततः पीडितं गजेन्द्रं वीक्ष्याजो हरिः कृपया सहसा आप्लवतीर्य गरुडोपि मे गतिरिति ततो गरुडाद्वाशुत्वरया स ग्राहं गजेन्द्रं सरस
टी२ उ.. दोहकृत्य वहिर्निष्क्रांतवान् ततोरिणा चक्रेणा विपाटितं भिन्नं मुखं यस्य तस्माद्ग्राहाद्गजेन्द्रं उ… याणां देवानां पश्यतामसुच
मोचयामास ३३ इत्यष्टमे स्कंधे तृतीयः ३ तदा किमभूत् तदाह तदा गजेन्द्रमोचनदृष्ट्या ब्रह्मरुद्रमुख्या देवादयस्तं
कु गजेन्द्रमोक्षणरूपं हरेः कर्म प्रशंसन्तः सुमनवर्षं ववृषुः १ तथा दिव्या दुंदुभयो नेदुः गंधर्वा ननृतुर्जगुः ऋषयश्च प्रभृतयः पु
रुषोत्तमं हरिं तुष्टुवुः २ योसौ ग्राहः स पूर्वस्मिन् जन्मनि हूहूर्नाम गंधर्वश्रेष्ठः स देवलस्य शापेन निमित्तेन ग्राहो जातः देवल
स्य शापेन मुक्तः सद्यः परमाश्चर्यरूपधृत् आत्मनाद्भुत गंधर्वरूपधृत् ३ उत्तमश्लोकमव्ययं अतः कीर्तन्याः कीर्त

तदेवीक्ष्य पीडितमजः सहसावतीर्य सग्राहमाशु सरसः कृपयोज्जहार ग्राहाद्विपाटितमुखादरिणा गजेन्द्रं संपश्यतां
हरिरमूमुचदुस्त्रियाणाम् ३३ इति श्रीभागवते महापुराणे अष्टमस्कंधे गजेन्द्रमोक्षणे तृतीयोऽध्यायः ३ श्रीशुक उ
वाच तदा देवर्षिगंधर्वा ब्रह्मेशानपुरोगमाः मुमुचुः कुसुमासारं शंसन्तः कर्म तद्धरेः १ नेदुर्दुंदुभयो दिव्या दु२
गंधर्वा ननृतुर्जगुः ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमम् २ योसौ ग्राहः स वै सद्यः परमाश्चर्यरूपधृक्
मुक्तो देवलशापेन हूहूर्गंधर्वसत्तमः ३ प्रणम्य शिरसाधीशमुत्तमश्लोकमव्ययम् अगायत यशोधाम कीर्तन्यगु
तो२ णसत्कथं ४ सोनुकंपित ईशेन परिक्रम्य प्रणम्य तम् लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ५ गजेन्द्रो भगवत्
स्पर्शाद्विमुक्तोऽज्ञानबंधनात् प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः ६

णीयाः गुणाः सत्कथाश्च यस्य तम् अधीशं हरिं शिरसा प्रणम्य गायते स्म ४ एवमिति हूहूः सोत्तमे कदा सरसि स्त्रीभिः सह क्रीडन्सो हू
हूः स्नातुं प्रविष्टं देवलं … चकर्ष स च प्रकुपितो ग्राहो भवेति शशाप स च प्रसादितः सन्नुवाच एवमेव गजेन्द्रं गृहीत्वा तत
श्च गजेन्द्रमुद्धरन् हरिः त्वामपि मोचयिष्यतीति ईदृशेन हरिणा गानप्रीतेनानुकंपितः अनुकंपाविषयीकृतः स गंधर्व
स्तमीशं परिक्रम्य प्रदक्षिणीकृत्य प्रणम्य च लोकस्य ब्रह्मादिजनस्य पश्यतः स ततः मुक्तं विलिप्तं देवलशापरूपं यस्य तादृशः
सन् स्वं लोकमगात् ५ गजेन्द्रस्तु भगवतो हरेः स्पर्शाद्वितीरज्ञानबंधनात्कर्मबंधनाद्विमुक्तः भगवतः सारूप्यं प्राप्तः एतदे
वदर्शयति पीतं … वासो यस्य च त्वारो भुजा यस्य ६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भा.पु.टी. प्र...णवमोंकारं स्वयंभुवं तद्वितरूपं धर्मं मम व्यक्तं प्रधानं नव्ययं धर्मं भगवद्भक्तियोगलक्षणं दाक्षायणीः दक्षदुहितॄः धर्मस्य पत्नीः सोमकश्य
पयोः पत्नीः २२ नंदां मलकनंदां कालिंदीं यमुनां सितवारणं ऐरावतं ध्रुवं मौत्तानपादिं सप्तर्षीन् पुण्यश्लोकान् पुण्यकीर्तीन् इति पुण्यश्लो
१३ कान् मानवांश्च २३ प्रातः उत्थाय ये स्मरंति कथंभूताः प्रयताः सुसमाहिताः नियतास्तत्र हि योगिनः कथंभूताः
स्मरंति मम रूपाणि मच्छरीरभूतानि सर्वाणि एनसः अखिलात् पापात् मुच्यन्ते दुःस्वप्नादिनिमित्तेभ्यः सर्वपापेभ्यो मुच्यन्त इत्यर्थः
२४ ये च जनाः निशागमे प्रभाते प्रतिबुध्य अनेन स्तवेन स्तोत्रेण मां स्तुवंति तेषां प्राणात्यये प्रयाणकाले वि मलां मतिं ददामि

एवं स्मरन्ति मम व्यक्तं गोविप्रान् धर्ममव्ययं दाक्षायणीः धर्मपत्नीः सोमकश्यपयोः स्त्रियः २ गंगां सरस्वतीं नंदां का
लिंदीं सितवारणं ध्रुवं ब्रह्मऋषीन् सप्त पुण्यश्लोकांश्च मानवान् २३ उत्थायापररात्रान्ते प्रयताः सुसमाहिताः स्म
रंति मम रूपाणि मुच्यन्ते ह्येनसोऽखिलात् २४ ये मां स्तुवंत्यनेनांग प्रतिबुध्य निशात्यये तेषां प्राणात्यये चाहं ददामि विम
लां मतिं २५ श्रीशुक उवाच इत्यादिश्य हृषीकेशः प्रध्माय जलजोत्तमं हर्षयन् विबुधानीकमारुरोह खगाधिपम्
२६ इ. श्री भा. म. पु. अ. ४ शुक उवाच राजन्नुदितमेतत्ते हरेः कर्माघनाशनं गजेन्द्रमोक्षणं पु
ण्यं रैवतं त्वंतरं शृणु १ पंचमो रैवतो नाम मनुस्तामससोदरः बलिविंध्यादयस्तस्य सुता हार्जुनपूर्वकाः २
विभुरिन्द्रः सुरगणा राजन् भूतरयादयः हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वादयो द्विजाः ३ पत्नी विकुंठा शुभ्रस्य
वैकुंठैः सुरसत्तमैः तयोः स्वकलया जज्ञे वैकुंठो भगवान् स्वयम् ४

विमलां ददामि २५ इत्यादिश्य आज्ञाप्य हृषीकेशो हरिः जलजोत्तमं शंखश्रेष्ठं प्रध्माय ध्वनयित्वा ब्रह्मादिदेवतावर्गं हर्षयन् ग
रुडमारुरोह हे विस्तृतभवनमुग्राहिस्पर्धः २६ इ. श्री. भा. टी. चं. चं. ४ एवं तामसमन्वंतरकथनप्रसंगात् प्रसक्तं गजेन्द्रमोक्षणं वर्णि
तमनुवदन् पंचममन्वंतरं श्रोतुं चोदयति शुकः राजन्निति एतत् पुण्यतमं गजेन्द्रमोक्षणाख्यं कर्म हरेः दुरितनिवर्तकं मे
मया तुभ्यं कथितमथ पंचमरैवतं मन्वंतरं शृणु १ तत्र पंचमो मनुः रैवत इति प्रसिद्धः स च तामसस्य प्रियव्रतात्मजस्य सोद
रः तस्य रैवतस्य मनोः सुताः बलिविंध्यादयः ते चार्जुनः पूर्वो मुख्यो येषां तादृशाः २ इन्द्रस्तु विभुरिति प्रसिद्धः हे राजन् भूतरयाद
यः सप्तर्षयः ३ एवं मन्वादयः पंचोक्ताः अथावतारमाह पत्नीति शुभ्रस्य भर्त्तुः विकुंठाख्या पत्नी तयोर्विकुंठाशुभ्रयोर्भ
गवान् कलया हीनं वैकुंठ इति प्रसिद्धः स्वयं वैकुंठाख्यैः सुरसत्तमैः सह जज्ञे अवतीर्णः ४

९१

13

(१३)

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यत्स्वर्ग्यादि यत्पठनेन तत्तेऽस्माभिर्ना तस्योत्तरमुक्तं उपसंहरन् गजेन्द्रमोक्षकथाश्रवणफलमाह एतदिति हे महाराज एतद्गजेन्द्रमो
क्षणरूपः कृष्णानुभावः तव तुभ्यं मयोदितः कथितः इदं गजेन्द्रमोक्षणं शृण्वतां जनानां स्वर्ग्यं स्वर्गसाधनं यशस्करं कलि
कल्मषापहं कलौ युगे यत्कल्मषं पापं तदपहन्तीति तथा कलिः कलहः तन्निमित्तपापंहरतीति वा हे कुरुवर्य दुःस्वप्ननाशम् ।। तीति
यातत् १४ श्रेयस्कामा द्विजातयस्त्रैवर्णिकाः प्रातरुत्थाय शुचयः शुचिभूताः दुःस्वप्नाद्युपशान्तये एतद्यथावद्यत्नं कीर्तय
ति १५ अनेन कीर्तितेन दुःस्वप्नाद्युपशान्तिर्भवतीत्युक्तिस्तो ना यत्ने इत्यपेक्षायां भगवद्वचनादेवेत्याह इदमिति हे कुरुसत्तम सर्व स५
भूतानां शृण्वतां सतां सर्वभूतप्रभुर्विभुर्हरिः प्रीतो गजेन्द्रं प्रतीदं वक्ष्यमाणमाह १६ भगवदुक्तिमेव दर्शयति य इत्यादिना
विमलां मासि इत्यंतेन ये जनाः त्वां च एतत्सरोवरादीन् अपररात्रान्ते प्रभाते उत्थाय स्मरन्ति ते खलु अहं सोमसूर्यतद्दुस्तरचा

एतन्महाराज तेऽभिहितो मया कृष्णानुभावो गजराजमोक्षणं स्वर्ग्यं यशस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य
शृण्वताम् १४ यथानुकीर्तयन्त्येतच्छ्रेयस्कामा द्विजातयः शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशान्तये १५ इदमाह ह
रिः प्रीतो गजेन्द्रं कुरुसत्तम शृण्वतां सर्वभूतानां सर्वभूतमयो हरिः १६ श्रीभगवानुवाच ये मां त्वां च सरश्चेदं गिरि
कंदरकाननम् वेत्रकीचकवेणूनां गुल्मानि सुरपादपान् १७ शृङ्गाणीमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च क्षी
रोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरं १८ श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम सुदर्शनं पाञ्चजन्यं सुपर्णं पत
गेश्वरम् १९ शेषं च मत्कलां सूक्ष्मां श्रियं देवीं मदाश्रयां ब्रह्माणं नारदमृषिं भवं प्रह्लादमेव च २० मत्स्यकूर्म
वराहाद्यैरवतारैः कृतानि मे कर्माण्यनन्तपुण्यानि सूर्यं सोमं हुताशनम् २१

न्वयः गिर्यादीनां समाहारद्वंद्वः वेत्रादीनां इतरेतरयोगद्वंद्वः तेषां गुल्मानि संरम्भविशेषात्मकानि सुरपादपान् मंदारादीन् १७
इमानि त्रिकूटस्य शृङ्गाणि प्रसंगादन्येषामपि प्राप्ताः [illegible] आह ब्रह्मणश्चतुर्मुखस्य मे हरेः शिवस्य च धिष्ण्यानि स्थानानि
धयाणां त्रिकूटगिरिशृङ्गाणां ब्रह्मादिस्थानाभिप्रायेण वैमानीत्युक्तम् क्षीरोदं क्षीरसागरं मम प्रियं स्थानं भास्वरं श्वेतद्वी
पं च १८ तेषाममश्रीवत्सादीन् [illegible] वनमालां कौमोदकीं गदां पतगेश्वरं गरुडम् १९ कृष्णां दुःप्रतर्क्यां मत्कलाभूतं शे
षं चाहमेवाश्रयो यस्यास्तां देवीं श्रियं महालक्ष्मीं ब्रह्माणं चतुर्मुखं ऋषिं नारदं भवं रुद्रम् २० मम मत्स्याद्यवतारैः कृतान्यनं
तपुण्यानि अनन्तानीति शेषः यानि कर्माणि चरितानि सोमं चन्द्रं हुताशनमग्निम् २१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भा.पु.टी.
१५

लब्धावसरः पृच्छति राजा यथोक्तिस्त्रिभिः हे ब्रह्मन् भगवताजितेन यथा क्षीरसागरो मथितः यथा रीत्या मथितः यदर्थं येषां प्रयोजनार्थं
मथितः यत्कृते तोरेवं चरात्मना कूर्मरूपेणाद्रिं मन्दरं दधार ११ येन च प्रकारेण देवैरमृतं लब्धं तत्तोमथना [illegible] दमृताद्यतिरिक्तं वस्तु किं किम
भवत् एतत्सर्वं दधिमथनात्मकं भगवतोऽद्भुतं कर्म वदस्व १२ त्वस्य शुश्रूषोर्मनसि त्वया संकीर्त्यमाने सात्वतां पते भगवतो म
हिम्नामेच्छितं नैव तृप्यति अत्र श्रीहेतुं वदति सुचिरं बहुकालेनापि नाध्यात्मिकादिनां पत्रयेण तापितं दुःखितं १३ एवमा
भा५ पृष्टो भगवान् बादरायणिः प्रश्नमभिनन्द्य कथयामास आह सूतः संपृष्ट इति हे द्विजाः इत्थं संपृष्टो भगवान् द्वैपायनसुतो द्विजाः शु
कः राज्ञः प्रश्नमभिनन्द्य हरेर्माहात्म्यं कथयितुं प्रारेभे १४ तदेवाह यदेत्यादि भिः पयोदधिमथनात्मकं भगवत्कर्म वि
त्रे वक्तुं तावत्तदुपोद्घातप्रपंचयत्यध्यायद्वाभ्याम् यदासुरैः कर्दमिः छिन्नायुधैः साधने शुभ्र मानादेवा जनसा [illegible] निपति

राजोवाच यथा भगवता ब्रह्मन् मथितः क्षीरसागरः। यदर्थं वा यतश्चाद्रिं दधाराम्बुचरात्मना ११ यथामृतं सुरैः प्राप्तं किं चा
न्यदभवत्ततः। एतद्भगवतः कर्म वदस्व परमाद्भुतम् १२ त्वया संकथ्यमानेन महिम्ना सात्वतां पते। नातितृप्यति मे चि
त्तं सुचिरं तापतापितम् १३ सू उ च संपृष्टो भगवानेवं द्वैपायनसुतो द्विजाः। अभिनन्द्य हरेर्वीर्यमभ्याचष्टुं प्रचक्रमे १४
शु उ च यदा युद्धेऽसुरैर्देवा बध्यमानाः शितायुधैः। गतासवो निपतिता नोत्तिष्ठेरन्स्म भूरिशः १५ यदा दुर्वाससः शापेन से
न्द्रा लोकास्त्रयो नृप। निःश्रीकाश्चाभवंस्तत्र नेशुरिज्यादयः क्रियाः १६ निशाम्यैतत्सुरगणा महेन्द्रवरुणादयः। नाध्यग
च्छन्स्वयं मन्त्रैर्मन्त्रयन्तो विनिश्चयम् ७

तावद्गुणाः पुनर्नोत्तिष्ठेरन्नाजीवन्स्म १५ यदा च दुर्वाससो मुनेः शापेन इन्द्रेण सहितास्त्रयो लोकाः निःश्रीकाः निर्लक्ष्मीकाः निःसंपदोऽभव
न् दुर्वासा हि कदाचिन्मार्गे गच्छन्तमिन्द्रं दृष्ट्वा स्वकण्ठमालारूपया तस्मै दत्ता नेन चेन्द्रेण श्रीमदेनानादृत्य सा माला ऐरावतस्य कुम्भे क्षिप्ता स च तम
न:प[illegible]द्भ्यां मालां चूर्णीचकार ततः कुपितो दुर्वासास्तं शशाप त्रिभिर्लोकैः सह त्वं निःश्रीको भवेति तदेवमुक्तं यदा दुर्वाससः शापेनेति
तत्र तदा इज्यादयो यागादयः क्रियाः नेशुर्न समर्थाः श्रियं वर्धयितुं नाशक्नुवन्नसमर्थाः १६ तथाह इन्द्रादिदेवगणा एतत्त्रैलोक्यं निःश्री
कत्वं पतितानां देवानामनुद्धारं च दृष्ट्वा स्वयं मन्त्रैर्मन्त्रयन्तोऽप्यालोचयन्तोऽपि विनिश्चयं सश्रीकत्वोपायविषयं [illegible] निश्चयं नाध्य
गच्छन् न प्रापुरित्यर्थः १७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वैकुंठकल्पितं

वैकुंठाख्यो भगवांस्तं विशिनष्टि वैकुंठ इति देव्या रमया लक्ष्म्या प्रार्थ्यमानेन येन वैकुंठेन भगवता तस्या लक्ष्म्याः प्रियं कर्तुमिच्छया वैकुंठः
वैकुंठाख्यो लोकः कश्चिद्देशान्तरवर्ती कल्पितः स च लोकालोकपर्वतस्योर्ध्वे नेन कृतः लोकालोकपर्वतोपरि निर्मित इति भावः ५ त
स्य वैकुंठस्य भगवतोऽनुभावः सनकादिशापेन दैत्यतां प्राप्तयोर्जयविजययोः वधरूपेण यथाविलसत्ताः स्वभावाद्गु
णाश्च वात्सल्यादयः परमोदयाः महोदयाश्च कथिताः तृतीयसप्तमस्कंधादिषु कथिताः संक्षेपेण कथिताः कार्त्स्न्येनाधुनाक
थयेत्यत्राह भौमानिति यः पुमान् विष्णोर्गुणान् वर्णयेत् साकल्येन विशेषः सः भौमान् भूसंभवान् रेणून् विममे गणयेत् भौमानां
रेणूनां गणनवद्विष्णोर्गुणानां साकल्येन वर्णनमशक्यमित्यर्थः यद्यपि वराहावतारः स्वायंभुवमन्वंतरारंभकालिकः तृतीयस्कंधउक्तः
जयविजययोः सनकादिशापेन दैत्यताप्राप्तिस्तु रैवतमन्वंतरे इति तस्यानुभावः कथित इत्येतदसंगतं तथापि संक्षेपेणाभिप्रायः सया

वैकुंठः कल्पितो येन लोको लोकनमस्कृतः रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ५ तस्यानुभावः कथितो गुणाश्च पर
मोदयाः भौमान् रेणून् स विममे यो विष्णोर्वर्णयेद्गुणान् ६ षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः पूरुपूरुषसुद्युम्न
प्रमुखाश्चाक्षुषात्मजाः ७ इन्द्रो मन्त्रद्रुमस्तत्र देवा आप्यादयो गणाः मुनयस्तत्र वै राजन् हविष्मद्वीरकादयः ८ तत्रापि
देवः संभूत्यां वैराजस्याभवत्सुतः अजितो नाम भगवानंशेन जगतीपतिः ९ पयोधिं येन निर्मथ्य सुराणां साधिता सुधा
भ्रममाणोऽम्भसि धृतः कूर्मरूपेण मंदरः १०

कृतत्वाद्वैकुं

मंदरगिरेर्भ्रामणसमये भगवतः प्रादुर्भावस्तद्धारणमस्तीति सति वराहेऽस्मिन्मन्वंतरे प्राप्तो जयस्तेन हतः स्थवर्गतत्वं नचैवमपि तद्धस्य वराहावतारानुभावके
थनमसंगतमिति वाच्यम् अवताराणां भिन्नत्वेप्यवतारिणो भगवत एकत्वात्पूर्वं वर्द्धितस्य प्राप्तिर्वैकुंठावतारस्य समकालिकत्वान्मनु
नगस्थापितसकलमूलकल्पाद्युक्तिर्विभाव्यते ६ षष्ठं मन्वंतरमाह षष्ठश्च मनुश्चाक्षुषः उत्तरश्चाक्षुष इति प्रसिद्धः पूर्वादयश्चाक्षुष
पत्र२४ स्य मनोरात्मजाः ७ इन्द्रो मंत्रद्रुम इति प्रसिद्धः तत्र मन्वंतरे आप्यादयो गणा देवगणाः हे राजंस्तत्र मन्वंतरे हविष्मदादयः सप्तर्षयः ८ एवं मन्वा
दयः पञ्चोक्ताः अवतारमाह तत्रेति तत्रापि षष्ठे मन्वंतरे वैराजस्य भर्तुः संभूत्याख्यायां भार्यायां जगतीपतिर्भगवानंशेनाजित इति प्रसि
द्धोऽभवत् ९ अवतारकृत्यमाह संक्षेपेणावतारकृत्यं विशिनष्टि पयोधिमिति येनाजितेन पयोधिं क्षीरोदधिं निर्मथ्य सुराणां सुधामृतं साधिता संपादि
ता येन च कूर्मरूपेणाम्भसि भ्रममाणो मंदरो गिरिः धृतः १०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तर्हि रजआदिधर्त्तो नाम तथापि प्रकृतेः किं माया तमिति चेत्तत्राह अयं त्विति देहिनां भवाय सत्त्वाय स्थितये स्थितस्य सर्गः सत्त्वं जुषा-
णस्य सत्त्वगुणं जोषनिमित्तकर्मानुगुणं प्रवर्त्तयतस्तस्य भगवतो ये स्थितिपालनक्षणः स्थित्यात्मकपालनस्य कालः सत्त्वप्रधान
देवादिपालनकालोयमिति भावः यत एवं तस्मात्सर्वेषामेव जगद्गुरुं जगद्धितं कारिणं शरणं व्रजामः रक्षणोपायत्वेनाध्यवस्या
मः स्वानां शरणव्रजनमात्रेण स्वीयत्वेन परिगृहीतानामस्माकं शं सुखं धास्यति यतोयं भगवान् स्वत एव सुराः प्रियाय
स्य तादृशः २३ एवं ब्रह्मा सुरान्सम्मुखाजितस्य भगवतः स्थाने तैः सुरैः सह जगामेत्याह भगवान् बादरायणिः
इतीति हे अरिंदम कामक्रोधादिदमन राजन् इतीत्थं सुरान् देवानाभाष्य वेधाः सर्वं जगद्विदधाति सृजती

अयं तु तस्य स्थितिपालनक्षणः सत्त्वं जुषाणस्य भवाय देहिनां तस्माद्व्रजामः शरणं
जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः २३ श्री क वा इत्याभाष्य सुरान्वेधाः स
ह देवैररिंदम अजितस्य पदं साक्षाज्जगाम तमसः परम् २४ तत्रादृष्टस्वरूपाय श्रु
वि४ तपूर्वाय वै प्रभोः स्तुतिमब्रूत दैवीभिर्गीर्भिस्त्ववहितेन्द्रियः २५

ति तथा तादृशः चतुर्मुखः देवैः सह लोकाद्यस्य परमलोकाख्यं तमस्तस्मात्तमसः परं अजितस्य भगवतः पदं स्था
नं जगाम ययौ २४ तत्र पदे दृष्टस्वरूपाय नमो स्वरूपमभिवक्ष्यते तस्मिन्साधुनारीत्या स्वं स्वदुर्दर्शनत्वं ज्ञापयि
तुमदृष्टं ब्रह्मादिभिः कदापि न दृष्टं स्वरूपं यस्य तस्मै श्रुतपूर्वाय पूर्वं श्रुतः वेदशास्त्रादिभिः श्रुत इति श्रुतपूर्वः त
स्मै अजिताख्यो भगवानवतीर्णः इत्येतावन्मात्रं ब्रह्मादिभिः श्रुतं न तु दृष्टः इति भावः एवं विधाय तस्मै प्रणम्येति शे
षः स्त्ववहितेन्द्रियः [illegible] हितेन्द्रियः त्वा तु समाहितेन्द्रियो ब्रह्मा दैवीभिरौपनिषदर्थानुकारिणीभिर्गीर्भिरभि [illegible] स्वय
म [illegible] नभिभूतः इतरानभिभवति जयतीत्यभिभुः अजितस्य स्तुतं भावेन स्तुतिमब्रूत उवाचाकरोदित्यर्थः २५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ततो निश्चयानधिगमनानन्तरं मेरोर्मूर्द्धनि स्थितां ब्रह्मणश्चतुर्मुखस्य सभां सर्वशः सर्वे जग्मुः तत्र गत्वा सर्वे प्रणताः कृतप्रणामाः परमेष्ठिने ब्रह्मणे विज्ञापयांचक्रुर्विज्ञप्तिं चक्रुरित्यर्थः १८ ततः श्रुत्वा ब्रह्मा किमकरोदित्यत आह सइति ततः स परमेष्ठी विगतप्रभान्निस्तेजस्कान्निःसत्त्वान्बलहीनानिन्द्रवाय्वादीन् तथाऽमङ्गलप्रायान्मङ्गलरहितानिव स्थितान्त्रीन् लोकांश्च विलोक्य तथाऽसुरांश्च देवगणाद्विलक्षणान् तेजोबलादियुक्तांश्च विलोक्य सुरानाहेत्युत्तरेणान्वयः १९ विभुर्ब्रह्मा समाहितेनैकाग्र्येण मनसा परमपुरुषं संस्मरन् परमपुरुषशरणाद्वरं [illegible] तिन यथा पूर्वं सर्वे प्राप्स्याम इति हर्षेणोत्फुल्लं विकसितं वदनं यस्य स भगवान् ब्रह्मा हरीन्द्रप्रमुखान्सुरान्देवानाहोवाच २० तदेवाह अहमिति त्रि

ततो ब्रह्मसभां जग्मुर्मेरोर्मूर्द्धनि सर्वशः सर्वं विज्ञापयां चक्रुः प्रणताः परमेष्ठिने १८ स विलोक्ये
न्द्रवाय्वादीन्निःसत्त्वान् विगतप्रभान् लोकानमङ्गलप्रायानसुरांश्च विलक्षणान् १९ समाहितेन
मनसा संस्मरन्पुरुषं विभुः यथापूर्वं तयः सर्वे प्राप्स्यामः शरणं गताः हर्षेणोत्फुल्लवदनः सुरा
नाह पितामहः २० ब्रू वा अहं भवो यूयमथोसुरादयो मनुष्यातिर्यग्द्रुमघर्मजातयः यस्याव
तारांशकलाविसर्जिता व्रजाम सर्वे शरणं तमव्ययं २१ न यस्य वध्यो न च रक्षणीयो नोपेक्षणी
यादरणीयपक्षः अथापि सर्गस्थितिसंयमार्थं धत्ते रजः सत्त्वतमांसि काले २२

भा२

भिः असुरादयः सर्वे यस्य भगवतोऽवतारः सत्त्वाधिष्ठितो निरूढः तस्यांशकलयांशांशेन सत्त्वरजस्त्वादिगुणलेशेन विसर्जिता उत्पादितास्तमव्ययं भगवन्तं शरणं व्रजाम गच्छेम यः स्रष्टा स एवास्माकं रक्षिता ततस्तमेव शरणं व्रजेमेतोऽन्यो न कश्चिदुपास्योऽस्तीति भावः तत्राहं ब्रह्मा भवो रुद्रः यूयं देवा द्रुमा वृक्षाः घर्मजादयः स्वेदजादयः २१ ननु तेन यथा वयं सृष्टास्तथाऽसुराश्च विसृष्टास्तानिग्रहात्वैषम्यादि प्रसक्तात्गुणरहितः कथमस्मान्रक्षिष्यतीत्याशङ्कां निराकरोति द्वाभ्यां नयस्येति तत्रार्द्धेनाक्षेपः सार्द्धेन तु परिहारः यद्यप्यस्य वैषम्यनैर्घृण्यादि आकृतगुणरहितस्य वध्यादिपक्षो नास्ति तथापि जगतः सृष्ट्याद्यर्थं काले सृष्ट्याद्युपयुक्तकाले रजःसत्त्वतमांसि धत्ते बिभर्त्ति त्रिगुणोपाधिनिमित्तकर्मानुगुणं प्रवर्त्तत इत्यर्थः २२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भा॰ अ॰ रजीवयुगपत्साक्षात्वमेकस्य जीवस्यासंभावितमिति भावः अर्थाः शब्दादयो विषयास्तद्ग्राहकाणि श्रोत्रादीन्द्रियाणि च तेषामाभासं
टी॰ प्रकाशकं जीवानामर्थेन्द्रियप्रकाशकं इत्यर्थः अनिद्रं निद्राग्रहणेनागराद्यवस्थात्रयोपलक्षणमवस्थात्रयरहितमित्यर्थः तत्र
३६ हेतुरव्रणं कर्मोपभोगशरीररहितं तत्रापि छायातपौ अज्ञानेन तन्निमित्तज्ञानेन च यत्र न गृध्रपक्षौ अभिकांक्षयौ रागादिमत्सुरूपाश्च
यो यत्र प्रसिद्धलक्षणः तादृशमक्षरमप्राप्नोतेः खं सन्मयं सर्वव्यापकं तत्र दृष्टान्तः खमाकाश इव व्याप्तमित्यर्थः त्रियुगं षड्गुणो
पेतं त्रियुगत्रयाविर्भूतं वा व्रजामहे शरणमिति शेषः २७ पुनरप्यसाधारणेन धर्मान्तरेण विशिंषन्न शरणं व्रजति अज
स्येति मनोमयं चक्रं यदक्षं यः परमात्मा अक्षो यस्य तथोक्तं यच्छुद्धस्य प्रतिनिर्दिष्टमस्तमिति तं परमात्मानमृतं सत्यं प्रप
द्ये शरणं व्रजामीत्यन्वयः मनोव्यापारमूलकं संसाररूपं चक्रमजस्य भगवतो मायया ईर्यमाणं प्रवर्तमानं पंचदशारं दशेन्द्रि
यपंचवायवस्त्रिप्राणारमाशुगामित्रिणाभि त्रयः सत्त्वादयो गुणा एव नाभिर्यस्य तदनुकूलप्रतिकूलोदासीनरूपेण वा अष्टने

विपश्चितं प्राणमनोधियात्मनामर्थेन्द्रियाभासमनिद्रमव्रणं छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं
व्रजामहे २७ अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पंचदशारमाशुगं त्रिणाभि विद्युच्चलमष्टनेमि यदक्षमा
हुस्तमृतं प्रपद्ये २८ य एकवर्णं तमसः परं तदलोकमव्यक्तमनन्तपारं आसांचकारोपसुपर्णमेनमुपासते योगर
थेन धीराः २९

मिर्भूमिरापोनलो वायुः खं मनो बुद्धिरेव चाहंकार इत्यष्टप्रकृतय एव नेमिर्यस्य विद्युदिव चलं यः परमात्मा अक्षमाश्रयो यस्य यत्संकेत्य
मूलकमित्यर्थः आशुगामि गच्छतीति तथा २८ एवं बंधदत्वस्वरूपेणानिरूप्य साधारणधर्मेणोक्तः अथ मुक्तिदत्वं सूचयन्नुपतिगम्य
लोकेऽविघ्ननिष्ठं यदेकवर्णमेकप्रकारं केवलं शुद्धसत्त्वमयमित्यर्थः तमसः प्रकृतिमण्डलात्परं परस्तात् छिद्यमाने प्रपंचे तमसः परं तमसः
पराके आदित्यवर्णं तमसः परस्तादिति श्रुतेः स्थानमिति शेषः अलोकं सेसामिभिर्दृष्टुमशक्यमव्यक्तं रागादिदोषैर्विशेषेणानभिव्यक्तं मिलितं
न भवतीत्यर्थः उपसुपर्णं यत्र पूर्वे साध्याः सन्ति देवा इत्युक्तनित्यसिद्धात्मकाः सुपर्णाः हंसास्तेषां समीपे सन्निकृष्टं तदधिष्ठितं
इत्यर्थः अनन्तपारं निरवधिं त्रिपादस्यामृतं दिवीति श्रुतेः एवंभूतं पदं यत्पदं यं आसांचकार उपविवेश अधिष्ठितवानित्यर्थः
ये च धीरा योगरथेन योगमार्गेण उक्तविधपदप्राप्तये उपासते यच्छुद्धस्य तमित्युत्तरत्रान्वयः तमेतमिति पूर्वपाठे वा उपसुवर्णमि
मिति पाठे सुवर्णवत्प्रकाशवत्कुलं पदं यं उपासांचकार उपविष्टवानित्यर्थः २९

त्रिस्तु ५ ३६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्तुतिमेवाह अविक्रियमिति चाभ्यां हे देव त्वां नमामः नमस्कुर्मः बहुवचनमि न्द्रादिदेवताभिप्रायकम् कथंभूतं वरं श्रेष्ठं निःसमाभ्यधि कमत एव वरेण्यं वरणीयं वरमित्यनेन नमनं त्वत्समस्त्वदभ्यधिकश्च द्वितीयो नास्ति अत एव वरेण्यं सर्वैः स्तवितः देव वरेण्यं यतो भागेनापि वरे हे तुः मनोऽग्रयानं वचसानिरुक्तं मनसः अविषयत्वेन यातिवर्तते इति तथा वचसा निर्वक्तुमशक्यं वाङ्मनसाविषय इत्यर्थः
चेतना४ सर्वं हि चेतनात्मकं जगद्वाङ्मनसयोर्विषयमत एवावरं परमात्मा तु तदविषयत्वाद्वर इत्यर्थः यद्यपि परमात्मापि योगपरिशु
यापू द्धमनोविषयो वेदांतवाग्विषयश्च तथापीयत्तं व्याममपि परिछेत्तुमशक्यो ऽनंतरूपस्वभावत्वादिति भावः वाङ्मनसाविषयत्वे
हेतुरप्रतर्क्यमिति प्रकृतिपुरुषसजातीयत्वेन तर्कितुमशक्यं यस्मात तर्क्यं तदेव वाङ्मनसविषयमिति भावः अप्रतर्क्ये हेतु
र्निष्कलत्वं इति कला अवयवा निरवयवत्वं कर्मायत्तप्राकृतशरीररहितमित्यर्थः यत्सकलं तदेव प्रतर्क्यमिति भावः
आकाशादिकमपि सकलमेवेति तात्पर्यम् तर्हि ईदृशः कुत्रास्त इत्यत आह गुहाशयमस्मदादिहृदयगुहायामेव शयानं
वसतेत इत्यर्थः तर्हि किं जीवः हृदिस्थ परमात्मा प्रतिष्ठित इति भ्रमवारणाय आह आद्यं भवमाद्यं हृदयावस्य जीवानामपि उपा

मूलोवाच अविक्रियं सत्यमनंतमाद्यं गुहाशयं निष्कलमप्रतर्क्यम् मनोऽग्रयानं वचसानिरुक्तं नमामहे देववरं वरेण्यम् २६

दानकारणं तथा देवर्तमाने गुहाशयत्वप्रयुक्तं परिछिन्नत्वं वारयति अनंतमिति उपासकानुग्रहार्थं तत्र तत्र तथा नियमनाय च हृ
दयावच्छिन्नत्वेपि स्वरूपतो देशकालवस्तुपरिच्छेदरहितं आद्यत्वप्रयुक्तं स्वरूपतः स्वभावतश्च प्रकृतिपुरुषयोरिव प्रासविकारं वा
रयति अविक्रियं सत्यमिति अविक्रियं प्रकृतेरिव स्वरूपान्यथाभावरूपविकाररहितं सत्यं पुरुषस्येव स्वभावान्यथा
भावरूपविकाररहितं संहारकत्वाद्विकारस्य स्वरूपस्वभावतश्च निर्विकारमेवेति भावः अत्र प्राप्ति पदे सत्यं ज्ञानमनं
तं निष्क्रियं निष्कलं शांतं निरवद्यं तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुव
न् यद्वाचानभ्युदितमित्यादिश्रुत्यर्थोऽनुसंधेयः २६ अन्येरपि प्रकृतिपुरुषयोरसंभावितं गुणो देवविशि
ष्टं वरं तं व्रजति विपश्चितमिति गुणादीनां विपश्चितं सर्वसाक्षिणं तं चात्मानो जीवाः न हि सर्वप्रकृतिविका

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अंभोजत्वं यद्वेतः यत्वाद्भिभूतं त्रयो लोकलोकपालाश्चासिध्यं तिः विशेषः यस्मात् तस्य देहात् जीवंतियेनेतिशेषः वर्द्धमानाय त्रेतिशेषः सब्रह्मवाचो ५२
महाविभूतिर्नः प्रसीदतु ३३ सोमं चंद्रमसं यस्य मनो वदंति चंद्रमा मनसो जातः इति श्रुतेः सोमं विशिनष्टि यः सोमो दिवौकसां देवानां धम
न्नं अमृतं करत्वादितिभावः अत एव बलमायुश्च नगानां वृक्षाणां प्रजानां चराणां च प्रकर्षेण जनयतीति प्रजनः अत एवैतेषां
मीशो यः सोमस्तं यस्य मनो वदंति मनसो जातं विरा[illegible]जस्य मनः स्थानीयं च वदंति स ब्रह्मसमहाविभूतिर्नः प्रसीदतु बलादीनि परस्मा
त्मविशेषणानि वा देहादीनां यश्च बलादिहेतुः स ईशो ब्रह्मसमहाविभूतिरित्यन्वयः ३४ तथा यस्याग्निर्मुखं मुच्यते मुखादग्नि
श्चाग्निश्चेत्यादिश्रुतिभिर्यस्य मुखस्थानीयो मुखाज्जातश्चाग्निः स ब्रह्मसमहाविभूतिः प्रसीदत्वित्यन्वयः अग्निं विशिनष्टि
जातवेदाः जातं यस्मिन् निहितं चरुपुरोडाशादिकं इन्द्रादिभ्यो वेदयति विद्लाभे प्रापयतीति तथा क्रियाकांडनिमित्तजन्मा क्रियाकांड

अंभस्तु यद्रेत उदारवीर्यं सिध्यंति जीवंत्युत वर्द्धमानाः लोका स्त्रयोऽथाखिललोकपालाः प्रसीदतां ब्रह्मसमहाविभूतिः ३३
सोमं मनो यस्य समामनंति दिवौकसां वै बलमंध आयुः ईशो नगानां प्रजनः प्रजानां प्रसीदतां नः समहाविभूतिः ३४ अग्नि
र्मुखं यस्य तु जातवेदा जातः क्रियाकांडनिमित्तजन्मा अंतः समुद्रेनुपचन् स्वधातून् प्रसीदतां नः समहाविभूतिः ३५ यच्चक्षु
रासीत्तरणिर्देवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यम् द्वारं च मुक्तेरमृतं च मृत्युः प्रसीदतां नः समहाविभूतिः ३६

निमित्तं यज्ञादिक्रियाकलापात्मकवेदपूर्वभागार्थानुष्ठाननिमित्तं जन्म यस्य सः अंतः समुद्रे समुद्रो देहः आत्मकत्वानुभूयस्त्वादिति
५२ न्यायेन जलांशप्रचुरत्वाद्वान्तः समुद्रे देहमध्ये जाठररूपेणस्वधातून् स्वाधिष्ठितदेहस्थान् धातून् रसुक्शोणितादीन् अनुपचय परि
णामयन्नेवं भूतोग्निर्यस्य मुखं सः प्रसीदतां ३५ तथा तरणिरादित्यो यस्य चक्षुरासीत् चक्षोः सूर्यो अजायतेति श्रुतेः स
महाविभूतिर्नो स्माकं प्रसीदतां तरणिं विशिनष्टि देवयानमार्गभूतः त्रयीमयः ऋग्यजुःसामप्रचुरः एष तत्
रणिर्ब्रह्मणः परस्य धिष्ण्यम् य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यत इति श्रुतेः ब्रह्मण उपासनास्थानमित्यर्थः
मुक्तेर्द्वारं देवयानत्वादिति भावः अमृतं चामृतसाधनं पुण्यानुष्ठानप्रकारं लक्षणं ज्ञापक[illegible]तिभावः
मृत्युरूदयास्तमयाभ्यामायुर्व्ययकरत्वादेवं भूतस्तरणिर्यस्य चक्षुः समहाविभूतिः प्रसीदतां ३६

३७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एवं मुमुक्षुभिरुपास्यत्वं मुक्तप्राप्यत्वं नित्यविभूत्यधिपतित्वं चानितरसाधारणमुक्तं अनेन मुक्तिदत्वमनितरसाधारणं सूचितं तदे
व व्यंजयन्नमस्करोति नेति कश्चिदप्ययं जनो मत्स्यभूतिर्जनो यस्य भगवतो मायां नातितितर्ति नातिक्रामति दैवी ह्येषा गुणमयी म
म माया दुरत्यया मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते इति भगवदुक्तार्थोऽत्रानुसंधेयः नातितितर्ति किंतु तया मुह्यत्यत एव भूतेषु
समं चरन्तमन्तरात्मतया नियमयन्तमर्थं परमपुरुषार्थस्वरूपं यं परमात्मानं न वेद न जानाति यत्साक्षात्कर्तृत्वं तितिर्ति न मुह्यति
वेद चेति भावः तं भूतेषु समं चरन्तमपि निर्जितात्मात्मगुणं एकः आत्मप्राज्ञो देहपरः अपरस्तु जीवपरः चिदचिद्विशिष्टः ईशः अ
तएव परेषामपीशं नमाम ३० कश्चाप्यस्य मायां नातितर्तीत्यनेनास्य दुरवगमत्वं चिद्घितं तत्त्वं सूचितं तदेव व्यक्तीकरोति इमइति ॥
इमे वयं देवा ऋषयः यत्प्रियया तन्वा शरीरभूतेन सत्त्वेन सृष्टा अपितु वयं सत्त्वं निमित्तं ... मित्युक्तविधसत्त्वगुणप्रधा

नयस्य कश्चातितितर्ति मायां यया जनो मुह्यति वेद नार्थं तं निर्जितात्मात्मगुणं परेशं नमाम भूतेषु समं चरन्तं ३० इमे वयं
यत्प्रियैव तन्वा सत्त्वेन सृष्टा बहिरन्तराविः गतिं न सूक्ष्मामृषयश्च विद्महे कुतोऽसुराद्या इतरप्रधानाः ३१ पादौ म
हीयं स्वकृतैव यस्य चतुर्विधो यत्र हि भूतसर्गः स वै महापुरुष आत्मतन्त्रः प्रसीदतां ब्रह्म महाविभूतिः ३२

णा अपीति भावः अन्त एव बहिरन्तराविः ... सृष्टा इति शरीरभूतत्वान्नाम यस्य भगवतो गतिं चेष्टां सूक्ष्मां दुर्विभाव्यां न विद्महे उक्तविधा वयमेव
कु२ न विद्महे कुत इतरप्रधाना रजस्तमःप्रधाना असुराद्या जानीयुः ३१ यदेकवर्णितमिति नित्यविभूत्याधिपतित्वं उक्तमथ लीलावि
भूत्यधिपतित्वमनितरसाधारणं वक्तुं कृत्स्नजगदन्तर्गतानां ... नां तदपृथक्त्वेन तच्छरीरकत्वं तन्मुखेनचैव देवत्वे पुरुषसूक्तप्रतिपा
द्यविराड्रूपस्य भगवद्विभूत्यधिपतित्वरूपमाह विभूत्यात्मिकाऽनितरसाधारणधर्मयुक्तं वाचं वारमनुस्मरन्तस्तत्सार्ष्टार्थ्यं पादेरित्यादि
दशभिः इयं मही यस्य स्वकृतैव स्वेन ... पादौ भूमिरिति श्रुतेः पादौ स महाविभूतिर्ब्रह्म ... नः प्रसीदतामित्यन्वयः म
हीं विशिनष्टि यत्र मह्यां चतुर्विधः जरायुजोऽण्डजः स्वेदजोद्भिज्जरूपो भवति पुमान् देवो नरो न पशुर्न च पादपः इत्युक्तचतुर्वि
धो वा स भगवानात्मतन्त्रः स्वतन्त्रः महापुरुषः परमपुरुषो वैराजपुरुषो वा नोऽस्माकं प्रसन्नो भवतु ३२

भतसर्गो २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सं० भा० टी० वी० २०

एवमादर्हं द्वेषनिमित्तं तद्वक्तुं तावदुपोद्घातमाह देवर्षिः पौरोहित्यायेत्यादिना भगवान्काव्यः शुक्रः पौरोहित्यप्रयोजकतकर्मकर्तुमसुरैर्दैत्यैः किलेति प्रसि
द्धौ नयति तस्य काव्यस्य सुतौ शंडामर्कौ रियौ दैत्यराजस्य हिरण्यकशिपोर्गृहसमीपे आस्तामिति शेषः १ तौ च शंडामर्कौ दैत्यराजेन नीतिशास्त्रपठ
नार्थं प्रह्लादमन्यांश्चासुरबालकांश्च पाठ्यान्प्रह्लादीनीमादीन्पाठयामासतुः पठनं कारितवंतौ अत्र नयकोविदं इति क्रियाविशेषणं यथा नयकोविदा
नीतिशास्त्रनिपुणा भवंति तथा पाठयामासतुरिति २ तत्रैवं स्थिते प्रह्लादो यद्गुरुणा प्रोक्तं तच्छुश्रुवे शुश्राव न तु अनुपपाठ तवाप्यपरंतु तस्य प्रोक्तं मनसा साधु
यथा तथा न मेने तत्र हेतुं वदन्प्रोक्तं विशिनष्टि स्वपरासद्ग्राहाश्रयमयं स्वः स्वकीयो मित्रमयं परः शत्रुरित्येवं रूपो योऽसद्ग्रहः दुराग्रहः सोऽभिमानस्तस्या
पां० श्रयं हेतुभूतं ३ एवं स्थिते हैडवकदाचिदसुरराट् पुत्रं प्रह्लादमंकमारोप्यांके निधाय हे वत्स पुत्र भवानाचार्यप्रोक्तेषु मध्ये यत्साधु मन्यते तत्कथय

नारद उ० पौरोहित्याय भगवान्वृतः काव्यः किलासुरैः शंडामर्कौ सुतौ तस्य दैत्यराजगृहांतिके १ तौ राज्ञा प्रापितं बालं प्रह्लादं न
यकोविदं पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान् २ यत्तत्र गुरुणा प्रोक्तं शुश्रुवेऽनुपपाठ च न साधु मनसा मेने स्वपरासद्ग्रहा
श्रयं ३ एकदासुरराट्पुत्रमंकमारोप्य पांडव पप्रच्छ कथ्यतां वत्स मन्यते साधु यद्भवान् ४ प्रह्लाद उ० तत्साधु मन्येऽसुरवर्य
देहिनां सदा समुद्विग्नधियामसद्ग्रहात् हित्वात्मपातं गृहमंधकूपं वनं गतो यद्धरिमाश्रयेत ५ नारद उ० श्रुत्वा पुत्रगिरो दैत्यः प
रपक्षसमाहिताः जहास बुद्धिर्बालानां भिद्यते परबुद्धिभिः ६ श्री

तां द्रष्टेवं पप्रच्छ ४ एवं दैत्येन पृष्टः प्रह्लाद स्तमाह तदित्येकेन हे असुरव
र्य दैत्यराज अहमसद्ग्रहात् अहंकाराभिमानस्वतंत्रत्वाभिमानलक्षणमूलयदहादिविषयाभिनिवेशान्यः स्वसद्ग्रहस्तस्मात् हेतोः सदा नित्यं समुद्विग्ना नितरां भीता धीर्येषां देहिनां देहधारिणां आत्मपातं पतंत्य
नेनेति पातं आत्मनश्चाधःपतने हेतुमंधकूपतुल्यं गृहं त्यक्त्वा वनमरण्यं प्रविश्य हरिमाश्रितबंधहरं भगवंतमाश्रयेतेति यत्तदेव साधु मन्ये इति हित्वेति पदेन गृहपरित्यागः
हरिमाश्रयेतेत्यनेनानुपादेय तदनुष्ठानसंक्षेपः वनं गत इति विविक्तदेशोपलक्षणं इति ५ एवमुक्तो दैत्यराजः किमकरोदित्याह देवर्षिः श्रुत्वेति परपक्षसमाहिताः प
रपक्षे विष्णोः समाहिताः परिनिष्ठिताः पुत्रस्य प्रह्लादस्य गिरः श्रुत्वा दैत्यो जहास सहास एवं कं उवाच इत्यर्थः तदेवाह बालानां बुद्धिः परबुद्धिभिः परस्मिन्नरा
त्रौ विस्त्रौ बुद्धिर्येषां तैर्भिद्यते अन्यथा क्रियते विपरीता क्रियत इत्यर्थः ६ श्री हनुमते विजयते तराम् श्रीमते रामानुजाय नमः श्रीरामश्री राम २०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सप्रश्लाघ्यः किंचनसंगोनिरुपाधिकस्नेहः तेनलब्धेपातमश्लोकस्यभगवतःपादारविंदयोर्निषेवयामुहुर्मुहुरात्मनःस्वस्यपरांनिर्वृतिमानंदं विरचयन्नतर
५२ त्सौ [illegible] दुरात्मनामपिरुपकरः यद्वात्मनःस्वस्यविशेषणस्यापिसमासः विषयासंगेनस्यमनसःशमंशांतिंरागादिरहितमेवापाचक्रे दुःसंगदीनस्येति।
विशेषणंलोकपरिपाटीकृतेननुतस्यकदाचिदपिविषयासक्तमभून्मनइतिभावः ४४ हेराजन्तस्मिन्नेवंभूतेमहाभागवतेमहात्मनिमहाविवेकिनि
महात्मन्युक्तविधमहात्म्यतत्रात्मजेहिरण्यकशिपुरघंद्रोहमकरोत ४५ सर्वविधस्यद्रोहानर्हत्वंकथयन्पृच्छतियुधिष्ठिरः देवर्षइतिसार्द्धत्रिभिः।
हेदेवर्षेएतदिच्छामिज्ञातुंइच्छामःकिंतत् तद्वृत्तान्तमनपराधापसाधवेमहाभागवतायतत्रात्मजायघ्नतेनद्रोहानर्हाय [illegible] त्वमुक्तं पित्रा

सउत्तमश्लोकपदारविंदयोर्निषेवयाऽकिंचनसंगलब्धया तन्वन्परांनिर्वृतिमात्मनोमुहुर्दुःसंगदीनस्यमनःशमंव्यधात्
४४ तस्मिन्महाभागवतेमहाभागेमहात्मनि हिरण्यकशिपूराजन्नकरोदघमात्मजे ४५ युधिष्ठिरउ० देवर्षएतदि
५३ च्छामोवेदितुंतवसुव्रत यदात्मजायशुद्धायपिताऽदात्साधवेह्यघं ४६ पुत्रान्विप्रतिकूलान्स्वान्पितरःपुत्रवत्सलाः उ
पालभंतेशिक्षार्थंनैवाघमपरोयथा किमुतानुवशान्साधूंस्तादृशान्गुरुदेवतान् ४७ एतत्कौतूहलंब्रह्मन्नस्मा
कंविधमप्रभो पितुःपुत्रायविद्वेषोमरणायप्रयोजितः ४८ इतिश्रीमद्भागवतेसप्तमस्कंधेचतुर्थोध्यायः ४ ॥

नद्रोग्धृत्वानर्हत्वं अघंद्रोहमपाचक्रेइत्येतदुक्तविशेषणलब्धार्थमेवविशदयति ४६ पुत्रानिति प्रतिकूलानपिपुत्रान्विषयभूतेषुस्वपुत्रवत्सलाःपि
तरःशिक्षार्थंकेवलमुपालभंतेआक्षिपंति अपरोयथाशत्रुवद्द्वेषोहंतैवकुर्वंतिप्रतिकूलानपिपुत्रान्केवलंशिक्षार्थमुपालभंतेनतुतेभ्योद्रुह्यंति
किंपुनरनुकूलान्साधून्गुरुःपितैवदेवतायेषांतानुपालभंतेनततेभ्योद्रुह्यंतीतिभावः ४७ अतोहिब्रह्मन्नस्माकमेतत्कौतूहलंत्वंतत्वज्ञःकौतू
हलंविधमापनयहिप्रभोपुत्रायपितुर्द्वेषःसमरणायपितुर्मरणायप्रयोजितःप्रयोजकोभवदितियदेतदस्माकंकौतूहलमित्यन्वयः पुत्रविषय
केद्वेषःस्वस्यैवमरणप्रयोजकःकथमभूदित्येवंविधमस्माकंकौतूहलंविधमेत्यर्थः ४८ इतिश्रीमद्भागवतेसप्तमस्कंधेचतुर्थोध्यायः ४ श्री

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स. भो. टी. वी. २१

एवंस्वपरविभागहेतुभूतदेहात्मभ्रमादेर्भगवन्मायाहेतुकत्वकथनेनतच्छरणात्तन्निवृत्तिकथनेनचभगवदेकशरणत्वंतन्निवर्तकंसंचोक्तं अथज्ञानप्र
दातृत्वमपितस्यैवेत्याह सहेति सउक्तविधएषआत्मा ... परमात्मास्वपरेत्यबुद्धिःस्वपरइतिबुद्धिरहितःसर्वात्मत्वात्तयासर्वत्रसमत्वादित्यर्थः।
दुरन्वयंपुरुषान्तरेष्वघटमानमनुक्रमणंआपारोयस्यतादृशेनानिरूप्यते अनेनशाचंसर्वेसर्वशक्तित्वीलयाकरोतीत्यर्थः यस्यवर्त्मनिमार्गेयस्य
स्वविमर्शनेवेदवादिनोब्रह्मादयोपिमुह्यन्तिसएषएवपरमात्मामममतिंबुद्धिंभिनत्तीत्यर्थः स्वपरेत्यबुद्धिरित्यनेनतदेवात्मसुरासुरविभागमन्तरेणसु
रैर्ज्ञानप्रदत्वमुक्तं दुरन्वयानुक्रमणइत्यनेनसर्वशक्तित्वैवैषम्यादिराहित्यंचोक्तं स्वपरेत्यबुद्धिभिरितितत्तीयंतमपिपाठांतरंतत्रसःपरइतिन।
विद्यतेबुद्धिर्येषांतैःस्वपरविभागात्मकविविवकरहितैरित्यर्थः तादृशैर्दुरन्वयानुक्रमणः अनितरसाधारणव्यापारोनिरूप्यतेज्ञायतइत्यर्थः तत्र

सएषआत्मास्वपरेत्यबुद्धिर्दुरन्वयानुक्रमणोनिरूप्यते मुह्यंतियद्वर्त्मनिवेदवादिनोब्रह्मादयोह्येषभिनत्तिमेमतिं।
।२३ यथाभ्रमत्ययोब्रह्मन्स्वयमाकर्षसंनिधौ तथामेभिद्यतेचेतश्चक्रपाणेर्यदृच्छया २४ नारदउवाच एता
वद्ब्राह्मणायोक्त्वाविरराममहामतिः तंनिर्भर्त्स्याथकुपितःसदीनोराजसेवकः २५ श्रीरामायनमःश्रीः॥

सात्मनिवृत्तदेहात्माभिमानादिभिर्ज्ञानिभिर्ज्ञानप्रदत्वेनपरमात्माज्ञायतइत्यर्थः २३ एवंज्ञानप्रदत्वमुक्त्वाथतस्यैवतत्प्रदानेनस्वस्यप्र
त्वकित्वमाह यथेति आकर्षसंनिधौअयस्कांतसंनिधानेयथालोहंस्वयमेवयथाभ्रमतिआम्यतिचंचलंभवतीत्यर्थः तथाममचेतो।
पिचक्रपाणेर्यस्यतस्यहरेःसंनिधौयदृच्छयाहेत्वंतरनिरपेक्षंभिद्यतेतत्रसारायततस्मान्निआदिवममैवेविधबुद्धिवृत्तिरभूदित्यर्थः अने
नबुद्धिभेदःपरकृतउत्ताहोनेतिस्वतोभवदितिप्रश्नस्योत्तरमुक्तंभवति २४ एवमुक्तोगुरुराहेत्याहत्रिभिः एतावदिति ब्राह्मणान्
दैत्ययाजकान्अप्येवंस्वाभावदेवोक्त्वामहामतिःप्रह्लादःविरराम तूष्णीबभूव ततोदीनःउपायांतरेणसंतंस्ववशीकर्तुमशक्यःगुरुस्तं
निर्भर्त्स्यकुपितःसन्राजसेवकउवाचेतिशेषः २५ श्रीगुरुचरणकमलेभ्योनमः श्रीगणेशायनमः श्रीयेनमः श्रीरस्तु। राम २१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मूलं गुरुगेहे प्रतिबद्धेन विलोमनैर्द्विजातिभिः प्रीतिलोभेन यथा बालः शिष्यो ते विपरीतबुद्धिः क्रियते सोऽस्य बालस्य बुद्धिर्यथा नीयते तत् तथा सम्यग्विचार्यतां । वधार्यतां ।
इत्यर्थः ७ ततो दैत्ययाजका दैत्यपुरोहिताः स्वगृहं प्रति देत्यमदेरानीतं प्रपितं प्रह्लादं प्रशस्य प्रस्तुतसामोक्तिभिः शृण्वाम श्लक्ष्णया वाचा समपृच्छंत ८ ।
प्रश्नमेवाह वत्सेति द्वाभ्यां हे वत्स प्रह्लाद ते तव भद्रमस्तु अनृतं ताडयाम इति भावः सत्यं यथार्थं कथय कथय मा मृषा कथय किं कथयेम यत्तत्राह बालान
तिक्रम्य सर्वान्बालकान्विहाय त्वं तस्यैव बुद्धिविपर्यासः कुतः केन हेतुना किमर्थं बुद्धिविपर्यासः परैर्विसृष्टपक्षपातिभिः कृत उताहो स्वत एव
१५ तवाभवदिति दैत्यकुलनंदन त्वं तु न्यूनं श्रोतुकामानामस्माकं भण्यतां कथ्यतामिति ९ एवमुक्तमाह प्रह्लादः पर इति त्रिभिः परः स्वं बुद्धिभेदः परकृतस्त्वत्तस्मा
भाविक इति तत्र तीमेस्वपरविभागं देहात्माभिमानरूपाज्ञानमलं कं भगवन्मायामोहितानामिति निर्देतुं तावद्देहात्माभिमानं मोहनिमित्त विचित्रमायाशक्तिं ५८

सम्यग्विचार्यतां बालो गुरुगेहे द्विजातिभिः विज्ञप्तैः प्रतिबद्धेन निर्मितैतस्य धीर्यथा ७ गृहमानीतमाहूय प्रह्लादं दैत्ययाज
काः प्रशस्य श्लक्ष्णया वाचा समपृच्छंत सामभिः ८ वत्स प्रह्लाद भद्रं ते सत्यं कथय मा मृषा बालानति कुत
स्तुभ्यमेष बुद्धिविपर्ययः ९ बुद्धिभेदः परकृत उताहो ते स्वतोऽभवत् भण्यतां श्रोतुकामानां गुरूणां कुलनंदन १० प्र
ह्लाद उवाच परः स्वश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः विमोहितधियां दृष्टस्तस्मै भगवते नमः ११ स यदानुव्रतः पुंसां
पशुबुद्धिर्विभिद्यते अन्य एष तथान्योऽहमिति भेदगतासती १२ श्रीहनुमते विजयतेतराम् श्रीरामाय नमः श्रीः

कं भगवंतं नमस्करोति पर इति यस्य मायया परः स्वश्चेत्यसद्ग्राहः पर इति स्वमिति असद्ग्राहः देहात्मबुद्धिः पुंसां कृतः ।
पादितः विमोहितधियां भगवन्मायया मोहिता धीर्येषां तेषां भगवतां भेद एव नमनमेतिभावः तस्मै पूर्णाय कृष्णायनमः विमोहितधियां दृष्टनेन देवीभिषा
गुणमयी मम माया दुरत्ययेति भगवदुक्तेः ईश्वरो भगवदप्रपन्नानां भगवतो मायया मोहितान्त्रत तस्य नाथमेतिस्थितं ११ तदेवमंजपनसद्ग्राहं निरतिस
भगवान्यदा पुंसि रनुव्रतः आश्रितः तदा पुंसां पशुबुद्धिर्देहात्माभिमानरूपा बुद्धिर्विभिद्यते निरस्यते कासौ पशुबुद्धिः यान्य एष तथान्योऽहमित्येवं
पासर्वत्र शरीरिषु ज्ञानैकाकारतया परमात्मशरीरतया चावस्थितानां तन्नो विस्मरतां स्वपरइत्येकरूपा भेदगता श्रुतात्मभक्तदेवासुरमनु
ष्यादिशरीरगतां तस्यासतीं दुष्टां अनर्थावहां सैवापशुबुद्धिरित्यर्थः १२ श्रीमते रामानुजाय नमः श्रीसरस्वत्यै नमः श्रीरस्तु श्रीः ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स. भा. टी. वी. २२

यदुक्तः मधीतमधीतं किं विदन्स्वतामिति तत्राह श्रवणमिति यदुक्तं द्वैवनंगेतापह्वरिमाश्रये तेतितदेवाश्रपणं विहृणोति श्रवणमिति द्वाभ्यां पुं।
सांश्रवणादीनि नवलक्षणानि यस्याः सा भक्तिश्चेन्नवलक्षण भक्तिप्रतिपादकशास्त्रमधीतं चेत्तदेव स्वधीतमुत्तमं मन्येनमन्भुनायोः सकाशादधीतं मनुरुरुभिनोपि।
तं न्वितिभावः स्वधीतप्रश्नोत्तरनिगमनं उत्तममधीतमिति श्रवणमित्यादि तु पर्वोक्ताश्रपणविवरणपरं भगवत्यद्धा क्रियेतेत्वेदधीतविद्याप्रतिपाद्यानवलक्षणाभक्तिर्नि।
ष्कपटभावेन भगवति क्रियते इतिपक्षे तावसा भक्तिर्विष्णावर्पितेति पश्चते तत्तु समंमन्ये नेकवलं नवलक्षणभक्तिप्रतिपादकशास्त्राध्ययनमात्रमेवोत्तमपि तु तदर्था।
नुष्ठानमनुष्ठितस्य विष्णौ समर्पणं च स एवोत्तमं मन्ये केवलाध्ययनमात्रस्य व्यर्थत्वादितिभावः अर्पिताविष्णाविति नैनभक्तेरनन्यप्रयोजनत्वं नकथ्येनोक्ता नवविधाः
श्रवणं तद्वत्स्वरूपगुणविभूतिश्रवणं कीर्तनं नामोच्चारणादि स्मरणं तद्वत्पादिविषयकमेव पादसेवनार्चनवंदनदास्यसख्यानितु तदीयपर्यन्तानि वंदनं।
नमस्कारः पादसेवनं पादयोः संवाहनं तच्चार्चाविग्रहतदीयपादयोश्चेतिवेदितव्यं परव्यूहविभवादिरूपेणात्यन्तत्यादसेवासंभवात् यद्वा भगवद्विषयमा श्रु

प्रह्राद उ० श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं २२ इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवल
क्षणा क्रियेत भगवत्यद्धा तन्मन्येऽधीतमुत्तमं २३ नारद उवाच निशम्यैतत्सुतवचो हिरण्यकशिपुस्तदा गुरुपुत्रमुवाचेदं
रुषा प्रस्फुरिताधरः २४ श्रीरामानुजो विजयतेतराम् श्रीरामाय नमः श्रीगुरुचरणकमलेभ्यो नमः श्रियै नमः श्रीः

नसिकं तदीयविषयेतु कपिकीविवर्षितं आत्मनिवेदनमिमित्यात्मानं पुंजीतेति श्रुतस्तरोत्पातश्चेषत्वानुसंधाने यद्यपि भक्तिर्नमिध्यानोपासनादिशब्दवाच्याहरहरभ्या
साधेयातिशयाश्राप्रयाणादनुवर्तमाना विवेकादिसाधनसप्तकानुगृहीतातैलधारावदविच्छिन्नस्मृतिसंतानात्मिका प्रीतिरूपापन्ना प्रत्यक्षतापन्नाभुवानुस्मृतिर्न तु श्र
वणादिरूपेण नवलक्षणा च यथोक्तविधाया भक्तेरेव कर्मज्ञानयोगादिवच्छ्रमदमादिवच्च श्रवणादीन्यप्यविलंबेन निर्वर्तकान्युच्यंते यद्वा लक्ष्यंते यैरिति ल
क्षणानि चिरस्थानि तापकानि भक्तियोगपरिपाकावस्थाज्ञापकानीति यावत् उक्तविधभक्तियोगनिष्ठेन रागत एव श्रवणादीनि क्रियंते लोके हि यद्वस्तु विषयाप्रीति
स्तद्विषयकश्रवणादीनि स्वतः एव प्राप्तानीति न तत्प्रयत्नेन भवितव्यं ततः श्रवणादीनि प्रीत्यात्मकभक्तियोगकारितावस्थाविशेषलक्षणानि तन्निष्पत्तिसूचकानीति
तात्पर्यं स्वं प्रीतिकारितश्रवणादिपर्यंतभक्तियोगानुष्ठानमेव वचनंगेतापह्वरिमाश्रये तस्युक्ताश्रपणमित्युक्तं भवति २३ एतदेवंविधं सुतस्य वचो निशम्या
कर्ण्य तदा हिरण्यकशिपुः रुषा प्रस्फुरितः कंपमानोऽधरोष्ठो यस्य तादृशः इदं वक्ष्यमाणं गुरुपुत्रं प्रत्युवाच २४ श्रीहनुमतो विजयतेतराम् श्रीरस्तु।

राम २२

७०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तदेवाह आनीयतामिति द्वाभ्यां अरे इति हेराजन्भेदस्यर्थः वेत्रं प्रहरणसाधनपसि विद्येयमानीयतामस्माकमयशोरूपकीर्तिकरोतीत्ययशस्करः।
स्यात्मस्य कुलस्य दैत्यकुलस्यांगार इवांगारक नाशकस्तस्य दुर्बुद्धेरि तः परं स शिक्षणोपायश्चतुर्थः स्वस्यादंड एवोपायः कर्तव्योनसामादिरित्यर्थः चतुर्थो
स्यादितो वध इति पाठे दण्डः शास्त्रे उक्तः चतुर्थोदंडोपाय एवास्य दमः दमनसाधनमित्यर्थः १५ कुलनाशकमेवमनक्ति दैतेयाः स्व चंदनद्रुमाः तेषां वने
ऽपंकं टकद्रुमनुरक्तोजातः तन्मूलैर्येतेषां दैत्यपंचदशवनानां यानिमूलानि तेषां उन्मूलने भेदेन परशोः परशुरूपस्यानीपस्य विसारयमर्भकः बालापितः नाल
वस्ववरितवान् यथापरशोः छेदकत्वे कदुराद्विदुमनिर्मितोदंडः सहकारीतं विनाछेदनासंभवात्तथायं विज्ञोदैत्यमस्य छेतुः सहकारीजातइत्यर्थः १६ इ
तीत्यंवस्तज्जैनादिभिर्नानोपायैः भीषयंतं त्रिवर्गप्रतिपादनं धर्मार्थकामप्रतिपादकं शास्त्रं ग्राहयामास १७ ततोगुरुरेतं प्रह्लादं ज्ञातंज्ञेयानामुपायानां सामादी

गुरुरू॰ आनीयतामरे वेत्रमस्माकमयशस्करः कुलांगारस्य दुर्बुद्धेश्चतुर्थोस्योदितो दमः १५ दैतेयचंदनवनेजातोयं कंटकद्रुमः
तन्मूलोन्मूलपरशोर्विष्णोर्नालायितोऽर्भकः १६ नारद उ॰ इति तं विविधोपायैर्भीषयंस्तर्जनादिभिः प्रह्लादं ग्राहयामासत्रिवर्ग
स्योपपादनं १७ ततस्तं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयं दैत्येंद्रं दर्शयामास मातृमृष्टमलंकृतं १८ पादयोः पतितं बालं प्रतिनंद्या
शिषासुरः परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिं १९ आरोप्यांकमवघ्राय मूर्धन्यश्रुकलांबुभिः आसिंचन्विकसद्वक्त्रमिदमाहसुतं
। २० हिरण्यकशिपु॰ प्रह्लादानूच्यतां तात स्वधीतं किंचिदुत्तमं कालेनैतावतायुष्मन्यदशिक्षद्गुरोर्भवान् २१ श्रीपैनमः

नोऽचतुष्टयं यस्य तादृशं ज्ञात्वा बालस्य मात्रा मृष्टं कृतस्नानादिकं तमलंकृतं च प्रह्लादं दैत्येंद्रं प्रति दर्शयामासोपितुस्सन्निधौ प्रापयामासेत्यर्थः १८ ततः पा
दयोः प्रणमंतं बालमाशिषा आशीःपूर्वकं प्रतिनंद्यासुरो हिरण्यकशिपुः दोर्भ्यां भुजाभ्यां चिरमस्य शिशुं परिष्वज्य परमां निर्वृतिमानंदं प्राप्तवान् १९
तत उत्संगे निधाय मूर्ध्न्याघ्राय चाश्रुकलांबुभिः हर्षाश्रुजलबिंदुभिरासिंचन् विकसद्वदनं यस्य तादृशं सुतं प्रह्लादमिदं वक्ष्यमाणमाह।
पुधिष्ठिरेति पाठे संबोधनं २० तदेवाह प्रह्लादेति हे आयुष्मन्तात पुत्र प्रह्लाद भवानेतावता कालेन गुरोः सकाशाद्यद्गुपशिक्षत्
स्वधीतं स्वध्यायं किंचिदुत्तमं स्वधीतं सम्यगादरेण गृहीतं तत्तेत्तात प्रह्लादानूच्यतां संस्कृतानुक्रमेण पठ्यतां २१ श्रीगणेशायनमः श्री

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भा॰ टी॰ स॰ ७ २३

स्वार्थस्य गतिः स्वार्थगतिस्तं स्वस्य पुरुषार्थभूतं तदुपायभूतं च विष्णुं दुरन्तजनानविदुः तत्र हेतुर्बहिस्तान्विशिनष्टि बहिः शब्दादिविषयेष्वर्थमानिनः पुरुषार्थाभिमा।
निनो नतेषां केवलं पनीयमानाः अंधापपादेषानं नविदुः किंतु स्वयमेव पतंतितथाहितेषां शब्दतं मां वेदलक्षणायां स्थूलरज्ज्वा उरुदाम्नि वर्णाश्रमधर्मादिरूपनाम्नाविधकं
दृष्टत्वेन बद्धाभवंति वेद्यदुक्तं केवलकाम्यकर्मासक्तैः अतोऽभिता स्तत्रैवासक्ताः पुनः पुनः संसरंतो दुःखमेव प्राप्नुवंतिन तु निरस्तैश्वर्यमहिमशालिनो भगव
तः निरतिशयपुरुषार्थरूपमेघिं नस्पृशंतिनवि शेषयीकरोति नर्दघ्रिस्पर्शनेविशिनष्टि यदर्थः यस्यारुक्रमस्यांघ्रिस्पर्शस्यार्थः प्रयोजनं फलमनर्थापग
मो दुःखनिरासरूपः किंपरयैतं नस्पृशंतीतित्राह यावदिति किंचनानामनन्यप्रयोजनानां महाभागवतानां पादरजः सेवां न वृणीतन वृणुयात्तावदेवंन कु
र्यात्तावन्न स्पृशतीत्यर्थः ममभ्रातृगर्भावस्थानदशायां महतां महीयसः नारदस्यानुग्रहादियं बुद्धिरुरुक्रमांघ्रिविषयाभूदिति गूढोऽभिप्रायः ३२ इतीत्यमुक्त्वाथ

नते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः अंधा यथांधैरुपनीयमानावाचीशतंत्र्यामुरुदाम्नि बद्धाः ३१ नैषां मति।
स्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमो यदर्थः महीयसां पादरजोऽभिषेकं निष्किंचनानां न वृणीत यावत् ३२ नारद उ॰ इत्युक्त्वो
परतं पुत्रं हिरण्यकशिपू रुषा अंधीकृतात्मा स्वोत्संगान्निरस्यत महीतले ३३ आहामर्षरुषाविष्टः कषायीभूतलोचनः हिर
ण्यकशिपुरु॰ वध्यतामाश्वयं वध्यो निःसार्यतां नैर्ऋताः ३३ अयं मे भ्रातृहा सोऽयं हित्वा स्वान्सुहृदोऽधमः पितृव्यहंतुर्यः पा
दौ विष्णोर्दासवदर्चति ३४ एवं तूष्णीमासीनं पुत्रं रुषा क्रोधेनांधीकृत आत्मा विवेको यस्य स हिरण्यकशिपुः स्वस्योत्संगान्महीतले निरस्यत पा॰ रामराम
१ न पितृव्यं स्व सुहृदरणान्वयः निराकृतदितिपाठे न्यपातयदित्यर्थः ३२ रुषा विशेषाय तः अतएव कषायीभूते अताम्रे लोचने यस्य स आह उक्तवांश्च तदेवाह
वध्यतामिति हे नैर्ऋताः इतस्तं निःसारयत बहिर्गमयत अयं बालोऽवध्योऽपि वध्यार्हः अतो वध्यतामाश्वित्यन्वयः ३३ वधे हेतुः यतोऽयं मे मम भ्रातृहंतृकृतः
सोयमधमः बालः स्वान्स्वकीयान्सुहृदोस्मानहित्वा पितृव्यस्य पितृभ्रातुर्हिरण्याक्षस्य हंतुर्विष्णोः पादौ चरणौ दासवदर्चति तत्पक्षपातीत्यर्थः अतः सए राम
वायं इत्यन्वयः हित्वा सुहृत्सुहृद इति पाठे यं मे भ्रातृहकृतः यस्मादधमोऽयं सुहृत्प्रियान्स्वप्राणान्हित्वा विष्णोः सेवसमर्पितदासवल्लालयदर्चतीति अतो २३
यमेव प्रसक्तो मे भ्रातृहेत्यर्थः ३४ त्रुटि + शयानेद रूपपुरुषार्थलक्षणं भगवंतं प्राप्नुवंतीत्यर्थः ३१ तदेवव्यनक्ति नैषि यथाप्रत्यक्तविधानो विषयास
क्तचित्तानां मतिर्द्रुतुरुक्रमस्यनिरति + त्रुटि ३ श्रीरामश्रीराम श्रीहनुमते विजैयते तासरम श्रीगणेशायनमः श्रीः।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तत्राह हे ब्रह्मबंधो ब्राह्मणाभास किमेतत्ते त्वया कृतमिति शेषः श्रुतीवानुचितमेव कृतमित्यर्थः किं तत् मामनादृत्य विपक्षं शत्रुपक्षमाश्रयता असत्वासता ऽसि
तत्कारिणा त्वया हे दुर्मते असारं बालो ग्राहित इति सत्तत्र २५ मित्ररूपेण वर्तमानस्यापि तव विरोधाचरणं नासंभावितमित्याह सतीति दुर्मैत्रा मित्रत्वेऽपि अंतः
वासाधवः छद्मवेषिणः कपटवेषधारिणो भवादृशा अपि हि लोके वर्तंते तेषामघं द्रोहादिकमुचितकाले उदेतीत्यर्थः २६ एवमुपालब्धः प्राह गुरुपुत्रः नेति नमत्पापा
त्तेनापि परेण किंतु केवलं निसर्गत एव पुत्रस्तव वदत्येवं हे इंद्रशत्रो तव अत्र मत्प्रणीतं न परप्रणीतं विनयमस्तीति भावः न मत्परप्रणीतं किं तु नस्याभावोदयं मतिरस्तत्राह नैसर्गि
कीति हे राजन् अस्य त्वत्पुत्रस्येयं मतिर्नैसर्गिकी स्वाभाविकी न तु परैः कृतेत्यर्थः अतो मन्युं क्रोधं नियच्छ उपसंहर नोऽस्मभ्यं कलुषितं दुःखमित्यर्थः मा स्म अदाः नेदृशी
त्यर्थः मा अस्मान् अपराधिनः कदाचन कलंकिनः अपि पापान्तरं तत्र कदनाः असनादिनाः ल नोनः मन्युं मदिच्छयं क्रोधं नियच्छेत्यर्थः ३० इत्यं गुरुणा प्रत्युक्तो दैत्यः सुतमाह स आह दैत्यर्षिः।

देत्यराजउ॰ ब्रह्मबंधो किमेतत्ते विपक्षं श्रयतासता असारं ग्राहितो बालो मामनादृत्य दुर्मते २७ संति ह्यसाधवो लोके दुर्मैत्रा
श्छद्मवेषिणः तेषामुदेत्यघं काले रोगः पातकिनामिव २८ गुरुपुत्रउ॰ न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेंद्रश
त्रो नैसर्गिकीयं मतिरस्य राजन्नियच्छ मन्युं कददाः स्म मा नः २९ नारदउ॰ गुरुणैवं प्रतिप्रोक्तो भूय आहासुरः सुतं न चेद्गुरु
मुखीयं ते कुतोऽभद्रासती मति ३० प्रह्लादउवाच मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानां अदांतगो
भिर्विशतां तमिस्रं पुनः पुनश्चर्वितचर्वणानां ३१ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम।

गुरुणेति तदेवाह नचेदिति हे अभद्र दुष्ट इयं बुद्धिर्गुरुमुखी गुरूपदेशजाता न चेत्तर्हि कुतस्तव असती मतिरभूत् ३० एवमुक्तः प्राह प्रह्लादः त्रिभिः तत्र प्रत्यक्षं
कुतस्तवेयं मतिरिति तत्र अस्मदुपदेशग्रहस्यैव दर्शी मतिः हेतुरिति वक्तुं तावन्मद्विषये तु गृहव्रतानां भवादृशामीदृशी मतिर्दुर्लभेत्याह मतिरिति गार्हस्थ्यरतानां
स्वतः परतो वा मिथो अन्योन्यस्माद्वा कृष्णे मतिर्न भवति चालिकानामिव पद्येत लब्धे हेतुर्वदन् गृहव्रतानिति नहि अदांतगोभिरिति अदांतैरजितैर्गोभिरिंद्रि
यैर्हेतुभिस्तमिस्रं निरयं संसारं पुनः पुनर्विशतां चर्वितचर्वणं भुक्तं तस्यैव पुनश्चर्वणं उपभोगो येषां सर्वदेवैर्भुक्तिमेव विषयं भुंजानानां पूर्वं वि
भुक्तान वनितादीन्विषयान्पुनरपरे पुनर्भुंजानानामिति वा एवं विषयासक्तचित्तानां त्वादृशां कृष्णे मतिर्दुर्लभा इत्युक्तं यद्यपि वि
तच्चर्वणाप्रभावः तन्मुख्यानां इति ३१ साधुकृष्णमतिः स्वश्रेयो विस्वयं न जानातीत्याह श्रीकृष्णमतो विजयतेतराम् श्रीरामायनमः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ २५

स्वंमलघातादिन्नुमरणोद्योगरूपेप्रयासेःपहितम्येसतिदैवेंद्रादिरायकीव्रातुःपरिव्रांकितःकिमहींयंमलघातादिभिःरपिनाहन्यतकिमस्मादेचममसन्तुभोविष्पदीया
व्रांकितःरेयुधिष्ठिरनिर्वंधेनतस्पव्रलादस्पवधोपायंचक्रे ४॰ विविधोपायानिवद्रपंचयंत्रैरप्यहन्नुत्वमाह दिग्गजैरिति दिग्गजाक्रमणैःदंदस्कैःकैःसर्पस्दंदं
त्रैनेरभिचारैमारणम्परवपातैनेगिरिशृंगेभ्योधःयातैर्मायाभिरकस्माद्वज्ञनिपातनादिभिःसंनिरोधैर्निवरंभ्रापिधानैर्गरदानैर्विभग्नेपोभेःस्नोजनैस्तपवासैः ४१
हिमादिसुपातनैःपर्वताक्रमणैःपर्वतानांतदुपरिनिक्षेपैःएवंविधैरुपायैरसुरैःअयोप्यकर्तुंमिर्यदानिरपराधंसुतंहंतुंनाशक्तो सदानतकर्तुंतत्कर्तुंनाम्प
पघतउपायांतरंनलेभेप्रसुतदीर्घतमांचिंतांप्राप्तः ४२ चिंतामेवप्रपंचयति स्पष्टवाहीमेमपाषेहसाधुपयाभवतितथोक्तःतथावधोपायाश्वनिर्मिताः।
कारिताश्चस्वदैर्मैरभिचारादिभिस्तैस्तैद्रोहैःमलघातादिभिश्चसुतःअविहतःस्वेनैवतेजसामहात्म्येनत्त्क्तोपापेभ्योविदूरस्ववर्तमानःबालोप्ययमजस्र

प्रयासेऽपहतेतस्मिन्दैत्येंद्रःपरिशंकितः चकारतद्वधोपायान्निर्बंधेनयुधिष्ठिर ४० दिग्गजैर्दन्दशूकेंद्रैरभिचारावपातनैः मायाभिः
संनिरोधैश्चगरदानैरभोजनैः ४१ हिमवाय्वग्निसलिलैःपर्वताक्रमणैरपि नशशाकयदाहंतुमपापमसुरःसुतं चिंतांदीर्घतमांप्राप्तस्तत्क
र्तुंनाभ्यपद्यत ४२ हि स्प शि रु एषमेबहुसाधूक्तोवधोपायाश्चनिर्मिताः तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तःस्वेनैवतेजसा ४३ वर्तमानोविदू
रेवैबालोप्यजडधीरयं नविस्मरतिमेनार्यंशुनःशेफइवप्रभुः ४४ अप्रमेयानुभावोयमकुतश्चिद्भयोऽमरः नूनमेतद्विरोधेनमृत्युर्मेभवितानवा
४५ ना द वा॰ इतितंचिंतयाकिंचिन्म्लानश्रियमधोमुखं शंडामर्कावौशनसौविविक्तइतिहोचतुः ४६ श्रीयेनमःश्रीः॥

निपुणाधीर्यस्पतादृशः मेममानार्यद्रोहंनविस्मरतिमुनःशेफइवेतियथाशुनःशेफाख्यःपितृभ्यांहरिश्चंद्रायविक्रीतःसन्तयोरपकारंविस्मरन्तद्विप
क्षविश्वामित्रमाश्रित्यगोत्रांतरमापन्नस्तद्वदयंचास्वभावापरित्यागेदृष्टांतःशुनःशेफःपुत्रइवेति प्रभुर्जितेंद्रियः ४४ अप्रमेयोऽपरिमेयोऽनुभावोयस्य
नकुतश्चिद्भयंयस्मातस्वामरःमरणरहितः एतस्यविरोधेनहेतुनानूनंमेममैवमृत्युर्भविष्यतिनवाभविता एतद्विरोधेनममम्रुत्युरभावेऽवंतर
नं४ मेभविष्यतीत्यर्थः ४५ इतीत्यंतंचिंतयापुत्रविषयकचिंतयाम्लानश्रियंनिस्तेजस्कंकिंचिदधःकृतमुखंतंहिरण्यकशिपुमौशनसौशुक्रस्यपुत्रौशंडामर्कौरहसिनिर्जनेदेशेतस्यप्रतिष्ठाभंगादितिभावः इतिवक्ष्यमाणमूचतुः ४६ तदेवाह जितमिति श्रीरामायनमः राम २५
श्रीरामश्रीरामश्रीराम श्रीरामश्रीरामश्रीराम श्रीरामश्रीरामश्रीराम श्रीरामश्रीरामश्रीराम श्रीरामश्रीरामश्रीरामश्री श्रीयेनमः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

साधु। अपि त्वसाध्वेव करिष्यति ॥

सदर्यंतेन विसादप्यसावसमंजसा नम्रक्रूरो ऽसाधु करिष्यति किं नु करिष्यते त्युत्प्रेक्षयामि त्वं वित्तवारिति भावः पंचमो पंचजनः पंचवर्षवयस्कोऽवसन्दुःखम् ।
स्मृत्तु महाकं मातापित्रोः सौहृदमजहत्सासीत् ३५ ननु तवायं पुत्रः कथं कथमत्राह परोपीति शत्रुपक्षप्रभवोपि पथ्योपथं दृष्टवाहितकारी चेत्तर्हि सो
ऽपत्यं पुत्रः स्वदेहजन्मापि व्याधिवदहितः दुःखकृच्चेत्तर्हि आमयवत्परित्याज्यः आरण्यमप्यत्यर्थं कचचिद्यस्माद्धितंकरस्वरणादिकमपि सर्व
देशभ्रमणादिदूषितं सदाला ऽहितं दुःखकृच्चेत्तर्हि तत्संछिद्योद्वयं पन्नदुःशंगस्येव विवर्जनीयं स्यादित्याकूतं म त्वयि शिष्टमंगेसु सुखं जीवति ३६ अत्रैवायं सुहृल्लिं
गधरः पुत्रवेषधारी शत्रुर्यथा दुष्टमिति प्रथमुने श्रुत्वतदुक्तमानः सर्वे गर्वत्वाधिमिश्रितसंभोजननादिमरूपोपि हंतव्यः ३७ स्वयंस्वामिनी दैत्यैः स्वामिनः तेन्द्रै
ताः शूलपाणयः तीक्ष्णदंष्ट्रा येषां करालान्यास्यानि येषां ताम्रमाणि श्मश्रूणि शिरोरुहाणि च येषां ताम्रसाः ३८ भैरवा भयंकरान्नादान्वदंतः कुर्वंतः विनिधोऽभी

विरूपो विसाध्वसौ किं नु करिष्यत्यसमंजसः सौहृदं तु त्यजे पित्रोरहाद्यः पंचहायनः ३५ परोप्यपत्यं हितकृद्यथौषधवदेहजो।
व्याधिवत्सुतोऽहितः छिंद्यात्तदंगं यद्देहालेनाहितं त्रीणं सुखं जीवति यद्विवर्जनात् ३६ सर्वैरुपायैर्हंतव्यः संभोजशयनासनैः ॥
सुहृल्लिंगधरः शत्रुर्मुनेर्दुष्टमिवेंद्रियं ३७ नारदत्ववाच्यं नेर्दुष्टास्तस्मादिशाभर्तृवेष्टशूलपाणयः तिग्मदंष्ट्राः करालास्या
स्ताम्रश्मश्रुशिरोरुहाः ३८ नदंतो भैरवान्नादान्छिंधि भिंधीति वादिनः आसीनं चाहनन्शूलैः प्रह्लादं सर्वमर्मसु ३९ परे
ब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि युक्तात्मन्यफला आसन्नपुण्यस्येव सत्क्रियाः ४०

तिच वदंतः अपविष्टं प्रह्लादं सर्वेषु म
२१ र्मस्थानेषु शूलैररनैर्हतवंतः ३९ अतिर्दुष्टे चेतनाचेतनसजातीयत्वेनानिर्देश्ये सुमहाकीर्तिरखिलात्मनि हंतव्यापांतरालनिपुणपादुर्यपरेब्रह्मणि
युक्तात्मनि युक्तमात्मा मनो यस्य तस्मिन्प्रह्लादे दैत्यैः कृताः अपि शूलघातादयः मारणोपायाः अफला व्यर्था बभूवुः मरणहेतवो दुःखहेतवश्च न बभूवुरि।
सर्वः यथा अपुण्यस्य पापरतस्य कृताः अपि सत्क्रियाः संध्योपासनादयो अफलास्तद्वत् फलाहेतुगर्भविशेषणं अखिलात्मनि युक्तात्मनीति अयं भावः क
स्मिन्देहसंबंधप्रयुक्तसुखदुःखभोक्तृत्वतदनुगुणपुण्यपापकार्यत्वानुगुणं जीवपर्यंतेन देहेन्द्रियादिशरणरूपमखिलात्मत्वमत्र विवक्षितं तत्रहंतृत्वाम
तयाहंतव्यदुःखजननानुगुणव्यापारानुगुणं नियमयन्नपि पुनर्हंतुस्य हंतृव्यापारजन्यदुःखाननुभवानुगुणतया नियमयतीति कथमेकस्यैवं विधं परस
रविरुद्धं नियमनं इति शंकां निराचिकीर्षया निर्देश्य इत्युक्तं लोकविलक्षणविविधविचित्रशक्तेरीदृशं नियंतृत्वमुपपन्नमिति अभिप्रायः ४० अथोराम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ २५

सर्वदैत्यकुमारैः पर्युपासितो महाभागवतः प्रल्हादस्तेभ्यः करुणयानंतस्थिरफलब्रह्मानंदानुभवसाधनभागवतधर्मान्नुपदिदिक्षुरुपदेक्ष्यमाणधर्मप्रतिष्ठापनाय तेषु वै
राग्यजननाय चैवैषयिकसुखानामस्थिरत्वं दुःखकर्भत्वमतएव हेयत्वमफलत्वमर्थत्वं च विविच्य सुलभत्वं मनुष्यजन्मनस्च भागवतधर्माचरणाहत्वं तत्रापि ति
रत्वेन वा सातत्ये च तदनुष्ठानस्य कर्तव्यतां चाह कौमार इति इह मनुष्यजन्मन्येव शास्त्रैः प्रतिपाद्यविभागः स्त्रीपुंसाः कौमारे वा लस्व एव तत्प्रभृत्येवेत्यर्थः भागवतान्
भगवत्संबंधिनः भगवत्प्राप्तिसाधनान् धर्मान् आचरेत् भगवच्छब्दस्यैतदर्थः फलश्रुत्यादिकाभ्यनुत्तानानुदर्शयत्यशंकाभ्युदयेते तथाहि पुराणेषु हरिः त्याक्षे परब्रह्म
णि शब्दिते मैत्रेय भगवच्छब्दः सर्वकारणकारणे संभर्तेति तथा भर्ता भकारोर्थद्वयान्वितः नेता गमयिता स्रष्टा गकारार्थस्तथा मुने ऐश्वर्यस्य समग्रस्य वीर्यस्य
यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा वसंति यत्र भूतानि भूतात्मन्यखिलात्मनि स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः ज्ञानशक्तिबलैश्वर्यवीर्यते
जांस्यशेषतः भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिरित्यादिना श्रीमत्पराशरोक्तप्रसवरसमुदायनिर्वचनात् गतास्संभर्तत्वं भर्तृत्वेन तत्त्वं गमयितृत्वं च सर्वा
धारकत्व सर्वभर्तृत्व नालेतृनिखिलनिखिलदोषत्वं बगुणैश्वर्यादिसंपन्नत्वं विवक्षिताः तत्र संभरणं नाम उपकरणसंविधानं तत्र प्रकृतिपुरुषकालानां कार्योत्पत्तियोग्यता
पादनरूपं भर्तृत्वं नित्।

प्रल्हाद उ॰ कौमार आचरेत्प्राज्ञो धर्मान्भागवतानिह दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदं १ श्रीराम श्रीराम

मयितत्त्वं स्थितिकर्तृत्वं पाधिकसामिलेनेतृत्वं गमयितृत्वं संगमयितृत्व।

रूपं संहर्तृत्वं स्तष्टृत्वं बालकमपि तत्त्वनत्वं संस्थितिकर्तृत्वं यत्र गुणवत्तापरा श्रीभगेषु संपत्वैराग्यं विरक्तिः सा च परिपूर्णत्वात् चारूपा सर्वं चानुस्थितेः तेषां प्राप्यस्य भगवतः।
सर्वविधत्वात्तत्प्राप्तेश्चेतिः प्रपत्तस्य तत्प्राप्तिसाधनभूता धर्माः परमपुरुषार्थार्थिभिरवश्यमनुष्ठेया स्ते च बाल्यादारभ्यैव कर्तव्या इत्यर्थः इहैवेतन्मनुष्यजन्मनस्त्वं
भगवद्धर्माचरणे यमुक्तत्वमन्यस्य तु तदननुगुणत्वं चाभिप्रेतं तेत्रापि पुरोवर्तिभिर्मर्त्यैरिह शब्द प्रयुक्तितो भवेत् तेन इहशब्देनाधुना वर्तमानमनुष्यजन्मान्यकभगवद्धर्मकर्तृ
व्यतामभिप्रेतान्जन्मन्यस्मिन्नपि मनुष्यजन्मनि तेषां कर्तुं शक्यत्वात्किं विशेषेणाधुनिकस्य जन्मनि कर्तव्यतोच्यते इत्यत आह दुर्लभं मानुषं जन्मेति विविधविचित्रालक
पुण्यपापालकर्मभिः देवतिर्यङ्मनुष्यस्थावरादिरूपेण संसरतो जीवस्य नियमेन प्रतिजन्म मानुषं जन्मेत्यविश्वासहेतोरभावात् दुर्लभं मानुषं जन्मस्वकृतपरिपक्वकर्मणा मनुष्यं
इति तत्रैव भगवद्धर्मानाचरेदिति भावः ननु किं विशेषेण कौमार एवाचरेदित्युच्यते यथेष्टं विषयभोगानंतरं चतुर्थवयसि तेषां कर्तुं शक्यत्वादित्यत आह तदप्यध्रुवमिति
तुर्थवयः पर्यंतजीवनस्यैवाविश्वसनीयत्वाभावात् कौमारादारभ्यैवाचरेदिति भावः ननु चिरकालसाध्यभगवद्धर्माः कथमस्थिरेण मानुष्यजन्मना निर्वर्तितव्याः कथं तरां निःश्रे
यसप्राप्तिरत आह अर्थदमिति यद्यप्यध्रुवं तथाप्यर्थदमित्यर्थः अयंभावः यद्यप्यध्रुवं तथापि चिरकालजीवननिमित्तकस्यापरम भगवद्धर्मविरोधिकर्मसजातस्य सति प

राम २५

तव भ्रुवोर्विजृम्भणेन चलनमात्रेण त्रस्ता भीता सर्वेपि लोकपाला यस्मिंस्तज्जगत्त्रयं त्वयैकेन सहायेन जितं एवं भूतस्य तव हे नाथ प्रभो चिंतनीयं न च क्ष्म।
हे न पश्यामः शिशूनां तु गुणदोषयोः पदं विषयो न भवतीत्यर्थः ४७ अत इमं बालं यावद्गुरुर्भार्गव आगमिष्यति तावद्वरुणस्य पा
शैः बद्ध्वा निधेहि कुरु भीतोयं यथा न पलायेत तथा निधेहीत्यर्थः ततः किं तत्राह तु वयसा आर्याणां सेवया चास्य बुद्धिर्भवेदिष्यति ४८ एवं गुरुपुत्रोक्तं तथेत्यनुज्ञा भा॰ ७
यं गृहस्थयोग्यं धर्ममब्रवीत् तदेवाह धर्मो हीति अस्य बालस्य धर्मो उपदेष्टव्य आः केन राज्ञां गृहमेधिनां ४९ एवमुक्तौ गुरुपुत्रौ तस्मै उपदिदिशतुरि ८५
त्याह नारदः धर्ममिति धर्मार्थकामरूपान् साधनानि नितरामसंतमनुपूर्वशः हे राजन् प्रश्रयेण विनयेनावनताय प्रह्लादाय चक्रतुः उपदिदिशतुः ५० तथापि

जितं त्वयैकेन जगत्त्रयं भ्रुवोर्विजृम्भणत्रस्तसमस्तधिष्ण्यपं न तस्य चिंत्यं तव नाथ चक्ष्महे न वै शिशूनां गुणदोषयोः पदं ४७ इमं तु पाशैर्वरुण।
स्य बद्ध्वा निधेहि भीतो न पलायते यथा बुद्धिश्च पुंसो वयसार्यसेवया यावद्गुरुर्भार्गव आगमिष्यति ४८ तथेति गुरुपुत्रोक्तमनुज्ञाये
दमब्रवीत् धर्मो ह्यस्योपदेष्टव्यो राज्ञां यो गृहमेधिनां ४९ धर्ममर्थं च कामं च नितरां चानुपूर्वशः प्रह्लादायोचतू राजन्प्रश्रितावनता
य च ५० यथा त्रिवर्गं गुरुभिरात्मने उपशिक्षितं न साधु मेने तच्छिक्षां द्वंद्वारामोपवर्णितां ५१ यदाचार्यः परावृत्तो गृहमेधीयकर्मसु व
यस्यैर्बालकैस्तत्र सोपहूतः कृतक्षणैः ५२ अथ तान् श्लक्ष्णया वाचा प्रत्याहूय महाबुधः उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव।
५३ ते तु तद्गौरवात्सर्वे त्यक्तक्रीडापरिच्छदाः बाला अदूषितधियो द्वंद्वारामेरितेहितैः ५४ तमुपासत राजेंद्र तन्न्यस्तहृदयेक्षणाः
तानाह करुणो मैत्रो महाभागवतोसुरः ५५ इति श्रीभा॰ सप्तमस्कं॰ पंचमो ध्या॰ ५ श्रीमते रामानुजाय नमः अथैनमःश्री

त्रिवर्गमात्मने स्वस्मै उपशिक्षितमपि साधु न मेने नाम मन्यत तच्छिक्षां च कुतः द्वंद्वारामैर्विषयेष्वारमणशीलैरुपवर्णितां ५१ किंचाचार्यः यदा गार्हस्थ्य
मेधेषु परावृत्तः परासंग इत्तः व्यासंगांतरपर इत्यर्थः तदा कृतक्षणैर्लब्धावकाशैर्वयस्यैः समानवयस्कैर्बालैस्तत्रोपहूतः सप्रह्लादः ५२ महाबुधो विद्वान्
धुरया वाचा तान्बालकान्प्रत्याहूय संबोध्य कृपया प्रहसन्निव तन्निष्ठां ज्ञानमार्गनिष्ठां उवाच ५३ ते तु बालकाः सर्वे तद्वचनगौरवासक्ताः क्रीडापरिछदाः
क्रीडोपकरणानि येषां ते द्वंद्वारामाणामीरितैरीहितैश्च न दूषिता धीर्येषां ते ५४ हे राजेंद्र तस्मिन्प्रह्लादे न्यस्तं हृदयं मनः ईक्षणं च यैस्ते तं प्रह्लादमेव वयस्याः पर्युपासत तु
पूर्ववत् परिवेष्ट्योपविविशुरित्यर्थः तान् पर्युपासीनान् कारुण्यमैत्र्यभ्युपेतो महाभागवतोसुरः प्रह्लादः प्राह ५५ इति सप्तमे पंचमोध्यायः ५ श्रीरामायनमः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰टी॰ वी॰ २६ ततःकारणाद्भयमन्वीवर्हसंसारमाश्रितःपुमान्कुशलःसन्क्षेमायैववृक्तविघ्नलेशमार्गमिवयतेत कौमारस्यैवस्युक्तमवधारणंप्रतिपादयि।
तुंलद्दवतारयति शरीरमिति पौरुषंपुरुषस्यजीवस्यसंबंधिशरीरंयावत्पुष्कलंयद्धुत्तरमस्तिनतुविपर्येतविपन्नंनभवतितावदेवक्षेमा।
पयतेतेतिपूर्वेणान्वयःबाल्यादारभ्यैवयतेतेतिभावः ५ एतदेवप्रतिपादयन्विमर्यास्तत्स्यकेवलंस्यायुर्व्ययमाह पुंसइति पुंसः
मनुष्यस्यतावद्वर्षशतंह्यायुर्जीवनयोग्यकालःशतवर्षपरिमितः तस्यशतवर्षपरिमितस्यायुषोऽर्द्धंपंचाशद्वर्षात्मकमजितेंद्रियस्य
निष्फलमेवयातीत्युत्तरेणान्वयः नैष्फल्येनयात्तेहेतुंवस्तुमासंविवृणोति यद्यस्मादसावजितात्मापुमान्रात्र्यामंधंतमः निद्रात्म

ततोयतेतकुशलंक्षेमायभयमाश्रितः शरीरंपौरुषंयावन्नविपद्येतपुष्कलं ५ पुंसोवर्ष
शतंह्यायुस्तदर्द्धंचाजितात्मनः निष्फलंयदसौरात्र्यांशेतेंधंप्रापितस्तमः ६ मुग्धस्य
बाल्येकौमारेक्रीडतोयातिविंशतिः जरयाग्रस्तदेहस्ययात्यकल्पस्यविंशतिः ७ श्रीराम

कंप्रापितस्सन्शेतेजितेंद्रियःकौमारएवारभ्यभक्तियोगरूपभगवद्धर्मयोगस्तुरात्र्यामपियमत्रयंयामद्वयंनिद्रार्थमुपयोज्यं एवंचित्तरयोपायमियार
नियतकालंभगवद्धर्ममाचरतीतिभावः ६ एवंबाल्येमुग्धस्यमूढस्यदशवर्षाणिकौमारेक्रीडतोदशवर्षाणीत्येवंविंशतिवर्षाणि राम
यांति जितेंद्रियःकुशलस्तुतस्यामपिविंशत्यांभगवद्धर्ममनुतिष्ठतीतिभावः एवमुत्तरत्रापि जरयाग्रस्तःदेहोयस्यातएवाक २६
ल्पस्यासमर्थस्यस्वानधीनदेहस्यवर्षाणांविंशतिर्यातिबाल्यादारभ्यभगवद्धर्मस्तुतदभ्यासशिक्षितदेहत्वात्तस्यामपि
विंशत्यांतदनुतिष्ठतीतिभावः ७ श्रीरामश्रीरामश्रीराम श्रीरामश्रीरामश्रीराम श्रीरामश्रीरामश्रीराम श्रीरामः॥

24

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तावद्भगवतोनिवधर्मीनाश्चेदित्यवधारणंतावदुपपादयति यथाहीतितथाहीत्यर्थः यथवादेपामयतोयालकःइत्यादुष्पजन्मनिमित्तेःपरमपुरुषस्यपादयोरुपस
र्पणंभजनंयथापिम्यतेदेवपुत्रोइत्यर्थः कुतःयतस्मादेषपरमपुरुषःसर्वभूतानांतिम्ब्वरांतःअनिश्यप्रयासनपूर्वकंभक्ती शरीरस्यात्मानुवर्तनेपुक्तंभवति
भावः नन्वात्माप्यपुरुषार्थेनरूपत्वात्मानुवर्तनीयोतआह प्रियइतिइष्टतमःनिरतिशयानंदरूपइत्यर्थः आनंदस्वरूपःसर्वहितपुरुषार्थरूपइ
तिभावः नन्वेवंभूतेनिष्कृपत्वादत्रवर्तमानान्प्रत्यावेद्यादित्यतआह सुहृदिति सर्वसर्वोहिसाधुकर्मकारयतितंयमुन्निनीषतीतिश्रुतरीसर्वा
त्रस्तुपक्रममात्रेणाभिमतपरमकारुण्यप्रवृत्तउत्तरोत्तरंस्वानुवृत्तिप्रवर्तनात्परहितकारीत्यर्थः २ विशेषःपादोपसर्पणेभवपुत्रोइत्यनेननैवेषयिकसु
पूर्वोक्तं६ खसाधनफलोनुक्तइत्युक्तंतदेवसहेतुकंसदृष्टांतंचोपपादयति खेतयथावधारणमप्युपपादयति सुखमिति देहेदेत्यादेहिनांदेहयोगतस्तरुसंबंधमात्रेणैंद्रियसु
खंसर्वत्रपश्वादिजन्मस्वप्यानुनिकफलमंतरेणापिदैवात्प्राचीनकर्मणैवलभ्यतेतत्रदृष्टांतोयथा . . . दुःखंदुःखंयथायत्नमंतरेणापिदैवाद्देवलभ्यतेतथैव

यथाहिपुरुषस्येहविशेषःपादोपसर्पणे येदेव सर्वभूतानांप्रियआत्मेश्वरःसुहृत् २ सुखमैंद्रियकंदैत्या।
देहयोगेनदेहिनां सर्वत्रलभ्यतेदैवाद्यथादुःखमयत्नतः ३ तत्प्रयासोनकर्तव्योयतआयुर्व्ययः
परं नतथाविंदतेक्षेमंमुकुंदचरणांबुजे ४ श्रीगणेशायनमः श्रीहनुमतेनमः श्रीरामः।

यिकंसुखमित्यर्थः सर्वत्रलभ्यतइत्यनेननैवेषयिकसुखलाभःसर्वजन्मसाधारणःभगवद्धर्मलाभस्तुमनुष्यजन्म साधारणइत्युक्तंभवति ३ यतोवैषयि।
कंसुखंसर्वजन्मसाधारणंतच्चदैवाद्देवसुलभमसुखवत्तत्प्रयासोवैषयिकसुखार्थःप्रयासोनकर्तव्यःएवमविजानता कृतोपिप्रयासःकेवलमा
युर्व्ययकरइत्याह यतइति वैषयिकसुखार्थप्रयासात्परंकेवलमायुःक्षयएवनान्यत्किंचिदस्तिप्रयोजनमित्यर्थः ननुजन्मांतरेपुनरैंद्रियकसुख
लाभायकर्तव्यस्तव . . . तत्राह नतथेति यद्यपिकृतोपितदर्थंप्रयासोजन्मांतरीयवैषयिकसुखसाधनस्तथापितथातद्वत्क्षेमंनप्राप्नोति।
कथंयथामुकुंदचरणांबुजंभजन्निति शेषः निःशेषदुःखनिवृत्तिपूर्वकंनित्यनिरुपाधिकनिरतिशयापरिच्छिन्नब्रह्मानंदानुभवरूपंक्षेमंप्रा
प्नोति तथावैषयिकसुखार्थंयतमानस्तादृशंक्षेमंनविंदतेकिंतुदुःखमिश्रमनित्यंसोपाधिकासत्सातिशयंनामानुभूयमानसजातीयंप्रा
प्नोतीत्यर्थः ४ श्रीहनुमैषाविजयतेतराम् श्रीवक्रतुंडोविजयतेतराम् श्रीमतेरामानुजायनमः श्रीसरस्वत्यैनमः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ ५० टी॰२

पुत्रान्सुहृद्याः सुहृदयंगमा दुहितृः स्वसुराभिः स्थिताः तथा भ्रातृन्स्वसृर्भगिनीश्च दीनो मातापितरौ च उरवा परिच्छदा भोगोपकरणानि येषु तान्मनोज्ञान्सरतां
स्वकुल्याः कुलक्रमागताः वृत्तीर्जीविकाश्च पशून्भृत्यवर्गांश्च कथं त्यजेत कथं तरां विरज्येत विरक्तः स्यात् १२ कथंभूतः कोशकारी कीटइवक
मीणी दुर्भगः यथा कोशकृत्कोशालकं कुर्वन्नात्मनो निर्गमापद्वारमपि नावशेषयति तथा स्वबंधकानि कर्माणि कुर्वाण इत्यर्थः अवितृप्तः कामो यस्य
तादृशः उपस्थं जैह्व्यं च सुखं बहु अधिकं मन्यमानो ऽवोदुरंतो मोहो यस्य १३ दुरंतमोहत्वमेवाह कुटुंबपोषायविपत्क्षीयमाणं निजायुः परिछिन्ना
युर्यस्य तादृशो विशेषेण हितमलं कुलमर्थं परमपुरुषार्थं न वेद विहन्तमिति पाठे हतमपि स्वात्मप्रिय तमर्थं न वेद हंतोति लेनात्मसं यते सर्वत्र देशे काले च ता
पत्रयेण दुःखितः आत्मा मनो यस्य तादृशो ऽपि निर्विघ्नेन संसारे तोषं न बुद्धिं न करोति यतः स्वकुटुंबे ऽनुरागो रतिर्यस्य १४ अमुना कापि करोतीत्याह वित्तेष्विति परद
व्यापहारिणो चौरस्य श्रेयस्मरणानंतरं नरकलक्षणः इह च लोके दुःख पश्यतं विद्वान्जानन्नपि वित्तेषु निसमानि विषक्तचेता यस्य तस्य जितेंद्रियाः शांतकामः
पुत्रान्समस्ताद् दुहितृः सुहृद्याः भ्रातृन्स्वसृर्वा पितरौ च दीनौ गृहान्मनोज्ञोरुपरिच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् १२ त्यजेत कोश
स्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः उपस्थजैह्व्यं बहु मन्यमानः कथं विरज्येत दुरंततमोहः १३ कुटुंबपोषायवियन्निजायुर्न बुध्य
तेऽर्थं विहितं प्रमत्तः सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुंबरागः १४ वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः
प्रेत्येह चाथाप्यजितेंद्रियस्तदशांतकामो हरते कुटुंबी १५ विद्वानपीत्थं दनुजाः कुटुंबं पुष्णन्स्वलोकाय न कल्पते वै यः स्वीयपारक्यविभि
न्नभावस्तमः प्रपद्येत यथा विमूढः १६
कुटुंबी च सन् तत्तस्य वित्तं हरति १५ एवं कामग्रहग्रस्तं सप्तभिः श्लोकैः गृहादिष्वनुरागो दुस्त्यज
इत्युक्तमथ तस्यानर्थावहत्वमाह विद्वानिति हे दनुजा इत्थं विद्वानप्युक्तविधं संसारं जानन्नपि कुटुंबं पुष्णन् विभ्रत् स्वलोकायालयायात्म्य ज्ञानाय न क
ल्पते न समर्थो भवति प्रकृतिपुरुषयोः स्वरूपायात्मा वमर्शिनः परो न भवतीत्यर्थः स्वीयं इदं परकीयं इदं सर्वं विभिन्नो भावो यस्य सर्वस्य परमात्मशरीरतामजानन्नि
त्यर्थः यथा विमूढः स्वतमो नरकमेव प्रपद्येत यद्वा तत्र विद्वानपि कुटुंबभरणासक्तो देहात्माभिमानस्वतंत्रात्माभिमानयुक्तो मूढवन्नरकमेव प्रपद्य
ते न मुक्तिं किं पुनः केवलमूढ इत्याह विद्वान्प्रकृतिपुरुषविवेकस्वरूपाथात्म्यविदपि यः पुनः स्वीयपारक्यविभिन्नभावः इत्थं कुटुंबं पुष्णन्भवति स स्वलोकाय
परमपदप्राप्तये न कल्पते किं तु नितरां मूढवत्तमः स्वं प्रपद्येत विदुषो ऽप्येवंगतिः किं पुनरविदुष इति भावः यथा विमूढ इति दृष्टांतवशात् किं पुनर्मू

राम ५०

नपि विमुच्यासक्तमनसां दुर्लभा १

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

साधना

स्वमहाभोगं न कार्यं पुंसश्च त्वरितं शाश्वतीं गतां निःश्रेयसं भवति यच्च स्वावर्जितकमायुर्दुरापेरेण दुर्बोधैः समन्तादप्रमाणेन कामेन न सद्गुणं विलावली
पसा मोहेन च कारा क्रोधेन च गृहे पुत्रादि लोके पुंसः सक्तस्यात्मस्वप्रमत्तस्य स्वहितमज्ञानेनापपातितं जितेन्द्रियस्तु कामादिः कामादिपुरुषार्थेनेन तस्मिन्नपि शत्रु
वर्गोल्लंके वयस्य भगवद्धर्मे मनुतिष्ठति सिद्धिर्भावः ८ स्वयमजितेन्द्रियस्यैव भयिकसुखरसस्यायुर्बोधेनैष्फल्यमारभ्य भक्तियोगस्य कुशलस्यजितेन्द्रियस्य
मुनिः श्रेयस्साधनं भगवद्धर्मप्रसाधनं तत्प्रयुक्तेन मनसा फलं भगवत्धर्माणां निरतिशयश्रेयः साधनत्वं तेषां च वर्त्तमानमनुष्यजन्मनैवानुष्ठेय
त्वं चोक्तं अथ वैराग्यमेतेरेणोपदिष्टो भगवद्धर्मः श्रोतव्यस्तानभवतीति वैराग्येण तावद्भवितव्यं तत्रासंगतिमेतेरेण नेस्स्यतीति तत्राभवितव्यं
सावधिविषयासक्तचित्तजनसंगपरिहारप्रसरेण दुर्लभं सम्भ्रमं तत्परिहारस्य गृहेवित्तकलत्रापत्यादिष्वनुरक्तचित्तस्य प्रपञ्चशकपतित पतितपायेनीव
नैकासनाद्दुःसंगः परिहार्य इति वक्तुं तावद्गृहादिष्वनुरागस्य दुस्त्यजत्वमनर्थावहत्वं चाह तावद्गृहानुरागस्य दुस्त्यजत्वमाह कोन्वेषिति गेहेष्वासक्तं

दुरापूरेण कामेन मोहेन च बलीयसा । शून्यं गृहे स्वसक्तस्य प्रमत्तस्यापयाति हि ८ को गेहेषु पुमान् सक्तमात्मानमजितेन्द्रियः स्नेहपाशैर्
दृढैर्बद्धमुत्सहेत विमोचितुं ९ को न्वर्थतृष्णां विसृजेत्प्राणेभ्योऽपि य ईप्सितः । यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक्
। १० कथं प्रियाया अनुकम्पितायाः संगं रहस्यं रुचिरांश्च मन्त्रान् । सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः ११

ममेदं गृहं इत्यभिमानयुक्तं स्वदेहं मोचनीये स्नेहाख्यपाशैर्दृढैर्बद्धमात्मानं विमोचितुमजितेन्द्रियः कः पुमानुत्सहेत न कोऽपि उत्साहं न कुर्यादित्यर्थः जिते
न्द्रियस्तूत्सहेतैवेति भावः ९ अनेन हि बालपतेर्गृहत्यक्तुमशक्यत्वमित्युक्तं गृहाभिनिवेशत्यागस्य भगवद्धर्मयोग्यत्वे कारणं इत्युक्तं तदभि
निवेशत्यागश्च वित्तकलत्रापत्याद्यनुरागपूर्वकः सोऽप्यजितेन्द्रियस्य दुःशक इत्याह को न्विति अर्थतृष्णां वित्तस्पृहां जितेन्द्रियव्यतिरिक्तः पुमान् वि ४ ५३
सृजेत्त्यजेत् दुस्त्यजत्वे हेतुं वदंस्तां विशिनष्टि पद्युति यः अर्थः प्राणेभ्योऽपीप्सितः तदेवाह यमिति यमर्थं प्रेष्ठैः प्राणैस्तस्करश्चोरः सेवकश्च
पुत्रोपजीवी वणिक्च नाविकश्च क्रीणाति आणत्यागिनं गीकृत्यापि तस्करादिर्यमर्थं साधयति तन्निमित्तं तृष्णां कोऽनु विसृजेदित्यर्थः १० किंचाबकं
पितायाः प्रियाप्रकाशाः प्रियायाः रहस्यं संगं रुचिरान्मनोज्ञान् हि मात्रायां प्रस्तु सुहृत्सु च संगं स्मरन् कथं प्रियादिसंगादीन् त्यजेदिति तत्तीपेना
न्वयः कथंभूतः तत्स्नेहसितः तेषां प्रियादीनां स्नेहेन सितः बद्धः कलाक्षराणि मधुरस्यष्टाक्षराणि येषां शिशूनां च संगं मिथ्यानुमृज्येत संगतेष्वनुरक्तं चित्तं यस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कां२ ७२

स॰ भा॰ टी॰ वी॰ २८ नहीति हे असुरात्मजाः अच्युतं सकृदर्पणादेवाश्रितान् च्यावयतीत्यच्युतस्तं प्रीणयतः पुंसो बहुः प्रयासो नहि विद्यते देवतान्तरप्रीत्युत्पादकसाधनानुष्ठानवद्भ।
गवत्प्रीत्युत्पादकतद्धर्मानुष्ठाने बहु आयासो विद्यते इत्यर्थः अनायासे हेतुरात्मत्वादिति सर्वभूतानामात्मत्वात् सर्वतः सिद्धत्वात् सुलभत्वात् सर्वतः इति सार्वविभक्ति
कस्तसिः सप्तम्यर्थः इह लोके सर्वतः सर्वेषां देवासुरादिस्त्रीपुंसवर्णाश्रमादिविभागमन्तरेण सर्वेषां सिद्धत्वादित्यर्थः अयमभिप्रायः नहि सुलभस्य तत्
१९४ लाभार्थं त्वेषणाय विदूरगमनादिरूपः प्रयासोपेक्षितः सर्वत्र सर्वेषां सुलभत्वादेवं सर्वेषामात्मत्वेन सर्वत्र सुलभस्य प्रीणनेन नातीवायास इति यद्यपि
स्वर्गादिवत् स्वर्गादिवत्साध्यः पुरुषार्थः अपितु सिद्धरूप साध्यपुरुषार्थसाधने हि यागाद्यनुष्ठाने यः प्रयासबाहुल्यं सिद्धस्य तु तल्लाभोपयुक्तप्रीणनो
पायतत्समाश्रयणमात्रमपेक्षितं इत्यर्थः यद्वा आत्मत्वादित्यनायासे हेतुः आत्मा हि स्वशरीरे निरतिशयप्रीतिपुरस्सरं दूषणशीलस्य लो
केऽपि स्वस्यैवं सर्वेषां जीवानां परमात्मानं प्रति शरीरशरीरिभावात् तत्र आत्मत्वादिति तत्रैवान्यो हेतुः विषयकप्रीतेस्तस्य स्वतः सिद्धत्वात् अपि विपुलापराधेन मिश्रितस्य पा॰७
शरीर

नह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः। आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः॥ १९ परावरेषु भू
तेषु ब्रह्मान्तस्थावरादिषु। भौतिकेषु विकारेषु भूतेष्वथ महत्सु च॥ २० गुणेषु गुणसाम्ये च गुणव्यतिक
रे तथा। एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः॥ २१ श्रीमते रामानुजाय नमः। श्रीयै नमः

हृदि स्थितस्य
रभिव्यक्त्या वहिः किंचिदनुरूपादि कर्मत्रयमपेक्षितमिति भावः सिद्धत्वादिति तत्रैवासौ हेतुः नहि हृदि स्थितस्य निधेस्तस्य रिक्तान्नमन्तरेण तल्लाभोप
युक्तोऽन्यः प्रयासोपेक्षितः स्वपरमात्मनोपि निरतिशयपुरुषार्थस्य स्वहृदये स्थितत्वात् तल्लाभोपयुक्तस्वामित्वेशेषित्वादितया आत्मज्ञानपूर्वकतत्समा
श्रयणमात्रेण तस्य समाश्रितविषयकप्रीतिरुदेष्यतीति नातीवायासो विद्यते इत्यर्थः १९ आत्मत्वात् सर्वभूतानामित्येतदेव प्रपंचयति राम
परावरेष्विति त्रिभिः ब्रह्मा च तनुर्येषां ते येषां स्थावरा आदिर्येषां तेषु परावरेषु ब्राह्मचेषु चराचरात्मकदेहभाक्षु चेतनेष्वित्यर्थः। २८
तथा भौतिकेषु पृथिव्यादिभूतपरिणामरूपेष्वचेतनेषु घटपटादिषु महत्सु पृथिव्यादिमहाभूतेषु २० गुणेषु सत्त्वादिषु गुणानां स
त्त्वादीनां साम्यं यस्मिंस्तस्मिन् प्रधाने मूलप्रकृतौ इत्यर्थः गुणव्यतिकरे गुणवैषम्यवति महदहंकारादौ चेत्यर्थः २१ श्रीयै नमः

२८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वंगहायासंकेर्दुस्त्यजत्वमनर्थविह्स्वेनोक्तमथोक्तमुपसंहरन्दुस्त्यजत्वमनुरागनिमित्तमसन्मार्गपरित्यागमसन्मार्गप्रणो भगवंतमाश्रयेत्तेत्या
ह यतः कश्चिदपि पुमान् गृहायासेनिविष्टश्चदात्मानं कविरपिकाले कुत्रचिद्देश्चेमोचितुमसमर्थस्ततः इत्युत्तरेणान्वयः अससमर्थहेतुरुत्तम।
सर्व्वहीनः विषयलंपटः वामदृशांपाशांतासांविहारेक्रीडाभ्सः क्रीडार्थसंबर्द्धितशरवाम्रगादितुल्यः विहारेइतिपाठेविहारस्थानमात्मानं इत्यन्वयः।
वामदृशांविहारक्रीडामृगत्वविमोनदृः यदिति यद्यस्मात्वामदृशांक्रीडामृगत्वाद्धेतोः निगडरूपोविसर्गः संसारबंधोभवति अयमितिशेषः पत्री
उन्मोत्येतद्रूपमेवनिगडनरूपः संसारइत्यर्थः यदितिच्छेदपक्षेयत्रच्छेदेनवामदृशांवापरामर्शः मन्वयस्तुनिगडः शृंखलसूतोपविसर्गः पुत्रादिरूपः सर्ग
इत्यर्थः अविसर्गइतिवाच्छेदः यद्यस्मात्क्रीडामृगत्वादविसर्गः अविमोच्योनिगडः शृंखलतुल्यः संसारबंधोभवतीत्यर्थः १७ ततः यतोगृहादिषा
सक्तआत्मानंमोचितुमसमर्थस्ततः विषयेषुत्राणादिद्वेवात्मामनोयथेतिधसत्तुसेष्वसंगंदूरात्परित्यजसादिदेवंजगद्गुरुमस्थितिलयलीलंसदेतन्नसा

यतोमकश्चित्स्वचक्रुत्रविहाहीनः स्वमात्मानमलंसमर्थः विमोचितुं वामदृशांविहारेक्रीडामृगो
यन्निगडोविसर्गः १७ ततोविदूरात्परिहृत्यदैत्यादैत्येषुसंगंविषयात्मकेषु उपेतनाराय
णमादिदेवंसमुक्तसंगैरिषितोऽपवर्गः १८ श्रीमतेरामानुजायनमः श्रीरामायनमः श्री

दीप्यमानंनारायणंजीवानांप्राप्यंप्रापकमाधारंचभगवंतमुपेतमसंगादिप्रणाडउपनारणं व्रजेत यद्यप्यसत्संगेतः कंठोक्तिनीरितत्वाति
स्वस्यसत्संगतेरेवहेतोर्ज्ञातोऽस्यस्वेनैवचक्ष्यमाणत्वात्स्वसंगस्येवेतः सत्संगेतः कृतप्राप्यत्वाच्च तदनुक्तावपिसाभिप्रेतैव स्वंगहायासं
गस्यदुस्त्यजत्वदोषावहत्वादिकथनेनैवतेषांवैराग्यमुदेतीतिवैराग्यमपिसंपादनीयमिति श्रद्धेतोनोक्तंस्वस्यैवज्ञानोपदेशस्त्वा
दार्यत्वेनस्थितत्वाद्वैभिगमनमपीत्यत्राहतः कर्त्तव्यत्वेनोक्तं किंतु श्रीआप्रपद्मनामात्रमेवकुर्वितितिश्राद्वेनोक्तं धर्मान्भाग
वतानितिभगवद्वेनाभिप्रेतंनिष्फलत्वशंकामुदासंश्यनक्ति सद्भीति सउपेयोनारायणः अपवर्गः परमपुरुषार्थलक्षणापवर्ग
हेतुत्वेन मुक्तः संगोदिदृवदनुवेषितुमुचैस्तैरिषितः इष्टः सत्संबमुक्तसंगानामिष्टापवर्गः फलन्पदइत्यर्थः १८ श्रीयेनमः
एतदेवप्रतिपादयितुं तावत्समाश्रयणस्यदुःशक त्वशंकांनिरस्यन्नाह श्रीगुरुचरणकमलेभ्योनमः श्रीगणेशायनमः श्री

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ २९ तुष्ट इति तस्मिन्नाद्ये जगत्कारणभूते तेन तेन भगवति तुष्टे सत्यलभ्यं किं न किमपि सर्वमपि लभ्यमेव सुलभमेवेत्यर्थः यद्यपि सुलभं तथापि निरतिशय। पुरुषार्थरूप तच्चरणारविंदानुभवरूपमस्मत्तमनुभवद्भिर्मीभिर्धर्मार्थकामकैवल्यादिकमनंत ... पुरुषार्थकं इवनेष्यते इत्यभिप्रायेणाह किं

इति नोऽस्माकं गुणव्यतिकरात्कर्मात्त्रिगुणसत्वादिगुणपरिणामोऽस्ववसिद्धा ये धर्मादयः धर्मार्थकामाः किं न किमपि प्रयोजनमित्यर्थः कांक्षितेना भिलषितेनागुणेन गुणत्रयपरहितेन कैवल्येन मोक्षेण वा किं सोऽपि न पुरुषार्थ इत्यर्थः कथंभूतानां नो भगवच्चरणयोः सारमनुभवात्मकमस्मत्सारं जुष तां सेवमानानामुपगायतां तद्गुणान्स्तुवतां मम सातच्चरणारविंदानुभवामृतं वा कस्मश्रवणाभ्यासं तद्गुणानुभवामृतं वा नुभवतामस्माकं धर्मादयः अन्ये ऽद्यकत्राप्य

इत्यर्थः २५ ननु त्वदुक्ते मत्त एवं विज्ञाने नोप्यसकृद्भवः त्रिवर्गमेव पुरुषार्थत्वेनापदिशंति शुः ते तु त्रिवर्गमिनाहस्म भगवच्चरणारविंदाश्रयणमेव सारतमं मन्य गा२

न३ से किं त्वं गुरुः वितुशिक्षितान्वीक्षिक्यादिशास्त्रेषुनद्धकधर्मः कर्तव्यत्वेनोपलभ्यतः किं तत्र प्रमापकं तत्राह धर्मादीनां संहारकं सुखं पुरुषार्थे धर्मार्थः कामश्चेतिय त्रिवर्गोऽभिहितः अस्मदन्वीक्षिकीभिर्वादिभिरिति शास्त्रं वः यस्त्रिवर्गः पुरुषार्थत्वेनाभिहितः इत्यर्थः यच्च तत्प्रतिपादिकेशास्त्रेष्वाविद्यावत्वे तत्सर्वं सहमेव नेत्रशास्त्रानी

तुष्टे च तत्र किमलभ्यमनंत आद्ये किं तैर्गुणव्यतिकरादिह ये स्वसिद्धाः धर्मादयः किमगुणेन च कांक्षितेन सारं जुषां चरणयोरुपगायतां नः २५

धर्मार्थकाम इति च निहितं त्रिवर्गमीक्षा त्रयीं नयदमौ विविधा च वार्ता मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः २६ त्रिकीसंज्ञात

केविद्या त्रयीवेदत्रयभागः नयदमौ दंडनीतिप्रतिपादके शास्त्रे विविधा वार्ता हृष्याद्याजीविकाज्ञानजनकं शास्त्रं तत्सर्वमिदं मन्येनानाम्नेव किंतु मत्स्वसुहृदः परस्य पुंसः स्वात्मार्पणं तत्तन्निगमस्य वेदोत्तरभागस्य त्रेमममिति विशेषः उपनि

निरुपाधिकसुहृदे परमपुरुषाय इत्यर्थः संप्रदानस्य विशेषणत्रयं षष्ठी स्वात्मार्पणं भगवति स्वात्मसमर्पणं तदेतन्निगमस्य वेदोत्तरभागस्य त्रेमममिति उपनि निरुपाधिकसुहृदे परमपुरुषायेत्यर्थः संप्रदानस्य विशेषणत्वे षष्ठी स्वात्मार्पणं भगवति स्वात्मसमर्पणं तदेतत्परमपुरुषार्थसाधनं भगवत्स्वात्मसमर्पणं

षड्भागस्य प्रतिपाद्यं सत्यं नित्यं न त्वपि सुपुरुषार्थसाधनमन्यदित्यर्थः अस्मद्गुरुभिः ज्ञातमप्यहं ज्ञानामि नित्यनिरतिशयपुरुषार्थसाधनं भगवत्स्वात्मसमर्पणं

दातप्रतिपाद्यं लघिकं जानामीत्यर्थः गुरवस्तु नित्यं ज्ञानं नैवं ज्ञानं नैवामहत्तत्वमहाभावालानुष्ठानोपाये गित्यपानिः संप्र यं जानतीति नात्पर्यं निगमस्य स्वेच्छेनान्मस्मदुक्तार्थविदांतभागः प्रमाणं इत्युक्तं सच्चिन्मित्याभासेनेयुंजीत मुमुक्षुर्वैशरणमहं प्रपद्ये इत्यादिरूपः स्वा

त्मार्पणमित्येतन्नोयतनारायणं हरिमात्मत्वेनैव त्याच्युतात्मस्वरूपणमात्मसमर्पणं स्वेनैव शिवतमवति स्वात्मसमर्पणं नामस्वात्मनो भगवच्छेषत्वेक

स्वभावत्वानुसंधानपूर्वकं भगवति स्वात्मरक्षाभरसमर्पणरूपं स्वेनैव नारायणोपायत्वेनामत्वाद्धरणात्तेरिष्टुत्कं भवति समनंतराध्या

येतदुपायत्वस्य तत्कृत्यात्मकत्वं वक्ष्यति एवं च यथाधिकारं भक्तिप्रपत्त्यैतरात्मकं भगवत्समाश्रयणे कर्तव्यमिति तात्पर्यम् श्रीयेनमः श्री

५१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रत्यगात्मस्वरूपेण प्रत्यगात्मा जीवः स एव स्वासाधारणं रूपं शरीरं यस्य तेन प्रत्यगात्मशरीरकेणेत्यर्थः दृश्यरूपमचेतनं रूपं यस्य तेनाचेतनशरीरकत्वेन
चेत्यर्थः एकः स्वसमानरहितः स्वयं परः आत्मांतः प्रविश्य भर्ता अयोऽस्य स्वशरीरगतविकारैः निरस्तनिखिलदोषः साधुरूपपरिपूर्णः ईश्वरो
जीवकर्मानुगुणं नियंता व्याप्यव्यापकनिर्देश्यः व्याप्येषु व्यापकतया निर्देश्यः अविकल्पितः जातिगुणादिरहितः केवलानुभवो दुःखप्रतिभ
टं ज्ञानं आनंदः आनंदरूपं तैरेव स्वरूपं यस्य स परमेश्वरः स्वव्यतिरिक्तेश्वरांतररहितः गुणसर्गया संसारिणां देहादिगुणान् सृजतीति तया मायया तर्हि
तैश्वर्यः संसारिणामज्ञानामनभिमतमहिमा यि सदाचार्योपदेशेन ज्ञायत इत्यर्थः उक्तविधतत्त्वयाथात्म्यज्ञानपूर्वकं तत्समाश्रयणमात्रमेव तत्प्राप्तिनि
मित्ततत्प्रीतिहेतुरुपाय इति भावः अत्राविकल्पितः केवलानुभवानंदस्वरूप इति पदद्वयेनास्यामलमनस्वत्वं सत्यं ज्ञानमनंतं विज्ञानमानंदमिति
श्रुत्यर्थः प्रत्यभिज्ञायते तेन प्राप्यं ब्रह्मस्वरूपमुक्तं अवशिष्टैरेकमेवाद्वितीयादिभिः प्रथमांतपदैः प्रत्यगात्मस्वरूपेण दृश्यरूपेणेति पदद्वयेन च प्राप्यस्य
गुणा उक्ताः परावरेषु भूतेषु प्रत्यगात्मस्वरूपेण जीवस्य तच्छेषत्वापरपर्यायतच्छरीरत्वकथनेन प्राप्तुः स्वरूपमुक्तं गुणसर्गया माययांतर्हितैश्वर्य इत्य

प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयं व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः २२ केवलानुभवानंदस्वरूपः परमेश्वरः माययांतर्हितै
श्वर्य ईयते गुणसर्गया २३ तस्मात्सर्वेषु भूतेषु दयां कुरुत सौहृदं भावमासुरमुन्मुच्य यया तुष्यत्यधोक्षजः २४

नेनात्मस्वात्मकत्वा
दिरूपमोहादिप्राकृतगुणस्वशरीरविरोधिस्वरूपमप्युक्तं तत्प्राप्तिफलं तच्चरणैककैंकर्यादिरूपं सायुज्यं चरणयोरिति वक्ष्यति एवमर्थपंचकमपि स्पष्टं भवति ए
कैकरूपेण नारायणमिति तत्समाश्रयणं कर्तव्यमेतेन विहितं तस्य दुष्करत्वशंकापरिहारश्च संगात्समाश्रयणोपयुक्तार्थपंचकज्ञानं सदाचार्योपदेशात्संपादय
इत्युक्तं एवमर्थपंचकज्ञानपूर्वकतत्समाश्रयणमात्रमेव तत्प्रसाद . नचारात्तत्प्राप्तिहेतुरित्यभिप्रेतं तत्समाश्रयणं च तत्कृपया अन्यतरात्मका
धिकारभेदेन व्यवस्थितमिति तात्पर्यं २२ २३ यदुक्तं न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजा इति तदुपसंहरन् तत्प्रीतिनिमित्तं तदंतरंगसाधनं कर्तव्यं तस्मात्
तस्मादिति यस्मात्सर्वेतरात्मत्वादिप्राप्यब्रह्मस्वरूपादिज्ञानपूर्वकतत्समाश्रयणमात्रमेव तत्प्राप्त्युपाया बहलप्रीतिहेतुस्तस्मात्सर्वेष्वासुरं भावं
भूतद्रोहशीलत्वादिरूपमुन्मुच्य समूलं त्यक्त्वा परमात्मशरीरेषु भूतेषु ब्रह्मादिस्तंबपर्यंतेषु यथोचितं दयां सौहृदं च कुरुत यया अधोक्षजो भगवां
स्तुष्यति तादृशीं भूतेषु दयां कुरुतेत्यर्थः २४ तुष्यत्वधोक्षजस्ततः किमत आह श्रीहनुमते विजयसेनराम् श्रीरामाय नमः॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ वी॰ ३

किमुवाच तेदेवाः पितरीत्यादिना नाद्युनाप्यजहास्म तिरित्यंतेन अस्माकं पितरि हिरण्यकशिपौ तपसे तपः कर्तुं मेरौ स्वलं प्रति प्रस्थिते प्रयाते सति इंद्रा

स्याविबुधा देवा दानवान्प्रति युद्धोद्यमं चक्रुः २ कथंभूताः संतः लोकोमतापनः लोकानां दुःखकारी पाप पापात्मा स्वपापेनैव देवात्पिपीलिकेरहिः सर्प

वाभक्षित इति वादिनो वदंतः संतः वासवइंद्र आदिर्येषां ते युद्धोद्यमं चक्रुरिति पूर्वेणान्वयः ३ ततः किं जातं तत्राह तेषां वासवादीनां वा उद्योगं बल प्रयुक्तमु

द्योगं निशम्य दृष्ट्वा सुरैर्वध्यमाना असुरास्त्रस्तभीताः संतः असुरयूथपाः सर्वे त्वरिताः सर्वतो दिशो दुद्रुवुः पलायितवंतः ४ कथंभूताः कलत्रादीना वेक्षमा

णाः तेषु स्मृतस्य हा इत्यर्थः तत्र हेतुः सर्वे प्राणपरीप्सवः प्राणमात्रपरित्राणेच्छवः तत्र परिच्छदाः भोगोपकरणानि ५ ततः जयशालिनो ऽमरोत्वा

प्रह्लादः पितरि प्रस्थितेऽस्माकं तपसे मंदराचलं युद्धोद्यमं परं चक्रुर्विबुधा दानवान्प्र

ति २ पिपीलिकैरहिरिव दिष्ट्या लोकोपतापनः पापेन पापोऽभक्षीति वादिनो वासवा

दयः ३ तेषां मतिबलोद्योगं निशम्यासुरयूथपाः वध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतो दिशं।

४ कलत्रपुत्रवित्ताप्तान्गृहान्पशुपरिच्छदान् नावेक्षमाणास्त्वरिताः सर्वे प्राणपरीप्सवः ५।

व्यलुंपन्राजशिबिरममरा जयकांक्षिणः इंद्रस्तु राजमहिषीं मातरं मम चाग्रहीत् ६ नीयमानां भयोद्वि

ग्नां रुदतीं कुररीमिव यदृच्छयागतस्तत्र देवर्षिर्ददृशे पथि ७ प्राह नैनां सुरपते नेतुमर्हस्यनागसं मुंच मुंच महा

भाग सतीं परपरिग्रहं ८ इंद्र उ॰ आस्तेऽस्या जठरे वीर्यमविषह्यं सुरद्विषः आस्यतां यावत्प्रसवं मोक्ष्येऽर्थपदवीं

राज्ञो हिरण्यकशिपोः शिबिरं गृहं व्यलुंपन् सर्वस्वापहारेण नाशितवंतः इंद्रस्तु राज्ञो हिरण्यकशिपो भार्यां मम मातरं कयाधुं नामाग्रहीत् ६ तां चेंद्रेण नीयमा

नां मातरं भयोद्विग्नां कंपितां कुररीमिव क्रंदंतीं रुदंतीं देवर्षिर्नारदो यदृच्छयापगतः पथि ददर्श ७ दृष्ट्वा चेंद्रं प्राह तदेवाह हे सुरपते ऽनाग

सं निरपराधामेनां कयाधुं नेतुं त्वं नार्हसि यतो हे महाभाग परेणान्येन हिरण्यकशिपुना परिगृहीतां परदारां इत्यर्थः मुंच मुंच इत्युक्त आह इंद्रः ८ आ

स्त इति अस्या जठरे कुक्षौ अविषह्यमस्माभिः सोढुमशक्यं सुरद्विषो हिरण्यकशिपोर्वीर्यं गर्भरूपेण वर्धमानमास्ते तिष्ठति यतोऽनया प्रसव।

पर्यंतमास्यतां मत्समीपे स्थीयतां ततश्चार्थस्य पदवीं मार्गं गतः सन्नेतस्यै जातं पुत्रं हत्वा एनां त्यजामीत्यर्थः ९ श्रीगणेशाय नमः श्रीः राम ३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मत्रगुरुभिरज्ञानमिदमेतैरणपि सदुपदेशेन कथं त्वया ज्ञातवानित्याशंकायां भगवतो नारदस्यानुग्रहादेवेति वक्तुं तस्य तोऽग्रपि कल्माह ज्ञानमिति एतदेवदुरवापं दुर्ल
भं ज्ञानं नरस्य सखा भगवान्नारायणो बदरिकाश्रमवासी नारदायाह उपदिष्टवान् ननु पुत्र नारदः श्रोता नारायणो वक्ता तस्मिन्नास्माकं कथं मध्यधिकारस्तत्रोक्तं
निरागस्कोऽतिनामकिंचनानामनन्यप्रयोजनानां भगवतः पादारविंदरजसाप्लुतानां स्नातानां देहिनां भगवत्सेवासक्तानां सर्वेषामज्ञानं स्यादिमनस्त्वानामेव
तिनियमः २७ अतस्त्वमयापि नारदाच्छ्रुतमित्याह श्रुतमिति विज्ञानेन विवेकादिना संयुतं ज्ञानं शास्त्रोक्तं विशुद्धं भागवतधर्मरूपं भगवत्प्रा
प्यवेदितो नारदाच्छ्रुतं श्रवणेन ज्ञातं भगवतो नारदस्य स्वसां श्रवणान्मम ज्ञानविज्ञानसंपत्तिरभूदित्यर्थः २८ तत्र विस्मिता पृच्छंति दैत्यकुमाराः प्र
ह्लादेति हे प्रह्लाद त्वं वयं चाप्येताभ्यां गुरुपुत्राभ्यामेतद्विनान्यं गुरुं न विद्महे स तदागमनात्त्वमेवाहं नारदपार्श्वे गत इत्याह बालानामपि हि ईशानामपि

ज्ञानं तदेतदमलं दुरवापमाह नारायणो नरसखः किल नारदाय एकांतिनां भगवतस्तदकिंचनानां पादारविंदरजसाप्लुतदेहिनां स्यात् २७
श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतं धर्मं भागवतं शुद्धं नारदाद्देवदर्शनात् २८ दैत्यपुत्रा ऊचुः प्रह्लाद त्वं वयं चापि नर्तेऽन्यं
विद्महे गुरुं एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरौ २९ बालस्यांतःपुरस्थस्य महत्संगो दुरन्वयः छिंधि नः संशयं सौम्य स्या
च्चेद्विश्रंभकारणं ३० इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे षष्ठोऽध्यायः ६ नारद उवाच एवं दैत्यसुतैः पृष्टो महा
भागवतोऽसुरः उवाच स्मयमानस्तान्स्मरन्मदनुभाषितं १ श्रीगुरुचरणकमलेभ्यो नमः श्रीगणेशाय नमः श्रीराम

अस्माकमपीश्वरौ नियंतारौ अतस्तव नारदसंगमनं न संभवतीति निःशंका वर्त्तत इत्यर्थः २९ नारदस्यात्रागमनेनैतन्न संभवतीत्याहुः बालस्ये
सतामस्माकं एतावेव ईशानि नियंतारौ अतस्तवान्यत्र गमनं न संभवतीति निःशंका वर्त्तत इत्यर्थः हे सौम्य प्रह्लाद नोऽस्माकं संशयं छिंधि यद्यपनुद विश्रंभकारणं विश्वासहेतुः स्या
ति अंतःपुरस्थस्य बालस्य तव महतो नारदस्य संगो दुरन्वयो दुर्घटः हे सौम्य प्रह्लाद नोऽस्माकं संशयं छिंधि यदि विश्रंभकारणं विश्वासहेतुरस्ति चेदुपपादनपूर्वकं तत्संगतिविषयसंशयं
छेत्तुं असंभावितत्वेनास्माभिरविश्वसनीयो नारदसंगमः स्वत्कृतः तत्र यद्यस्माकं विश्वासहेतुरस्ति चेदुपपादनपूर्वकं तत्संगतिविषयसंशयं
छिंधीत्यर्थः ३० इति सप्तमे षष्ठः ६ दैत्यकुमारैरेवं पृष्टः प्रह्लादस्तत्संगतिहेतुमुपपादयन् तत्त्वत्रययाथात्म्यापरोक्षपूर्वकं सपरि
करं भगवद्भक्तियोगं उपदिष्टवानित्याह भगवान्नारदः एवमित्यं दैत्यसुतैः पृष्टो भागवतोत्तमः प्रह्लादस्तान्दैत्यपुत्रान्प्रति स्मयमानः मदा
नुभाषितं स्मरन्नुवाच १ श्रीरामाय नमः श्रीभाष्यकाराय नमः श्रीसरस्वत्यै नमः श्रीगणेशाय नमः श्रीहनुमते नमः श्रीः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तिः८ वा२

स० भा० टी० वी० ३१ ईश्वरः समर्थ ऋषिः तस्याः परिचर्यया प्रसन्नः मामप्युद्दिश्य निर्मलं धर्मस्य तत्त्वं ज्ञानं चेत्युभयं प्रादात् धर्मो भागवतः योगलक्षणस्तस्य तत्त्वं याथात्म्यं तत्त्वं ग्राम्।
ज्ञानं देहविविक्तात्मगोचरं याथात्म्यज्ञानं चोपदिष्टवानित्यर्थः १५ तज्ज्ञानमुपदिष्टं तदुभयं मम मातुः स्त्रीत्वात्कालस्य दीर्घत्वाच्च तिरोधे विस्मृतमभूत्।
सर्वं ऋषिणा भगवता नारदेनानुगृहीतं मां तु सा स्मृतिः तदुपजनितं स्मरणात्मकं ज्ञानमधुनापि नाजहान्न त्यक्तवती १६ तदेवं प्रह्लादस्त्वात्मसाक्षिणामेव कुमा
सं४ स्मिन्४ रैः यत्तत्तस्योत्तरमुक्तमथैतं श्रद्धैव प्रयोग तद्धर्मस्वरूपज्ञानमिति साक्षी त्वदेहवतामस्त्वनुग्रहेण तदुभयं संपद्यतेत्याह भवतामपीति यदि भवंतो मद्वचः
श्रद्दधते तस्मिन् श्रद्धया तद्विकारविषये त्वरा युक्तात् भवतामपि तदुभयं भूयात् श्रद्धामेत्तरेण उपदिष्टमपि तत्त्वं न प्रतिष्ठितं भवतीत्याह वैशारदीति
वैशारदी निपुणतरा धीस्तत्त्वविषया बुद्धिः स्त्रीणां बालानां श्रद्धातस्तवं भयान्न्यूनतां विनेत्यर्थः तत्र दृष्टान्तः मे यथेति मया श्रद्धावता मम वैशारद्यु

ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्मलं १५ तत्तु कालस्य दीर्घ
त्वात्स्त्रीत्वान्मातुस्तिरोदधे ऋषिणानुगृहीतं मां नाधुनाप्यजहात्स्मृतिः १६ भवतामपि भूयान्मे यदि श्र
द्दधते वचः वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा १७ जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्म
नः फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना १८ श्रीहनुमते विजयतेतराम् श्रीरामायनमः श्री

द्धिरभवत् श्रद्धारहितानामन्यानां तु न भवेदेवं सर्वेषां बालानां स्त्रीणां च श्रद्धातत्त्वज्ञानं प्रतिष्ठितं भवत्यन्यथा मन्मातुरिवाप्रतिष्ठितमित्यर्थः १७ तदेवं तेषां
श्रद्धामुत्पाद्य श्रद्धायुक्तान् शुश्रूषून् दैत्यकुमारानालक्ष्य तेभ्यो भगवद्भक्तियोगमुपदिदिक्षुस्तावत्तदंगभूतं प्रकृतिपुरुषकालयाथात्म्यज्ञानं योगमुपदेष्टुकि दि२
मत्यादिना तावज्जीवात्मस्वरूपं देहादिलक्षणं विवक्षुर्देहधर्मानाह जन्माद्या इति ईश्वरो गुणपरिणामापादनसमर्था मूर्तिराकारो यस्य तेन कालेन राम
न निमित्तभूतेन जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यतीत्येवंरूपा इमे षड्भावविकाराः दृष्टाः अत्र समुपलभमाना देहस्यैव धर्मा नात्मनः यथा वृक्षस्य ३१
एव फलानां जन्मादयो दृश्यन्ते न वृक्षस्य तद्वदात्मनेकरूपत्वेनैवस्थितत्वाद्देहस्यैवेत्यर्थः आत्मव्यतिरिक्तस्यास्थिरस्यैकरूपस्य वस्तुनोऽभावात्कथं विकार
इति नार्थः स्थिरः षड्भावविकारवानपि वृक्षस्थानीयेन न निर्वृत्तिः १८ तदेवं देहधर्मलक्षणेनात्मनो देहाद्भेदं दर्शितः श्रीगणेशाय नमः श्रीः॥

२९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एवमुक्तो देवर्षिराह सोऽयंत्विभुस्त्वयाऽन्नासंस्थामरणं न प्राप्स्यते तत्र हेतुं वदन्नत मिमं विशिनष्टि निःकिल्बिषः मरणनिमित्तभावेन किल्बिषरहितः तत्कु
तः महाभागवतः भगवद्भक्तेष्वपि श्रेष्ठः किल्बिषरहित इति भावः महान्गुणैः श्रेष्ठोऽनन्तस्य भगवतोऽनुचरः बली महाबलसंपन्नः यद्यपि भविष्यद्वाक्यमनुष
हात्त्वंवैन भागवतत्वाद्ध्येयो धर्मस्त्यापि समनेनैतस्मैव विनानुमरिष्यमाणस्य पुनर्जन्म कारणत्वापमानं द्विरूपं यं पश्येत् किन्तु करोति भगवतोऽप्रियमाण
स्य तत्र धर्मान्वयः इत्यभिप्रायेणनिःकिल्बिषइत्यादीनि विशेषणान्युक्तानि ननु ईदृशंपुत्रं मां प्रतिस्वापेक्षोतनिनःभ्यस्यस्यपाक धर्मतिं पतिः तस्यतद
भीसंपत्तौ हितं हेतुकस्यागतीतोरेतराभयत्वमितिकथं देवर्षिणैवमुक्तमिति चेन्मैवं गर्भस्थं नितरां मीभ्यरकपालयियपमतः संबन्धस्य चसोहृदि
रक्षस्तुकृतं तथा विभीः कटाक्षस्त्वेयमभ्यानुरूपस्यं चसात्विकैः संभावनेवैतानि सावार्यप्राप्तिहेतवः इत्युक्तो हिरण्यपदकसंपन्नैर्देवज्ञो देवर्षिराहस्प

नारद उ० अयं निःकिल्बिषः साक्षान्महाभागवतो महान् त्वयानप्राप्स्यते संस्थामनन्तानुचरो बली १० इन्द्र उ० इत्युक्तस्तां वि
हायेन्द्रो देवर्षेर्मानयन्वचः अनन्तप्रियभक्त्यैनां परिक्रम्यदिवं ययौ ११ ततो मे मातरमृषिः समानीय निजाश्रमे आश्वास्ये
होष्यतां वत्से यावत्ते भर्तुरागमः १२ तथेत्यवात्सीद्देवर्षेरन्ति साप्यकुतोभया यावद्दैत्यपतिर्घोरात्तपसो न न्यवर्तत १३
ऋषिं पर्यचरत्तत्र भक्त्या [illegible] परमया सती अन्तर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये १४ श्रीगणेशाय नमः श्रीः।

तथेति तस्याम त्युच्यमानायामप्यहं कयधिपुत्रं नलेकरवातपतो येत्वया न प्राप्स्यतीत्युक्तवानितनेतरेतरामभयः १० इतीत्युक्त इन्द्रो देवर्षेर्नारदस्य वचो
मानयन् गौरवात्सुप गच्छन्नतो राजमहिषीं विहायानन्तस्य भगवतः प्रियो योऽहं तस्य मम भक्त्यैनां मममातरं प्रदक्षिणीकृत्य दिवं प्रतिययौ ११ ततऋ
षिर्नारदः ममामातरं स्वाश्रमं समुपगानीयास्येनोन्नायगम पिलाश्वास्यसांत्वयित्वा हे वत्से वालितव भर्तुर्यावदागमस्तावत्पर्यन्तं त्वया इहास्मि
न्ममाश्रमे उष्यतां स्थीयतां इत्युवाचेति शेषः १२ ततस्तथेत्यंगीकृत्य सा मन्माता देवर्षेरन्तिके समीपेनास्तिकुतोऽपि भयं यस्याः सा इत्य
वात्सीदुषितवती दैत्यपतिरुग्रतपसो यावन्न न्यवर्तततावत्सतो मन्माता अंतर्वत्नी गर्भिणी स्वगर्भस्य क्षेमाय परक्षणाय च्छयास्वभर्तुरागम
नानन्तरं प्रसूतये च परमया भक्त्या सती ऋषिं नारदं पर्यचरत् शुश्रूषितवती १४ ततस्तां देवर्षिरनुजग्राहेत्याह श्रीहनुमते नमः श्रीराम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

म८ भा१२

स.
भा. टी.
वी.
३२

एवंज्ञानेयोगस्यभगवत्साक्षात्कारावरभक्तियोगांगत्वमुक्तं स्तैरुद्दीद्दशिस्त्रियादिनोक्तं सद्भावैः प्रकारैस्तेनिश्रुद्दैरुद्धवयात्मयोगैरित्युक्तमेवदेहविलक्षणात्मस्वरूप
विमर्शनंचसप्रकारंप्रपंचयतिपंचभिः अष्टाविति तावद्भूमिरापोनलोवायुःखंमनोबुद्धिरेवच अहंकारइतीयंमेभिन्नाप्रकृतिरष्टधेत्युक्ताः अष्टौप्रकृत
यः अत्रभूम्यादिशब्दैर्गंधादितन्मात्रसहितानिपृथिव्यादीन्युच्यंते बुद्धिशब्देनमहत्तत्वं त्रयः सत्वरजस्तमस्तुगुणाः एवप्रकृतिगुणाः एवनत्वात्मनोगुणाः षोडशविका
राविकृतयः तेचएकादशेन्द्रियाणि पंचभूतानि बुद्धिस्थितं वाएवं सेषष्षोडशश्चापिगीतावाक्यादिषु प्रोक्ताः पुमानेकः एकस्मिन्शरीरेएकः पुमान्जीवः प्रोक्तः
कुतः समन्वयात् स्वस्वेव प्रतिशरीरंनियमेनसुखदुःखप्रतिसंधानजीवभ्यवस्थाकृच्छ्राचार्यैरात्मावस्थायाः सम्यगन्वयादुपपन्नेरित्यर्थः सर्वशरीरेष्वजी
वैकत्वेउक्तविधाव्यवस्थानुपपन्नस्यादितिभावः २२ देहस्तुसर्वसंघातः प्रकृतिविकृतिसंघातात्मकः सचजगज्जंगमस्स्थास्नुः स्थावरश्चेतिद्विविधः एवंवस्तुस्थि
तिरितिभावः अस्त्वेवंवस्तुतस्यात्मविवेचनस्यकिमायातंतत्राह अत्रैवदेहेस्वपुरुषः प्रत्यगात्मामृग्यः विवेचनीयः किंकुर्वन्नेतीतिशास्त्रप्रसक्तदेहप्रकारयो

वि

अष्टौप्रकृतयः प्रोक्तास्त्रयस्त्वहितद्गुणाः विकाराः षोडशाचार्यैः पुमानेकस्समन्वयात् २२ देहस्तुसर्वसंघातो
जगत्स्थास्नुरितिद्विधा अत्रैवमृग्यः पुरुषोनेतिनेतीत्यतन्द्रितः २३ अन्वयव्यतिरेकेणविवेकेनैवशान्तात्मना
सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः २४

म८ म८
तकः इतिनेतिनएवं विधोनभवतिगंधवान्नवीतरूपवान्भवतीत्ये
म८ वैकारेणेत्यर्थः अतद्रात्मव्यतिरिक्तं पत्यर्थिभ्यादिवस्तुतसजन्तस्मिन्नात्मबुद्धिमकुर्वन्तद्विलक्षणस्त्वात्मान्वेषणीयइत्यर्थः अनेनाहंममेत्यस्य
ज्ञावंदेहरोमोहज्जंस्त्येजेदित्युक्तंविवृतंभवति २३ तथात्मयोगैरित्युक्तानात्मयोगान्विवृण्वन्तेष्वप्येतद्स्माह अन्वयेति अन्वयव्यतिरेकेण
२३ न्वयेनव्यतिरेकेणवाहंजानामीच्छामिद्वेष्मीत्येवंबुद्धीच्छादीनांज्ञानरूपाणांज्ञातृत्वमर्थएवान्वयेनव्यतिरेकेणममशिरः पाणिः पादं इतिसर्वावय ६५
वेभ्यः व्यतिरेकप्रतीत्यान्वितस्येवंरूपेणाविवेकेनात्मनोविभागेनउच्यतानिर्मलेनात्मनाऽहमहमितिप्रतीयमानेनात्मनाऽहंप्रतीत्यान्वेत्यर्थः सर्गस्था राम
नसमाम्नायैः सर्गस्थित्यादिपरेषु तंतवाक्यानुसंधानैः स्तैरुपायैर्देहादिभ्यः परमात्मानंविमृशद्भिरसत्वरैरव्यग्रैश्चवैः मुनिभिरात्मान्वेष्यइति ३२
पर्वणान्वयः सन्मूलाः सौम्यमाः सर्वाः प्रजाः इत्यादिसर्गस्थानादिसमाम्नायार्थानुसंधानेनदेहेभ्योन्यमात्मविमर्शनोपायाः परमात्मेशेषत्वतद्वशरीरत्वा
दयोऽवगताभवतीत्यभिप्रायेणसर्गस्थानसमाम्नायैरित्युक्तं २४ अन्यानपितद्विमर्शनोपायानवस्तैः प्रत्यगात्मस्वरूपंदेहैर्विलक्षणमकोऽहंमित्याह श्री

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विकार

अथस्वधर्मैरेवात्मनो देहादिभ्यः पृथक्त्वमाह आत्मेतिविशेषणनिर्देशः आत्माप्रसंगात्मा नित्यउत्पत्तिविनाशरहितः अव्ययोपक्षयरहितो नविक्रियो वृध्यादिभावविकारः
तःयथपित्रादेर्देहस्यमात्मनद्दसनैर्नैव. शुद्धाविकाररहितस्वमुक्तंतथापिफलानामिववृक्षस्येति देहांतवदात्मायाफलगतोलिसायनाश्रयोपित्रस्य।
त्प्र२ स्वगतोत्पत्त्याश्रयत्वमेवदेहादौतथात्मा अयद्व्यावपि स्वगतोसत्तापत्तश्रयत्वंप्रसक्तंतदनेननिषिध्यते एकंवस्व नोन्यतोयाप्रज्ञावाविकाररहित।
इतिफलितं शुद्धःप्राकृतरागादिगुणैरकलुषितस्वरूपः एकःज्ञानैकाकारतयासर्वेषुदेहेष्वेकरूपः एकोग्नीहिरितिवदात्माप्यभिप्रायकएकत्वम्पैदेहा॥
ननुव्यत्तैकत्वाभिप्रायकःआत्मव्यक्तिबहुत्वस्यबहुप्रमाणप्रतिपन्नत्वात् क्षेत्रज्ञःशरीरंजानातीतितथामेमंशरीरमितिजानीसर्वः अनेनज्ञानाश्रयत्वमुक्तं
स्वंपरप्रतीतिस्वदृक्स्वयंप्रभासमानःअनेनज्ञानस्वरूपत्वमुक्तं आश्रयःदेहेंद्रियादीनामाधारःहेतुर्देहेंद्रियव्यापारहेतुःव्यापकःधर्मभूतज्ञानेनव्यापकःस्वरूपस
तुल्यादसंगीजीवांतरेणसंबंधरहितोऽनावृतःस्वरूपस्वभावतिरोधानरहितःइंमुक्तावस्थंस्वाभाविकंजीवात्मस्वरूपंपदाऽनावृतःस्वरूपतिरोधानरहितःबद्ध

आत्मानित्योव्ययःशुद्धएकःक्षेत्रज्ञःआश्रयः अविक्रियःस्वदृग्धेतुर्व्यापकोसंगयनावृतः १९ एतैर्द्वादश
भिर्विद्वानात्मनोलक्षणैःपरैः अहंममेत्यसद्भावंदेहादौमोहजंत्यजेत् २० स्वर्णंयथाग्रावसुहेमकारःक्षेत्रेषुयो
गैस्तदभिज्ञआप्नुयात् क्षेत्रेषुदेहेषुतथात्मयोगैरध्यात्मविद्ब्रह्मगतिंलभेत २१ श्रीगणेशायनमः श्री॥

क्षेत्र

शायांधर्मभूतज्ञानस्यचकर्मणातिरोहितत्वाद्देहस्वनियःव्ययज्ञानशुद्धःदेवमनुष्यादिरूपेणनानाविधःज्ञानात्माश्रयोऽप्येवंयावत्सत्त्वमाश्रयःपरागहेतुर्व्याप्यति
स्पुत्रत्वादिसंबंधवान्संकोचवांश्चेतिभावः १९ अस्त्वेवंदेहात्मनोर्वैधर्म्यंततःकिमतआह एतैरिति विद्वानिसंदेहात्मनोर्याथात्म्यविदेतैरुक्तैरात्मनोलक्ष
णैःपरैरुत्कृष्टत्वापादकैर्देहादावादिशब्देनदेहसंबंधिपुत्रादिसंग्रहः अहंममेत्यसदभिमानंमोहजमज्ञानजंत्यजेद्देहात्माभिमानादिकंसत्यजेत् लक्षण
लक्षितात्मस्वरूपावलोकनपरोभवेदितिभावः २० ननुत्यक्तेकिमतआह स्वर्णेति यथाहेमकारःतदभिज्ञःहेमकृतोनांग्रावणामभिज्ञःयथास्वक्षेत्रेषु
मग्रावणाहलतिभक्तिषुयोगैरन्वेषणादिभिरुपायैराप्नुयात् आत्मनिरोधः विशेषविपरिणामेनानुषंगोवा यथाहेनादिभिरुपायैर्जीवतदेहमाप्नुयात्
रूपेषुक्षेत्रेषुआत्मयोगैर्देहविलक्षणात्मयाथात्म्यविवेचनसाधनैरुपायैरात्मविद्उक्तविधात्मयाथात्म्यदर्शीयस्मात् द्रव्यलक्षणःस्वरूपेणगुणेनचनिरतिशयबृहतः
पुरुषोत्तमस्यगतिमवाप्तिंतथायथामविज्ञानेलभेतप्राप्नुयात्यथावस्थितात्मसाक्षात्कारंलभेतेतिभावः २१ श्रीमतेरामानुजायनमः श्रीयेनमः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स. भा. टी. ३३

एतदिति एवं बुद्धिसंबंधस्य बहारूपस्य संसारः स्वप्न इवास्थिरत्वात् अप्रतुलः अतएवापार्थोऽपि पुंसः अस्यात्मनोऽर्प्यते प्राप्यते क
र्तृः पुंसः अयमत्रविवक्षया आपत्ती पुंसः संसारः प्राप्यते इत्यर्थः बुद्धिसंबंधहेतुं बध्नन्संसारं विशिनष्टि अथ कथमुक्तविधस्यात्मनोऽज्ञानमू संभा.स्कं.७ भा.२
लमिति अज्ञानं कारणं यस्याज्ञानमूलः स्वपरयाथात्म्याज्ञानफलकबुद्धीन्द्रियसंबंधनिमित्तदेहतत्संबंधिरूपः संसार इत्यर्थः कथमुक्तवि
धस्यात्मनोऽज्ञानसंबंध इति शंकां निराकुर्वन्संसारमेव विशिनष्टि गुणकर्मनिबंधन इति गुणकर्माधीनः सत्वादिगुणपरिणामानुगुणकर्म
परिपाकाधीन इत्यर्थः अयं भावः स्वभावतः सर्वज्ञस्यात्मनः आत्मानित्याव्ययइत्याद्युक्तविधस्यानादिकर्मणा सत्वाद्यारूढगुणसंसृष्ट
त्वात्तत्कर्मपरिपाकवशाद्गुणपरिणामः ततः स्वपरयाथात्म्याज्ञानं ततो गुणकर्मानुरूपपरमात्मस्वरूपबुद्धीन्द्रियसंबंधः ततो देहतद्बंधुसंबं
धरूपः संसारस्ततो देहात्माभिमानः ततः पुनः कर्म ततः पुनर्गुणपरिणामादिरित्येवं परिवृत्तिर्यावत्कर्मोपायमनुवर्तत इति २८ एतादृशमुक्तवि
धस्यात्मनो देहात्मभ्रमादिरूपाज्ञानमूलककर्मनिमित्तः संसारस्तस्माद्भवद्भिः कर्मनिर्हरणोपायोऽनुष्ठेय इत्याह तस्मादिति तस्मात्संसारस्याज्ञान

एतद्धरो हि संसारो गुणकर्मनिबंधनः अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवार्प्यते २८ तस्माद्भवद्भिः कर्तव्यः कर्मणो त्रिगुणा
त्मनां बीजनिर्हरणं योगः प्रवाहोपरमो धियः २९ तत्रोपायसहस्राणामयं भगवतोदितः यदीश्वरे भगवति यथा यैरंजसा रतिः ३०।

प्र. २

मूलगुणकर्मायतत्वात्त्रिगुणात्मनोऽस्मत्सत्वादिगुणत्रयपरिणामहेतुत्वात्तु बीजं मूलं देहात्मभ्रमादिरूपं तस्य निर्हरणं निर्हरणोपायात्मको योगोऽव
श्यमाणः सर्वथा धियः प्रवाहः शब्दादिविषयकं ज्ञानं तस्योपरतिरूपो भवद्भिः कर्तव्यः २९ वक्ष्यमाणभगवद्भक्तियोगस्य बीजनिर्हरणोत्तमो
पायत्वमाह तत्रेति तत्र बन्धबीजनिर्हरणोपाये कर्तव्ये सति उपायसहस्राणां मध्ये अयमेवोत्तम उपायः कथितो भगवता कोऽसौ यः साध
नैर्भगवतीश्वरे अनुरागः प्रीतिरंजसा सुखेन यथा स्यादित्येवं यः साधनैरनुगृहीता भवति रतिरिति स एव उत्तम उपाय इति नाहं वेदैर्न त
पसा न दानेन न चेज्यया भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुनेति नमे भक्तः प्रणश्यतीत्यादिना तत्र तत्र भगवता प्रोक्त राम ३३
इत्यर्थः रतिरित्यनेन निरतिशयप्रीतिरूपा भक्तिरुच्यते तस्यास्तु साक्षाद्भगवत्प्राप्तिहेतुत्वं संसारनिवर्तकत्वं च सूच्यते
३० सात्विकैः साधनैर्निष्पाद्यत इत्युपायोपासाधनानि वदन्तैरूपकृतेन ध्यानयोगेन निष्पद्यत इत्याह गुरुशुश्रूषये
त्यादिभिश्चतुर्भिः श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्री

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

बुद्धेरिति जागरणंस्वप्नः सुषुप्तिरितिवृत्तिभिर्बुद्धेर्वृत्तयः व्यापाराः ताः वृत्तयो येनैवानुभूयंतेसएवपरः देहेंद्रियबुद्ध्यादिभ्योन्यः अध्यक्षः।
देहादीनांद्रष्टाधारकोवापुरुषः प्रसंगात्। जागरणंनामबाह्येंद्रियव्यापारानुभवोवृत्तिःस्वप्नःतदनुविषयासुषुप्तिर्बुद्धिवृत्त्युपरमःतु
परमोपितत्संबंध्येवेतिबुद्धेर्वृत्तयः इत्युक्तं एतद्वृत्तिचयद्ज्ञानाश्रयत्वेनपः प्रतीयतेसप्रत्यगात्मेतिभावः २६ एतदेवसदृष्टांतंविश
दयन्नेवमादिभिरुपायैरात्मस्वरूपंबुध्येदित्याह एभिरिति एभिस्त्रिवर्णैः त्रिविधैःसत्वादिगुणत्रयमूलकैर्वा पर्यस्तैरस्थिरैः क्रियोद्भ
वैःपुण्यपापात्मककर्मनिमित्तैर्बुद्धिभेदैर्बुद्धिवृत्तिभेदैर्जागरादिभिरुपलक्षितमात्मनःस्वरूपंविद्याद्यथागंधैःकुसुमादिगतैरुपलक्षि
तंतदाश्रयंवायुंबुध्यतितद्वत् कुतःअन्वयात्जागरणाद्यवस्थात्रयेप्यन्वयाद्वृत्तेःयथापवनादिकर्मणाततसंकजादिकु
सुमादिगतंगंधमानीयतदाश्रयतयातदन्वितंप्रवहंतंवायुंततःपृथग्भूतमुपलक्षितपार्थिवकुसुमादिगतस्यगंधस्यनवायुरा

बुद्धेर्जागरणंस्वप्नःसुषुप्तिरितिवृत्तयः ताःयेनैवानुभूयंतेसोऽध्यक्षःपुरुषःपरः २६
एभिस्त्रिवर्णैःपर्यस्तैर्बुद्धिभेदैःक्रियोद्भवैः स्वरूपमात्मनोबुध्येद्गंधैर्वायुमिवान्वयात् ॥ २७

यः तदन्वयात्त्ववायोस्तदाश्रयत्वंमतएवतदन्वयापायेकेवलस्पर्शगुणस्यवायोरुपलंभः ततःगंधास्पर्शोव वायुःस्वाभाविक
स्पर्शगुणइतितेनयथोपलक्ष्यतेतथाबुद्धिभेदानस्वभावतआत्मगताः तेषांस्वाभाविकत्वेन्यतमबुद्धिभेदेन्यतमस्योपलंभप्रसंगःकिं
तुकर्मीयतबुद्धिसंबंधप्रयुक्ततस्तदन्वयात्तदनुभवोपलंभःस्वभावतस्त्वात्मातदन्वितस्वततःपृथग्भूतइत्येवंतंबुध्येदित्यर्थः २८
तदेवंदेहादावहमावव्यागप्रकारोदेहादिविलक्षणत्वेनात्मविमर्शनप्रकारश्चोक्तः अथैवंभूतस्यप्रत्यगात्मनःकुतस्तेदेहादिसं
बंधरूपःसंसारोयस्मिन्नसज्ज्ञावहस्याशंकायांत्रिवर्णैःक्रियोद्भवैरितिपरिहारःसूचितः तमेवविशदयितुंस्वरूपयाथात्म्याज्ञा।
नमूलकं देहात्मभ्रमादिरूपानादिमोहनिमित्तगुणकर्मसंबंधप्रयुक्तःसंसारस्तत्रएवात्मनःस्वरूपप्रयुक्तत्वाभावादपुरुषा
र्थोऽयौपाधिकत्वाद्याबद्रुपाधिबुद्धिसंबंधस्तावदनुवर्ततइत्याह श्रीहनुमतेनमः जपतेतराम् श्रीगणेशायनमः श्रीः॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भा॰ टी॰ ३४

क्वचिद्धसन् पुनः श्वसन् श्वासं मुंचन् गतत्रपो निर्लज्जः हे नारायण जगत्पते हरे इत्येवं वक्ति तदेवसुतत्स्यान्वयः इयमेव भक्तियोगस्थिति।
व्यत्ययस्येति भावः ३६ तदा एवं निष्पन्नभक्तियोगावस्थापां पुमान् उक्त भक्तियोगेनिष्ठः महीयसा सर्वोत्तमेन भक्तियोगरूपेणोपायेन
प्रारब्धावसाने मुक्तः समस्तं बंधनं भगवत्प्राप्ति विरोधि पूर्वोत्तरपुण्यपापात्मकायसूर्येयस्मात्तादृशः निर्दग्धः नितरां दग्धः बीजानुशयः
संसृतिमूलभूतकर्मवासनात्मको यस्य तस्य भगवतो भावः प्रकार आकृतिरित्यर्थः तस्य भावो भावनानुध्यानं तेनानुकृत आशयोंतःक
रणं या कृतिर्विग्रहश्च यस्य भगवता समानरूप इत्यर्थः अधोक्षजं भगवंतं उपैति प्राप्नोति ३७ उपेत्य ततः किमत आह अधोक्षजेति इहलो
के अशुभात्मनः तापत्रयदुःखितमनसः शरीरिणः संसृतिचक्रं चक्रवत्परिवर्तमानाः अनिष्टप्राप्तेर्युक्तस्य शातनं निवर्तकमधोजस्य
अशुभस्य प्राप्तिरिति यावत् एवं भगवत्प्राप्तेरनिष्टनिवर्तकत्वमुक्तं अथ इष्टप्रापकत्वमाह तदधोक्षजालंभनमेव ब्रह्मनिर्वाणसुखं

यदाग्रहग्रस्त इव क्वचिद्धसत्याक्रंदते ध्यायति वंदते जनं मुहुः श्वसन्वक्ति हरे जगत्पते नारायणे
त्यात्ममतिर्गतत्रपः ३६ तदा पुमान्मुक्तसमस्तबंधनस्तद्भावभावानुकृताशयाकृतिः निर्दग्ध
बीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजं ३७ अधोक्षजालंभमिहाशुभात्मनः शरी
रिणः संसृतिचक्रशातनं तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरं ३८ श्री

त्संबंधीयनिर्वाणोमोक्षस्तद्दशायामनुभूयमानं इत्यर्थः तत्सुखं यस्मिंस्तादृशं यद्वा निर्वाणं निरतिशयानंदः ब्रह्मत्वं पंचनिर्वाणं तत्सु
खमनुभवद्रूपं यस्मिन्तादृशं बुधा ब्रह्मविदो विदुः एतादृशानिष्टनिवर्तनेष्टप्रापण धर्म भगवत्प्राप्तिसाधनभूतस्तद्भक्तियोग स्वतोयं हृदये हृ
दीश्वरं ते अपगतो हृदयस्थानगते जीवहृत्स्थम् अनेन तमात्मस्थमनुपश्यंति धीरास्तेषां शांतिः शाश्वती नेतरेषां इति श्रुत्यर्थः प्रसभिज्ञापते
हृदि अयमात्मा प्रतिष्ठित इतिश्रुतेः तस्मिन्नियंतृतया वस्थिते हृदयपुंडरीके भगवंतं भजध्वं ३८ तदेवं निरतिशयानंतफलभगवत्प्राप्ति राम
साधनतद्धर्मानुष्ठानस्य दुःशकत्वाशंकानिरासनं श्रुत्वा प्रीणयते वहृयास इत्युपक्रम्य तद्धर्मं तदनुष्ठान प्रकारकथनेन तदाशंकां निर। ३४
स्यैवमस्मिन्सुकरे भगवद्धर्मानुष्ठाने न कोपि प्रयास इत्युपसंहरन्वैराग्यजननाय स्वर्गस्वाराज्याधर्वाचीनपुरुषार्थस्य सातिशयासास्थिरत्वं
वक्तुं तावदैहिकत्वपार्थिवमिकस्यैहिकलौकिकसुखस्य तुच्छतामाह श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

32

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गुरुशुश्रूषया गुर्वोः परिचर्यया गुरुभ्यस्तत्त्वश्रवणेच्छया वा भक्त्या गुर्वां भक्त्योपासनेन सर्वेषां गुर्वर्पितानाम लभ्यत इति लाभः स
र्वसुलभं यत्तस्य समर्पणेन यथाशक्ति तदपेक्षितस्य समर्पणेनेत्यर्थः साधुषु या तथा भगवद्भक्तानां सङ्गेन साधवः शमदमाद्युपेता भागवता
लतागृ२ मन्यथा साधुलक्षिता भक्ताः तेषां सङ्गेन च ईश्वराराधनेनार्चाविग्रहाराधनेन हृदयकमलस्थमात्रोपचारैराराधनेन वा अर्हणादिभिस्तत्र
शधनस्य वक्ष्यमाणत्वात् ३१ तत्कथायामीश्वरकथायां श्रद्धया श्रवणात्तत्त्वाद् ईश्वरस्य गुणानां कर्मणां च कीर्तनैः तस्येश्वरस्य पदाम्बुज
यो ध्यानात् तल्लिङ्गस्यार्चाविग्रहस्येक्षणार्हणादिभिर्दर्शनपूजादिभिः आदिशब्देन प्रणामपरिक्रमादिसंग्रहः ३२ किं च भगवानीश्वरः सर्वभूते।
ष्वन्तरात्मतया वर्तते अतः सर्वाणि भूतानि भगवदालकानीति बुद्ध्या यथा भक्ति यथायोग्यं तद्भूतानामपेक्षितैः कामैः साधु मानयेत् संमानयेदित्य
९७ नि. नेन च ३३ इत्येतैः साधनैर्जितैः षण्णां काममक्रोधलोभमदमात्सर्याणां वर्गो भवेत् ईश्वरे भक्तिः क्रियते कर्तव्येत्यर्थः भक्तिरहरहः प्रीतिर

गुरुशुश्रूषया भक्त्या सर्वलाभार्पणेन च सङ्गेन साधुभक्तानामीश्वराराधनेन च ३१ श्रद्धया तत्कथायां च
कीर्तनैर्गुणकर्मणां तत्पादाम्बुरुहध्यानात्तल्लिङ्गेक्षार्हणादिभिः ३२ हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः इ
ति भूतानि मनसा कामैस्तैः साधु मानयेत् ३३ इति निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे वासुदेवे भगवति यया सं
लभते रतिं ३४ निशम्य कर्माणि गुणानतुल्यान्वीर्याणि लीलातनुभिः कृतानि यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गा
यति रौति नृत्यति ३५

वमहरहः क्रियमाणाया ध्यानालिकाया भक्तेः प्रीत्यालिकां श्रेष्ठां भक्तिं लभत इत्याह वासुदेव इति यया अह
रहः क्रियमाणया गुरुशुश्रूषादिसाधनानुष्ठितया नु ध्यानालिकया तत्तरोत्तरसान्द्रात्कारे ऊर्मिकया च तत्परपर्यायया वासुदेवे भगवति रतिं परमप्रे
मपरं पर्यायभक्तानि रतिं तत्ताम्बुशुभ्रालिकां प्रीतिरूपां लभत इत्यर्थः ३४ एवंविधभक्तियोगनिष्पत्तिलिङ्गानि वदंस्तेन परि।
निष्पन्नभगवद्भक्तियोगेन परमात्मानं आप्नोतीत्याह निशम्येति त्रिभिः यदा भगवतो गुणानतुल्यानितरसाधारणान्
लीलातनुभिः स्वेच्छया प्राप्ताः कृतदिव्यावतारविग्रहै रामकृष्णादिभिः कृतानि कर्माणि चरित्राणि निशाम्यातिहर्षेण।
उत्पादिताः पुलकाः रोमाञ्चाः अश्रूणि आनन्दबाष्पविन्दवश्च तैः गद्गदं यथा स्यात्तथा उत्कण्ठया उच्चैर्गायति रौति नृत्यति च ३५।
क्वचिद्रुदत्यच्युतचिन्तया क्वचिद्धसति क्वचिद्ध्यायति क्वचिन्नमन्भगवदालकं वंदते नमस्करोति श्रीगणेशायनमः॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ ३५

किंत्वैषयिकसुखलिप्सया कुर्वन्नपि न तत्प्राप्नोति किंतु तद्विपरीतं दुःखमेवाप्नोति अतस्तत्परित्यज्य भगवंतमेव भजेतेत्याह यदर्थमिति विद्वांसमात्मानं म
न्यत इति विद्वन्मानी केवलकर्ममीमांसाप्रवित्तबुद्धिरित्यर्थः नरः यदर्थं यद्वैषयिकसुखार्थं इहलोके असकृद्वारंवारं कर्माणि यागादीनि करोति सततो
ऽभिलषितसुखाद्विपरीतं फलं दुःखात्मकमेवामोघमवश्यं विंदते प्राप्नोति ४२ तदेव दर्शयति सदेति यः पुमाननीहायाः निष्कामतायाः वैषयिकसु
खार्थव्यापारारंभात् प्राङ् व्यापाराद्रहितः सुखावृतः सुखेन व्याप्त आसीत् स एव ईहया प्रारंभेन व्यापारेण हेतुना दुःखमेवाप्नोति स्वर्गादिसुखार्थं यागादि
व्यापारेण दुःखमेवाप्नोतीत्यर्थः भगव[.]दर्थभक्तियोगानुष्ठानरूपायामपि निरतिशयानंदमयवस्तुभवनरूपं सुखमेवाप्नोति तत्सुनिश्चितं निरतिशयप्र
ज्ञानं न भवति स्वर्गादिर्थयागादिकं कुर्वाणस्तु जीवद्वशायां वित्ताद्यर्जनेन तदनुष्ठानप्रयासरूपं दुःखमेव तत्सुखानिवृत्ताया अस्थिरफलरूपं स्वर्गे
स्थानं दुःखमेव भवति स्वर्गात्पुनरवरोहणादिकं तल्लिप्सितसुखप्रदं पुनः नरकमिति विवक्षितमभिप्रेतं ४३ किंचेहलोके पुरुषः यदर्थं यस्य देहस्य प्रयोजनाय कामान् तदिति कामाः कर्माणि परं ता

यदर्थमिह कर्माणि विद्वन्मान्यसकृन्नरः करोत्यतो विपर्यासममोघं विंदते फलं ४२ सदाप्नोतीहया दुःखमनी
हायाः सुखावृतः ४३ कामान्कामयते काम्यैर्यदर्थमिह पुरुषः स वै देहस्तु पारक्यो भंगुरो यात्युपैति च ४४।
किमुत व्यवहितापत्यदारागारधनादयः राज्यकोशगजामात्यभृत्याप्ता ममतास्पदाः ४५ किमेतैरात्म
नस्तुच्छैः सह देहेन नश्वरैः अनर्थैरर्थसंकाशैर्नित्यानंदमहोदधेः ४६ श्री नन्वाद्यैर्दीन्कामैः करणघ्नकामोऽस्तु ति।

तेः॰

साधनैः काम्यते स एव तु देहः पारक्यः श्वसृगालादिभक्ष्यः भंगुरो न श्वरश्च यात्युपैति करावित्तिहीनमालिंगति कदाचित्र प्राप्नोति जहातीत्यर्थः ४४
देहस्यैवेयमवस्था किमुत देहानुबंधिनां दारादीनामित्याह किमिति देहे नैव साक्षात्संबंधः दारादिभिस्तु देहद्वारेति व्यवहितं तमुक्तं व्यव ऽ॰
हितापत्यदारादयः अगारं मंदिरं आदिशब्देन पशुपुत्रादयः कोशो भांडागारादि पट्टिका बले चतुरंगादुक्तं भृत्याः परिवारकाः एते सर्वे ममतास्पदाः
ममे[.]त्यभिमानविषयाः उपयंत्यपयंतीति वा तेषु किमु वक्तव्यमित्यर्थः ४५ ननु नेहत्स्यो विषयार्थः अपरः किं वा त्मार्थ इति चेत्तर्हि नित्या राम
नंदसुखरूपस्यात्मनः स्वतः शुद्धस्य विशुद्धेर्वा किमेतद्वैषयिकं सुखमित्याह किमेतैरिति नित्यानंदः सुखरसः स एव वा रसकं तस्यात्मनः स्याल ३५
नश्वरैर्देहेन साकं नश्वरैरेतैः सवस्तु के रसैवैस्तुतो नानर्थैः पुरुषार्थो न वा अनर्थैरर्थसंकाशैः पुरुषार्थाभासैः किं प्रयोजनं तद्वद्भजनीयं तु
खमतितुच्छमित्यर्थः ४६ किंच बाल्यायासेनार्जितमपि वैषयिकसुखमनुभूयमानदुःखपिशाचेन समवतरत्येव भावा दसदभावादित्याह श्री

33

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कस्येति चेत्। हे मुग्धबालकाः स्वस्वकीयहृत्स्थे डिंडवदहराकाशे वसतः वर्त्तमानस्य सत्यकामस्य विमुक्तिगुणाष्टकाश्रयस्यात्मनः परमात्मनो टी.५
श्रीयदुशैलवासिनो सामान्यतः सार्वभौमतया न स्युः वासुदेवो हि सर्वमित्यादि श्रुतेः सकलस्य सकलस्य हरेः कृपासनेनैको वा दीनः स यासः नैकोपीत्यर्थः। विषयाणां शरीरेण
यथा तैर् नैनैः किं न किमपि तैस्तैर् उक्तामिति भावः डिंडवस तदस्मेनैन यथा वा न्याः यमाकाशात्सावनेषां तद्दहराकाशइति हृदयविधौ दहरभावात्म
शक्तस्तैरभिमतः तत्र हृदयाकाशेपि वासी वसुस्वरूपायेवं इमौ विपुल सनातिरिक्त जगदाधारत्वे हृत्पुंडरीकस्य दहराकाशस्य प्रतिपादितस्यभावस्य
स्वभावस्वरूपयेवं इमौ विपुल स्वातिमज्ञास्येशासि पञ्चनातिरिक्त सर्वेतस्मिन्समाहितमिति सर्वं हृत्पुंडरीके दहराकाशान्वेषण वर्त्तमानस्यापहतपा
प्मत्वादिगुणाष्टकयुक्तस्य हरेः कृपालनेनेस्तु शकमिन्यभिप्रायः ३९ किंविषयो यथा तैर्नैरिरस्येनेन स्वचितेविषयाणामल्पास्थिरत्वसातिशयत्वरूपं तु
छत्वमुपपादयति रायः धनानि सुतान्यश्वादिशब्देनाम्यपिशब्दयोर्दहारुवंधिनो निवसिताः महीक्षेत्रमाजीविका नृपं विषयाय कुंजरा गजाः तेषां

कीति प्रयासोऽसुर वालका हरेः कृपासनेनैव हृदि डिंड्वसतः स्वस्यात्मनः सद्गुरोरशेषदेहिनो सामान्य।
तः किं विषयोपपादनैः ३९ रायः कलत्रं पशवः सुता दयो गृहा महीकुंजरकोशभूतयः सर्वेर्थकामाः क्षण
भंगरायुषः कुर्वन्ति मर्त्यस्य किय प्रियं चलाः ४० एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न निर्म
लाः तस्माददृष्टश्रुतदूषणं परं भक्त्यैक मीशं भजतात्मलब्धये ४१ श्रीमते रामानुजाय नमः श्रीः।

केशाः शालाः धनकोशस्य रायः इत्यनेनात्मत्वात् भूतयः भोगभोगोपकरणादि सम्पदः सर्वे ते अर्थकामाः काम्यमानार्थाः क्षणेनास्य कालेन
भंगुरमायुर्वस्यायेषां ते तथा ते च चलाः अस्थिराः मर्त्यस्य मरणशीलस्य पुंसः कियत्प्रियं सुखं कुर्वन्ति न किंचिदसातिशयमस्थिरमल्पमेवस्तु।
स्वंजनयेति न तु निरतिशयमनंतं स्थिरं चेत्यर्थः ४ अथैतद्दृष्टांतेन स्वर्गादेरपि सातिशयाल्पास्थिरत्वान्याह एवं हीति यथा देहप्रभृतिजन्मा
नि सुखानि तु तान्येवं क्रतुभिर्यागादि कर्मभिः कृताः संचिताः अमी स्वर्गादयो लोकाः अपि क्षयिष्णवः नश्वराः सातिशयाः न निर्मलाः दुःखमि
श्राश्चेत्यर्थः अत एव यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते इत्यादि श्रुतेः इह वा यत्र परीक्ष्य लोकान्कर्म
चितानित्यादि श्रुत्यर्थोपि प्रतः यतस्त्वेवं तस्माददृष्टश्रुतदूषणं न विद्येते दृष्टं श्रुतं वा दूषणं यस्य श्रुतिस्मृतिभ्यामदूषितं किं तु प्रशंसितमित्यर्थः १२
तं भक्त्यैवोपायेन लभ्यं परमपुरुषमात्मलब्धये परमात्मलाभाय आत्मनः स्वात्मने भजत अन्यथा संसरतां आत्मनो नतः स्याद्वरत्वादिशब्दाभावाच्छास्नलापतेत्तस्मादितिभावः ४१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ ३६

सर्वेषामपीतिद्वाभ्यां स्वकृतैः स्वसृष्टैर्महद्भिर्भूतैः पृथिव्यादिभिः कृतानां सृष्टानां भूतानां देवादीनां सर्वेषां भगवान् बीजसंज्ञितः आदिकारणभूतः।
आत्मा च स एव नरतिर्यगादिषु देहेष्वन्तः प्रविश्य नियन्ता नानादेहगतोऽपि सर्वेषां साधारण इति भावः ५१ अतो देवादिजातिविभागमन्तरेण यः क
श्चिन्मुकुन्दचरणं भजन् स्वस्तिमान् निवृत्तानिष्टः प्राप्तेष्टश्च स्यात् एवं यथा वयमिति वयमसुरा अपि भगवन्तं भजन्तः स्वस्तिमन्तो ऽभूम तथेत्यर्थः
५२ यथा वयमिति दृष्टान्तस्वारस्याद्भगवतः सर्वभूतसाधारण्यप्रतिपादनस्वारस्याच्च निरुपाधिको विधाय स्वाभिसंबन्धज्ञानपूर्वकमनन्य
प्रयोजनेन भजन्तः स्वस्तिमन्तो भवन्त्यन्यथानुसन्धीहितमात्रं चेतश्चित्तस्य चित्ते तथा च श्रुतिः नान्यः पन्था अयनाय विद्यत इत्यादिका तदेतदुपपादयति
नी॰२ नालमितिद्वाभ्यां हे असुरात्मजाः द्विजत्वादयो मुकुन्दस्य प्रीणनाय प्रीतिजननायालं न समर्थाः किन्त्वनन्यया ऽनन्यप्रयोजनया भक्त्यैव हरिः प्रीयते न
नालमिति द्विजत्वं देवत्वमित्यादिरूपज्ञानादिर्वा
दुपायान्तरं तु विडम्बनेनेत्यत्र मात्रे द्विजत्वमिति वर्णाधिक्योपलक्षकं देवत्वं इति जात्याधिक्यस्योपलक्षकं...

सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः भूतैर्महद्भिः स्वकृतैः कृतानां बीजसंज्ञितः ५१ देवोऽसुरो मनुष्यो वा यक्षो गन्धर्व ए
व वा भजन्मुकुन्दचरणं स्वस्तिमान्स्याद्यथा वयं ५२ नालं द्विजत्वं देवत्वमृषित्वं वाऽसुरात्मजाः प्रीणनाय मुकुन्दस्य न वृत्तं
नी॰३ बहुज्ञता ५३ न दानेन तपसेज्यया न शौचं न व्रतानि च प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बनं ५४ ततो हरौ भगवति भक्तिं कु
रुत दानवाः आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे ५५ दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः खगा मृगाः पापजीवाः स
ति ह्यच्युततां गताः ५६

पलक्षणं बहुज्ञतेति तु शास्त्रजन्यज्ञानाधिक्यस्य वृत्तं पित्रादिपरंपरागतसद्वृत्तेः ५३ दानं पात्रे वित्तत्यागः त
पः कृच्छ्रादि इज्या यागः शौचं स्नानादिकृतं शुचित्वं व्रतानि प्राजापत्यादीनि ५४ यतो भक्त्यैव भगवान् प्रीयते तेनोपायान्तरेणातो हे दानवाः यूयमा
श्रितसंसारबन्धहारिणि सर्वभूतात्मनि तथा नीश्वरे भगवति भक्तिं प्रतनन्यप्रयोजनां कुरुत कथंभूताः सर्वत्रात्मौपम्येनात्मतुल्यत्व
दृष्ट्या स्वस्मिन्निव सर्वशरीरमतेष्वसुसर्वेष्वदयेन उपलक्षिताः ५५ किमेवं भजन्तः केऽपि मुक्ताः अवश्यमुक्ता इत्यत आह दैतेया इति कायाधवादयो नृवृत्रबलि विद्रुग राम
वसेवंधेन मुक्ताः किं पुनरेवं भजतां मुक्तं तत्र इतिवक्ष्यं दैत्यादीनां तदाहरणमाह दैतेयाः इतिरक्षांसि विभीषणादयः स्त्रियः पूतनादयः व्रजौकसो ३६
नन्दादयः शूद्रा अम्ब्रीषादयः खगा जटायुप्रभृतयः मृगा गजेन्द्रादयः ऋक्षादयः सर्वविधाः पापजीवाः अच्युततां भगवत्साध
र्म्यं गताः प्राप्ताः सन्ति हीति प्रसिद्धौ त्रिकालज्ञत्वाद्भगवता प्रह्लादेनैवमुक्तं ५६ अध्यायद्वयोक्तार्थमिनिष्कृष्याथ संहरति श्रीरामः।

सि२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

निरूप्यतामिति हे असुराः संसारे कर्मभिः प्राचीनैः क्लिश्यमानस्य दुःखमतः स्वतो निषेकादिष्ववस्थासु जीवस्य भोगाय यस्या सुखार्थमुद्यमस्तमपि किं
५५२ परंतु लभते तां दुःखमेव स्यात् सुखमल्पमिति भावः यद्वा निषेकादिष्ववस्थासु पितुरेतो मातुरुदरं ततो योनिप्रवेशप्रभृतिषु गर्भवासादिष्ववस्थासु प्राचीनैः क
र्मभिः क्लिश्यमानस्यापि दुःखप्राचुर्यमुक्तं ४६ ननु निषेकाद्यवस्थायाः कर्मनिमित्तत्वात्तानि स्वकर्माण्येव प्रभवन्तु सुखं स्यादित्याशङ्कां निराकर्तुमन्तरे
ण परमात्मोपासनं न कदापि स्यात् कर्मनिवर्त्तत इत्याह कर्माणीति देही आत्मानुवर्त्तिना देहेन तावत्कर्माणि देहान्तरारम्भकानि पुण्यपापात्मकानि कुरुते
तैः प्रारब्धैः कर्मभिर्निमित्तभूतैर्देहं तनुते विस्तारयति तेन पुनः कर्माणि तैश्च पुनर्देह इत्येवं बीजाङ्कुरवत्संसारप्रवृत्तिर्न निवर्त्तत इति न कदाचिदपि नि
श्शेषकर्मक्षय इति भावः कुत इत्यत्र परिशेषमाह उभयं देहेन कर्माणि कर्मभिर्देह इत्येतदुभयमविवेकतः स्यात् परमात्मोपासनया ज्ञानोदये
तु भवतीत्यर्थः ४७ एवं वैराग्योपायं ऐहिकामुष्मिकसुखस्याप्यस्थिरत्वाद्दुःखमिश्रत्वान्नश्वरत्वात्सकलप्रतिपाद्यमुक्त्वा भजतां च यथा सर्वे पुरुषा
र्थाः सुलभास्तथाप्यनन्यप्रयोजनत्वेनैव तद्भजनं श्रेय इत्याह तस्मादिति कर्मणः परिवृत्तिः संसारस्य कदाप्यनिवृत्तेर्दृष्टादृष्टैहिकसुखस्याल्पत्वा

निरूप्यतामिह स्वार्थः कियान् देहभृतोऽसुराः निषेकाद्यवस्थासु क्लिश्यमानस्य कर्मभिः ४६ कर्मा
ण्यारभते देही देहेनात्मानुवर्तिना कर्मभिस्तनुते देहमुभयं त्वविवेकतः ४७ तस्मादर्थाश्च कामाश्च ध
र्माश्च यदपाश्रयाः भजतानीहयात्मानमनीहं हरिमीश्वरं ४
दस्थिरत्वाद्दुःखमिश्रत्वात्तद्भयत्वाच्च तन्निवृत्त्यर्थं निःसंसार
हरिमाश्रितानां संसृतिबन्धहरमीश्वरमनीहयानिष्कामेन भजत हरिं विना नहि धर्मार्थकामाश्च यदपाश्रयाः यदेकवशस्या यदधीनाः।
इत्यर्थः तथा च श्रुतिः ब्रह्मापत्तेर्बहुधा जायमानं विश्वं बिभर्ति भुवनस्य नाभिरिति कोऽह्येवान्यात्कः प्राण्याद्यदेष आकाश ... आ
नन्दो न स्यादिति च यथा लसद्बलदायक एकोबहूनां विदधाति कामानिति च अर्थादयो यदपाश्रया अस्तु हरिमनीहया भजेत तत्त्वेन समस्तपुरुषार्थ
दोऽयमनीहया भजतामनर्थहेतुं संसृतिबन्धं हरतीहया भ... जतां मोक्षं तमात्मानमेव ददाति तिस्त्विति भवति ५ अपि दैत्यकुमाराणां
वैषां ...मात्मनो भगवद्भजनेनाधिकारशङ्कां निराकुर्वन्ननीहया भजतामेवानिष्टनिवृत्तिरिष्टप्राप्तिश्चेति स्वदृष्टान्तेनाह श्रीरामश्री
श्रीराम श्री श्रीराम श्री श्रीराम श्रीरामायनमः श्री श्रीराम श्री श्रीराम श्री श्रीराम श्री श्रीराम श्री
श्रीराम श्री श्रीराम श्री श्रीराम श्रीसरस्वत्यैनमः श्री श्रीराम श्री श्रीराम श्री श्रीराम श्री श्रीराम श्री

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सु॰ टी॰ भा॰ बी॰ ३०

कासीत्तस्यनामकथ येनमाह ससेवेषांवलाधायकईश्वरः कोसावीश्वरः उरुक्रमउरवो लोकत्रयं क्रमाः पादविक्षेपायस्यत्रिविक्रमइत्यर्थः स।

नि२ वहिस्तिपदैस्त्रयमितिन्यायेनयास्त्रयेषे वलोकत्रयाक्रमणरूपमहामहिमशालिनस्तस्यसन्निधौत्वद्बलंकिमद्यतदिदमभिप्रायः नकेवलमुरुक्रमः सर्वेषां

बलंधापकस्ककिंतुसावोजआदीनानामात्मपोषास्त्रक्ष्व इतिपावत् ओजइन्द्रियशक्तिः सहः मनोबलंसत्त्वंधैर्यंबलंदेहबलंइंद्रियाणिचेतेषामय्या।

मयत्वमर्थः किंचसएवासावुरुक्रमः स्वैः समाभ्यधिकः स्वशक्तिभिः स्वांशभूताभिः प्रकृतिपुरुषकालात्मिकाभिः शक्तिभिः रजांविश्वंसृजतिभवतिरक्षत्यत्ति सं

हरतिच स्वयंगुणत्रयेशः सत्त्वादीनांत्रयाणांगुणानामीशोनियंता गुणवश्यादकर्मवश्यइतिभावः ९ ननुशत्रुस्सोकथंममापिबलंस्यादतआह जहीति

त्वमिमतामसनः स्वस्यासुरभावंजहिसजसमंक्षिप्ताभिचानुसंधानरहितंयथाभवतितथामनोधत्स्वधारयतथासनविशिष्यतेस्तमर्थः सर्वत्रैवकोपिविद्वि

षान्सन्ति किंचात्मैवशात्मनोबंधुरात्मैवरिपुरात्मनइत्युक्तरीत्यात्मैवरिपुर्नतदन्यः कोपिशत्रुरस्तीत्याह ऋतइति अजितादविधेयादतएवउत्पथे

सईश्वरः कालउरुक्रमोऽसावोजः सहः सत्त्वबलेन्द्रियात्मा स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः ९ जह्यासुरंभाव

मिमंत्वमात्मनः समंमनोधत्स्वनसंतिविद्विषः ऋतेऽजितादात्मनउत्पथेस्थितात्तद्धिह्यनंतस्यमहत्समर्हणं १० दस्यून्पुराषण्नविजि

त्यलुंपतोमन्यंतएकेस्वजितादिशोदश जितात्मनोज्ञस्यसमस्यदेहिनांसाधोःस्वमोहप्रभवाःकुतःपरे ११ वृत्रउवाच क्षत्रियकविशिष्य व्यक्तं

त्वंमत्तुकामोऽसियतोतिमात्रंविकत्थसे मुमूर्षूणांहिमेदात्मन्ननुस्युर्विह्वलागिरः १२ श्री

दुर्विधेयस्थितादत्तमानादात्मनोंऽतःकरणादृते।

नसंतिविद्विषइतिपर्वेणान्वयः तस्मिन्मनसःसाम्यमेव तदनंतस्यत्रिविधपरिच्छेदरहितस्यपरमात्मनःसमर्हणंसम्यगाराधनं १० किंचसर्वेशात्रुज।

येनाप्यजितेंद्रियस्यभवाद्दयास्येकेवरंजयशालित्वाभिमानमात्रमेवनवस्तुतोजयित्वंइत्याह दस्यूनिति पुराताव लुंपतःसुपलमनोपहतपाप्म।

तीयगुणाख्यकन्यपमैश्वर्यमपहरतःषडिंद्रियरूपान्दस्यूनजित्वातुल्यान्शत्रून्विजित्वाजित्वास्केवाहशादिशःस्वजिताः स्वैरेवजिताइतिमन्यंतेऽभिमा

नमात्रमेतदित्यर्थः जितात्मनोजितेंद्रियस्यस्वात्मपरमात्मपाथात्म्यवेदिनःदेहिनांसमस्यसर्वाणिभूतानिपरमात्मशरीरत्वेनपश्यतःसाधोःसमाश्रयस्य

स्वमोहप्रभवाःदेहात्मभ्रमरूपतत्त्वात्मभ्रमनिमित्ताःपरेशत्रवःकुतोभवंतिनसंत्येवेतिभावः ११ एवमुक्तवंतमाह क्षत्रियकविशिष्य व्यक्तमि

तिहेस्यवृत्रक्षत्रंबुझस्त्वंमत्तुकामोसिमत्तुमिच्छसियद्यस्मत्संतंविकत्थसेऽन्यथैवंविकत्थनेतवकस्मादितिभावः तथाहि मुमूर्षूणांमत्तुमिच्छतांवि

ह्वलागिरःनन्विताभवंतीत्यनुस्युर्नैवपुरेव १२ हेमंक्ष्मायस्त्वयामत्तोऽन्यःजगतईश्वरउक्तःसोसौकोस्ति श्रीहनुमतेविजयतेतराम् श्रीपेनमः श्री राम ३०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एतावानिति अस्मिन्लोके पुंसाम् इह स्वार्थः पुरुषार्थः एतावानेव कियान् एको गोविंदे भगवत्येकांतभक्तिरनन्यप्रयोजना भक्तिः यत्र सर्वेषु भूतेषु त।
दीक्षणं गोविंदेक्षणं भगवदात्मकत्वदर्शनं इत्येतावानेव निरतिशयपुरुषार्थसाधनमतः स्वार्थः ५५ इति सप्तमे सप्तमः ७ एवं भगवता प्रह्ला
देनोपदिष्टं तत्त्वं यथायोग्यं हेयोपादेयभगवद्धर्मं तदनुष्ठानोपायान्दैत्यकुमारानालक्ष्याचार्यसुतौ दैत्येंद्रायन्यवेदयदित्याहेव विधिः अथेति
भगवद्धर्मोपदेशानंतरं तेन प्रह्लादेनानुवर्णितं समाकर्ण्य निर्दुष्टत्वात्तदुक्तं अवजगृहुर्दैत्यकुमारास्तु गुरुवत्तु शिक्षितं तमसुरोपाध्यायात्तु शिक्षितं
जगृहुः १ अथ तेषां दैत्यपुत्राणां एकांते संस्थितामव्यभिचारेण भगवद्धर्मविषयां बुद्धिमालक्ष्य लिंगैस्ताभ्यां भीतः त्वरितः संजातत्वरः यथावद्राज्ञे हिर ६
अ।१ ण्यकशिपवे न्यवेदयत् ज्ञापितवान् २ ततो दैत्यो हिरण्यकशिपुः सुरेणोक्तं सुतस्यानीतिं स्वमार्गाननुवर्तनमतस्त्वप्रियं तच्छ्रुत्वा कोपावेशेन क्रोधव्याप्त्या चल

एतावानेव लोकेऽस्मिन्पुंसः स्वार्थः परः स्मृतः एकांतभक्तिर्गोविंदे यत्सर्वत्र तदीक्षणं ५५ इति श्रीमद्भागवते सप्तमस्कंधे सप्तमोऽध्यायः ७
नारद उ० अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितं जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितं १ अथाचार्यसुतस्तेषां बुद्धिमेकांतसंस्थितां
आलक्ष्य भीतस्त्वरितो राज्ञ आवेदयद्यथा २ श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयानयं कोपावेशचलद्गात्रः पुत्रं हंतुं मनो दधे ३ क्षि
प्त्वा परुषया वाचा प्रह्लादमतदर्हणं आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा ४ विनयावनतं दांतं कृतांजलिमवस्थितं सर्पः
पदाहत इव श्वसन्प्रकृतिदारुणः ५ हिरण्यकशिपु० हे दुर्विनीत मंदात्मन्कुलभेदकराधम स्तब्धं मच्छासनोद्वृत्तं नेष्ये त्वाद्य
यमक्षयं ६ क्रुद्धस्य यस्य कंपते त्रयो लोकाः सहेश्वराः तस्य मेऽभीतवन्मूढ शासनं किंबलोऽत्यगाः ७ प्रह्लाद उ० न केवलं मे भवत
श्च राजन्स वै बलं बलिनां चापरेषां परेऽवरेऽमी स्थिरजंगमा ये ब्रह्मादयो येन वशं प्रणीताः ८ कंपमानगात्रं शरीरं यस्य सः तादृशः प्रह्लादं हंतुं मनः कृ
ते:२
तवान् ३ कठोरया गिरा तिरस्कारानर्हं प्रह्लादं तिरस्कृत्य क्रोधेन तिरश्चीनेन वक्रेण चक्षुषा ईक्षमाण उवाच ४ कथंभूतं विनयेन नितरां नम्रं
दांतं तिरस्कारादिभिरसंजातक्रोधं बद्धांजलिं पितुरग्रे समीपे स्थितं कथंभूतः पादेन संताडितः सर्प इव श्वासं मुंचन्स्वभावेन क्रूरः ५ उक्तिमेवाह हि
भोः हे दुर्विनीत मंदात्मन् अस्मत्कुलभेदकर हे अधम शासनातिलंघिनं त्वामधुना यमालयं नेष्यामि ६ यस्य मे क्रुद्धस्य सतः सपालास्त्रयो लोकाः पतिताः कंपंते तस्य मे मम शासनमभीतवद्भय
रहितवन्मतो भयरहितः केनापि नास्तीत्यभिप्रायेण वर्तितः अत्यगाः अतिवर्तसे स्वमतिमूर्खेन भवान् किंबलेयस्यपराहताः ७ एवमुक्तः प्रह्लादः चतुर्भिः तत्र प्रथमं
किंबल इति तत्रोत्तरमाह त्वाभ्यां नेति हे राजन् न केवलं मे बलं किंतु भवतोऽन्येषां च बलिनां बलं कोऽसौ येन ब्रह्मादयः चतुर्मुखप्रभृतयः उच्चावचाश्चराचरात्मकाः सर्वे।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स. टी.
भा. टी.
वी
३६

तदा भगवान्निजभक्तस्य प्रह्लादादेर्भाषितं तत्सत्यं जगदन्तर्यामित्वादिभाषणं सर्वेषु चराचरात्मकेषु भूतेष्वात्मनः स्वस्य व्याप्तिं च सत्यं यथा भवति त ।
थाकर्तुमत्यद्भुतं रूपमुद्वहन् विभ्रत्सभायां स्तम्भे समभवन्नृसिंहरूपतस्तेभ्यः कथंभूतं रूपं न मृगं नापि मानुषं रूपमपि तु मृगमानुषमिश्रितं निजभ ।
क्तभाषितमिति वचनं तेन निजभक्तेश्वरेन समासः तत्पुरुषः तावत्प्रह्लादस्य निजभक्तस्य भाषितं भीतिकेषु भूतेषु वसमर ।
सुरभगवानास्त इति तत्सत्यं कर्तुं तदा त्वद्भुतं दैत्यान्तकमतियोरं रूपमुद्वहन्निति तथा निजभक्तैः सनकादिभिर्यद्भाषितं विप्रजन्म भिः शा ।
पमोक्षो भवत्विति तत्सत्यं कर्तुं तथा ब्रह्मलोकादागत्य मत्युत्तं वा मद्भुतं रूपमुद्वहन्सभायां महोग्ररूपमत्यद्भुतं निजभक्तेन हिरण्यकशिपु
ना ब्रह्माणं प्रति यद्भाषितं भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्माभूदिति यथा नान्तर्बहिर्दिवा नक्तं नान्येभ्य इति च ब्रह्मणा निजभक्ते नाप्यत्र भा
षितं तथास्त्विति तत्सर्वं सत्यं कर्तुं न च दासस्त्वं पं न च नरो न मृगो वा नस्व सभाग्रहस्थानतः न च प्राणवद्भिः सर्वैर्नाप्याभाषितं सत्यं कर्तुं प्रवृद्धि

सत्यं विधातुं निजभक्तभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं
न मानुषं १८ स सत्त्वमेनं परितो विपश्यन् स्तम्भस्य मध्यादनुनिर्जिहानं नायं मृगो नापि नरो विचित्रमहो किमेतन्नृमृगेन्द्ररू
पं १९ मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलं भयानकं प्रतप्तचामीकरचण्डलोचनं स्फुरत्सटाकेसरजृम्भि
ताननं २०

हिरण्यकशिपुनाभाषितं नूनमेतद्विरोधेन मृत्युर्मे भविता इति तत्र्याग्रकृतं च प्रियमयामरइति यच्च नारदेन स्वस्यैवं प्रति भाषि ।
तमपं महान्संस्थानत्राम्येति इति अनन्तानुचरः हन्तैनं सभामध्ये प्राप्तं यद्भाषितं तत्सत्यं कर्तुमदृश्यत एकार्थात् निजभाषितं चपले नीति
पं प्रतिजानीहि मे भृत्यः प्रणश्यति इति भागवतं प्रति सत्यं कर्तुमदृश्यतेति १८ सदैत्यः स्वं वनितं श्रुतात्सर्वप्राणिविशेषं सर्वतो वि
लोकयन्स्तम्भस्य मध्यान्निर्गच्छन्तं नायं मृगो नापि नरः किंतु नृमृगेन्द्ररूपं भयं परिपश्यन्नहो किमेतदिति मीमांसितवानिति शेषः १९ तस्यैवं
तं भयानकं तन्नृसिंहरूपं मीमांसमानस्याग्रतः समुत्थितः भयानकत्वमेव दर्शयन् स्तः रूपमनुवर्णयति त्रिभिः
प्रतप्तमिव चामीकरं स्वर्णं तद्वत् चण्डे लोचने यस्य स्फुरत्सटाः जटाः केसराः स्कन्धलोमानि च तैर्जृम्भितं तत्सोपमाननं मुखं यस्य तं २० द्री

राम
३६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यदि स भवदभिमतो जगदीश्वरः सर्वत्रांतरात्मतया वर्तते तर्हि कस्माद्धेतोः स्तंभे पुरोवर्तिनि न दृश्यते मदन्यो जगदीश्वरः क्वासौ वर्ततीति हेत्वः । प्राह द्रष्टाः सर्वत्रास्तीति प्रह्लादः दृष्ट्या यदि सर्वत्रास्ति तर्हि स्तंभे नास्तीति हिरण्यकशिपुः प्रह्लादः स्तंभे पश्यन् नाह न दृश्यतेति पितुर्दृश्यते चेति व्याख्यांतरं १३ सोऽहं सर्वज्ञमीश्वरस्य विकत्थमानस्य तेतव देहाच्छिरो हरामि छिनद्मि योहरिस्तव शरणं रक्षकः ईप्सितः सोऽधुनात्वां गोपायेत रक्षतु तावदपुनात्वां रक्षिष्यति अन्यथा तु तं दृष्ट्वा भिष्येतिभावः १४ एवमित्यं दुरुक्तैः क्रोधेन मुहुर्मुहुर्भागवतं सुतं प्रह्लादमर्दयन् महासुरो हिरण्यकशिपुः खड्गं प्रगृह्य वरासनात् सिंहासनादुत्पतितउत्थितो ऽतिबलं भस्यस्य स्वमुष्टिना स्तंभे तताडताडितवान् १५ तदे

यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः क्वासौ यदि स सर्वत्र कस्मात्स्तंभे न दृश्यते १३ सो

हं विकत्थमानस्य शिरः कायाद्धरामि ते गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितं १४ ना

रद० एवं दुरुक्तैर्मुहुरर्दयन् रुषा सुतं महाभागवतं महासुरः खड्गं प्रगृह्योत्पतितो वरासना

स्तंभं तताडातिबलः स्वमुष्टिना १५ तदैव तस्मिन्निनदोऽतिभीषणो बभूव येनांडकटाहमस्फु

टत् यं वै स्वधिष्ण्योपगतं त्वजादयः श्रुत्वा स्वधामात्ययमंग मेनिरे १६ स विक्रमन्पुत्रवधेप्सुरोज

सा निशम्य निर्ह्रादमपूर्वमद्भुतं अंतःसभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः १७ श्रीराम

—

व ताडनानंतरं स्य तस्मिन् स्तंभे ऽतिभीषणो निनदो ध्वनिर्बभूव निनदं विशिनष्टि येन निनदेनांडकटाहं ब्रह्मांडकटाहमस्फुटत् भिन्नमभू त् अंग हे युधिष्ठिर यं च निनादं श्रुत्वा स्वस्वस्थानगताः अजादयो ब्रह्मादयः स्वधिष्ण्यानाम् अत्ययं नाशं मेनिरे प्रलयकाल मन्यंतेत्यर्थः १६ ततः किं जातं तदाह स विक्रमन्निति ओजसा बलेन पुत्रवधेप्सुः पुत्रवधं कर्तुमिच्छुः तस्यैव विक्रमस्य रा ज्ञमं कुर्वन् दैत्येंद्रः यं निर्ह्रादं ध्वनिमपूर्वं कदापि न श्रुतमतएवाद्भुतमाश्चर्यजनकं निशम्य श्रुत्वा तस्य निर्ह्रादस्य पदं स्थानम अंतःसभायां सभामध्ये न ददर्श येन निर्ह्रादेन सुरारियूथपाः दानवश्रेष्ठा वितत्रसुर्विशेषेण त्रासं प्रापुरित्यर्थः १७ श्रीरामश्रीः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ ७९

सम्पद्धीति सुरस्तदा विक्रीडन्तः तस्य तांसं दृष्ट्वा तान् कलितः विस्मयः यद्धस्तमुक्तो विक्रीडमानो गरुडमतो हि गिलितो भवति तद्वत् भगवताऽत्र क्रीडितं तादृशं
जीनरूपमजानन्तो लोकपालाः सर्वे इन्द्रादयः सुराः कृतं दैत्येन्द्रेण वृत्तमाकस्यात्मेव मेनिरे तत्र एवं तद्धस्तेन पन्नगदानेन मुक्तं ना तेन तस्मादपमृत्युं
होभगवतोऽप्येवं वरीयान् नेनेनैव तस्य किं स्यादिति एवमन्यत इत्यर्थः २६ यस्य हस्तान्मुक्तो तं तत्र हरिं स्ववीर्याच्छङ्कितं तं मन्यमानो ऽतः एवमस्तमना अवधैवक्ती
यामित्यपि मासपुक्तो महासुरः पुनरपि सन्नद्धः प्रमादितः खड्गचर्मणी खड्गं खेटं प्रगृह्य पुनस्तं नृसिंहं आसज्जताभ्यपतत् २७ श्येनस्येव वेगो यस्य तं शतचन्द्रवर्त्म
भिः शतचन्द्रमर्मतत्पचर्मभिः खड्गचर्ममार्गैरित्यर्थः पाभवत्येव सुपर्यधश्चरन्तं हरिं हरिर्दृढाट्टहासं कृत्वा खरेण कोठेन नृनिस्वनेन ध्वनिना उल्बणं भीम
नःमहावेगः निमीलिते दृशा खरनिस्वना भानिमीलिते अक्षिणी यस्य तं जग्राह खरनिस्वनोल्बणं इति द्वितीयान्तपाठे तु स्वनेन महाशब्देनोल्बणं भयंक

तं मन्यमानो
सतस्य हस्तोत्कलितस्तदासुरो विक्रीडतो यद्वदहिर्गरुत्मतः असाध्वमन्यन्त हृतौकसोऽमरा घनच्छदा भारत सर्वधिष्ण्यपाः २६ तं मन्यमानो
निजवीर्यशङ्कितं यद्धस्तमुक्तो नृहरिं महासुरः पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो मृधे २७ तं श्येनवेगं शतचन्द्रवर्त्मभि
श्चरन्तमच्छिद्रमुपर्यधो हरिः कृत्वाट्टहासं खरमुत्स्वनोल्बणं निमीलिताक्षं जगृहे महाजवः २८ विष्वक् स्फुरन्तं ग्रहणातुरं हरिर्व्यालो यथा
ऽऽखुं कुलिशाक्षतत्वचं द्वार्यूर आपात्य ददार लीलया नखैर्यथाहिं गरुडो महाविषं २९ संरम्भदुष्प्रेक्ष्यकरालोचनो व्यात्ताननान्तं विलिहन् स्व
जिह्वया असृग्लवाक्तारुणकेसराननो यथान्त्रमाली द्विपहत्यया हरिः ३० नखाङ्कुरोत्पाटितहृत्सरोरुहं विसृज्य तस्यानुचरानुदायुधान् अहन् सम
स्तान्नखशस्त्रपाणिभिर्दोर्दण्डयूथोऽनुपथान् सहस्रशः ३१ स्म हासं कृत्वा तद्रूपेण हरेस्तेजसा च निमीलिताक्षं जग्राह हरिरित्यर्थः २८ ततः सर्वतः स्फुरन्तं सर्व
वपवान् चालयन्तं इत्यर्थः ग्रहणेन हेतुना आतुरं विशिष्टं व्यालः सर्पः यथा आखुं मूषकं कुलिशेनाक्षता त्वग्यस्य तं ऊर्वोः ऊरौ आपात्य नखैर्ददार गरुडो महाविषं
सर्पमिव नखैर्विदारितवान् तत्र दृष्टान्तः यथा सर्प आखुं मूषकं हरणे दृष्ट्वा नखैः विदारयति
सर्पं गरुडः इव २९ स्वदेहे हिरण्यकशिपुं धृत्वा तं ददार अथ सन्निर्भयः शोणितारुणकेसराननोऽभवदित्याह संरम्भेति द्वाभ्यां आहितक्रोधेन दुर्निरीक्ष्ये करालेलोचने यस्य व्यात्तं विकासि
तं यदाननं मुखं तत्पर्यन्तं स्वजिह्वया विलिहन् लेलिहानः सः असृग्लवैर्बिन्दुभिरक्तानि तस्य वारुणानि केसराणि आननं च यस्य अन्त्रमालाधरः गजवधेन हरिः सिंहो यथा तद्वत् ३०।
एवं भूतो नखाङ्कुरैः उत्पाटितं कृत्स्नं सरोजं यस्य तं शरीरं विसृज्य तस्य दैत्यस्य अनुचरान् कथंभूतान् उद्यतायुधान् नियतं तमनुपथान् अनुवर्तिनः यातान् दोर्दण्डयूथः भुजसमूहवान्
नखा नियस्यसः नखा शस्त्राणि येषां ताः समस्तान् सहस्रशोऽहत् हतवान् ३१ दैत्यवधस्य अस्मत्स्वहरेराटोपमाह श्रीहनुमतो विजयते तराम् श्रीः।

राम
३९

37

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

करालाः भयंकराः दंष्ट्रा यस्मिन् करवालः खड्गः तद्वच्चंचला क्षुरान्तवत् तीक्ष्णा च जिह्वा यस्मिन् भ्रुकुटीमुखे मुखरे कोल्बणं स्तब्धे ऊर्ध्वे च कर्णौ यस्मि
८२ न् गिरिकंदरवदद्भुते व्यात्ते आस्यनासे यस्मिन् हनू कपोलप्रान्तौ तयोर्भेदेन विदारणेन भीषणं २१ दिविस्पृशन् कायो यस्मिन् तत्कसमासः
अदीर्घा ह्रस्वा पीवरा स्थूला च ग्रीवा ऊरू विशाले वक्षःस्थले च यस्मिन् अल्पं मध्यमुदरं यस्मिन् चन्द्रांशुवद्गौरैः तनूरुहैर्लोमभिश्छुरितं व्याप्तं वि
ष्वंचः सर्वतः प्रसृताः भुजास्तेषामनीकानि शतानि यस्मिन् भुजा एवानीकं सेना तच्छतं यस्मिन्निति वा सेनानीकमपि इति मिलित्वा
गात् नखा एवायुधानि यस्मिन् २२ दुरासदं आप्तुमशक्यं सर्वाणि निजानि चक्रादीनि इतराणि वज्रादीनि तान्येवायुधप्रवेकाः श्रेष्ठास्तैर्विद्रा
वितौ दैत्यदानवौ येन तद्रूपं मीमांसमानस्याग्रतः समुत्थितमिति पूर्वेणान्वयः २३ तथाविभविष्यति जनविमर्शेन एवं के तेन सह दैत्यस्य

करालदंष्ट्रं करवालचंचलक्षुरान्तजिह्वं भ्रुकुटीमुखोल्बणं । स्तब्धोर्ध्वकर्णं गिरिकंदराद्भुतव्यात्तास्यनासं हनुभेदभीषणं २१।
दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमं । चन्द्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधं २२।
दुरासदं सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवं २३ प्रायेण मेऽयं हरिणोरुमायिना वधः स्मृतोऽनेन समुद्यतेन किं । एवं ब्रुवंस्त्वभ्यपतद्गदायुधो नदन्नृसिंहं प्रति दैत्यकुंजरः २४ अलक्षितोऽग्नौ पतितः पतंगमो यथा नृसिंहौजसि सोऽसुरस्तदा । नैतद्विचित्रं खलु सत्त्वधामनि स्वतेजसा यो नु पुरापिबत्तमः २५ ततोऽभिपद्याभ्यहनन्महासुरो रुषा नृसिंहं गदयोरुवेगया । तं विक्रमन्तं सगदं गदाधरो महोरगं तार्क्ष्यसुतो यथाग्रहीत् २६

दमारूढ इत्यभिः प्रायेणेति प्रायेण महामायाविना हरिणा मे मम प्रायेण वधः स्म
तोऽपायः स्मर्तव्यः चिन्तितः तथाप्यनेन समुद्यतेन किं न किंचिदित्यर्थः इत्येवं ब्रुवन् गदैवायुधं यस्य स दैत्यश्रेष्ठकुंजरो नदन् गर्जन् नृसिंहं प्रत्यभ्यपतत् अभिमुख
मागतवान् २४ तदा सोऽसुरः नृसिंहस्योजसि तेजसि पतितः सन्नलक्षितोऽदृष्टोऽभूत् यथाऽग्नौ पतितः शलभः तत्सत्त्वधामनि शुद्धसत्त्वात्मके हरौ पति
तस्य दैत्यस्यादर्शनं यत्तद्विचित्रं न भवति यो हरिः पुरा सृष्ट्यादौ प्रलयकालिकं तमः स्वतेजसा अपिबत् २५ ततो महासुरोऽभिपद्याभिमुखमागत्य को
पेन रुषा उरुवेगया भ्राम्यमाणया गदया नृसिंहमभ्यहनत् ताडितवान् युक्तमुक्तमित्यर्थः सगदमग्रहीदिति सगदमसावग्रहीदिति भावः विक्रमन्तं कम्पयित्वा तु
मुदा तं तं दैत्यं गदाधरो नृसिंहः सगदं गृहीतवान् यथा तार्क्ष्यसुतः गरुडो महासर्पं तद्वदित्यर्थः २६ श्रीगणेशाय नमः श्रीः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स० भा० टी० ५

न३

नतइति अनंतायस्वरूपतस्त्रिविधपरिच्छेदरहिताय दुरंतशक्तये पार शक्ये [illegible] चिंत्यशक्तये वा शक्तिः चेतरस विसामर्थ्यानि।
वीहिका जगत्प्रकृतिभावेमय: साम्राज्ञिसर्वीरिवाद्व्यादिभूता यद्वायदनपरशक्तत्वादघटितमिव विभातितद्घटनसामर्थ्यरूपा यतस्त्व
न३ सुखविधानंतत्राल्किसर्वसेवकारणैसर्वतोमितमरणंदेयंरुद्रवानसीतिभाव: यतस्त्वमनंतोऽतस्तवाचेतनेस्त्वमेष्याविर्भूताशीलमिप्राय: अ
नंतपरेनाहिसर्वव्यापित्वाद्देशपरिच्छेदराहित्यंसर्वकालवर्तित्वात्कालपरिच्छेदराहित्यं साक्षात्परंपरयासर्वप्रकारत्वेनसर्ववस्तुमानाधि
करण्यात्वाद्वस्तुपरिच्छेदराहित्यंविवक्षितं येनकेनापिप्रारास्येनस्वस्मादुत्कृष्टैःकैश्चिद्वस्तुभिरधरीकृतत्वाभावरूपंवावस्तुपरिच्छेदराहित्यं
नन्वस्त्ववंस्वरूपंकृत्स्नजगदुदयविभवलयलीलस्यकियदेतदेत्यत्र्ननमित्यमिप्रपतत्वाज्जगत्कारणत्वप्रयुक्तंविकारंनिराह विचित्रवीर्या।
येति वीर्यनामसर्वोपादानत्वसर्वसाधारणेसर्वनियमनेविकाररहितत्वं यथोक्तं विकारविरहोवीर्यप्रकृतित्वेपिमसदेसादि विचित्र

ब्रह्मोवाच नतोऽस्म्यनंतायदुरंतशक्तये विचित्रवीर्याय [illegible]
[illegible] पवित्रकर्मणे विश्वस्यसर्गस्थितिसंयमान्गुणैःस्वली
लयासंदधतेऽव्ययात्मने ५० रुद्र० कोपकालोयुगांतस्तेह
तोयमसुरोत्सकः तन्मुतंपाह्युपसन्नंभक्तंतेभक्तवत्सलः ५१।

यस्यैवंविधस्यवीर्यस्यानितरसाधारणमुच्यते पवित्रकर्मणेऽकर्मीयत्जगद्व्यापाराय तत्प्रापरंस्पृश्यवतांदुरितनिवर्तनक्षमव्यापाराये
तिवा गुणैःसर्वज्ञत्वसर्वशक्तित्वादिभिर्जगन्निमित्ततदुपादानत्वोपयुक्तैःस्वनियाम्यसत्वादिगुणैर्वाकृत्स्नस्यविश्वस्यसर्गादीन्स्वली
लयैवनतुकर्मणासंदधतेविदधते अव्ययात्मनेएवमपिअव्ययःविकाररहितः आत्मास्वभावोयस्यस्वभावतोपिविकाररहि
तायेत्यर्थःस्वरूपतोपिविकाररहितस्योक्तत्वात् ५० यद्वत्वणोभिप्रेतंकृत्स्नजगत्सर्गादिकर्तुस्तवकियदेतदेतितदेवविवृणोत्य
त्यासल्यपुत्रत्वेतिरुद्र कोपकाल इति नवकोपकालोयुगांतःहिपरार्धविसानंकोपकालइत्यनेननमंदंतर्यामितयासुखेन।
संहृतत्वमेवसुक्तं अयंतुकोपाविषयइत्याह अयमसुरोस्यवलोऽतःकोपनिहंत्यादि भक्तवत्सलतवभक्तंतस्यदैन्यंदूरस्पसुतं
उपसन्नंत्वत्समीपमागमिष्यंतंपाहि ५१ इंद्रसुखदुःखमा वेदयन्सर्वरक्षकंसर्वांतरात्मानंसमस्तपुरुषार्थदंस्तौति श्रीयेनमःश्री

रामः ४०

३८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सेतिकाभ्यां सटाभिरवधूताः प्राक्पिताः जलदाभेघाः परापतन्नवारीर्यत न स्पृहेटदृष्टिविमुखप्रपङ्क्तिस्तेऽपि मावांश्चा ग्रहाः स्वरिपेभवन् श्वासेनहताभीतिताः समुद्राः ३३।
मुः संचेलुः निहादेनभीताः दिग्गजाः मुखरर्वजाः ममज्जुः ३२ तस्यनृहरेः सटाभिः क्षिप्तानि विमानानि तैः संकुलंद्याः पायौः ओसः पीडितस्ततः चलितेन भ
नृहरेः पदाक्रान्ततावीभिः तारस्माम्भरभूतत्तस्यन्वतस्यांसेनरहस्त्रौवेगनवेगेन शैलाः समुद्राः उच्चुः सुप्रवित्तवंतः तस्यनृहरेस्तेजसा खमाकाशं
ककुभो दिशःअम्बरे जिरे ३३ ततो हेमवर्षे सर्वेश्वरत्रिलोकस्यप्रतीप्तिः सभायामुत्तमेनपासनेउपविष्टं संभक्तं संपन्नतेजोपत्स्फुलिङ्गितं ते रथाः प्र
तिपाद्यमिन श्वेवं भुग्ने वक्त्रं यस्य तं विदुलिहं कश्चन कोपिनासेवत कोपि समीपगंतुं न प्रभुरिति सर्पैः ३४ लोकत्रयस्य मस्तकज्वरं हिरण्यावाद्यं

सपवधूतजलवाः परापतन्ग्रहाश्चतद्दृष्टिविमुखरोचिषः अंभोधयः श्वाससमीरिताविचुक्षुभुर्निर्ह्रादभीता दिगिभा मदं नृहुः ३२।
द्यौस्तस्सटोत्क्षिप्तविमानसंकुलाप्रोत्सर्पत क्ष्मा च पदाभिपीडिता शैलाः समुत्पेतुरमुष्यरंहसा तत्तेजसा खं ककुभो नरेजिरे ३३ ततः
सभायामुपविष्टमुत्तमे नृपासने संभृततेजसं विभुं अलक्षितद्वैरथमत्यमर्षणं प्रचंडवक्त्रं न बभाज कश्चन ३४ निशम्य लोक
त्रयमस्तकज्वरं तमादिदैत्यं हरिणा हतं मृधे प्रहर्षवेगोत्कलिताननामुहुः प्रसूनवर्षैर्ववृषुः सुरस्त्रियः ३५ तदा विमानावलि
भिर्नभस्तलं दिदृक्षतां संकुलमास नाकिनां सुरानका दुंदुभयोऽथ जघ्निरे गंधर्वमुख्या ननृतुर्जगुः स्त्रियः ३६ तत्रोपव्रज्य विबु
धा ब्रह्मेंद्रगिरिशादयः ऋषयः पितरः सिद्धविद्याधर[illegible]महोरगाः ३७ मनवः प्रजानां पतयो गंधर्वा
प्सरचारणाः यक्षाः किंपुरुषास्तात वेतालाः सिद्धकिंनराः ३८ ते विष्णुपार्षदाः सर्वे सुनंदकुमुदादयः मूर्ध्नि
बद्धांजलिपुटा आसीनं तीव्रतेजसं ईडिरे नरशार्दूलं नातिदूरचराः पृथक् ३९ श्रीहनुमते नमः श्रीरामश्री

सर्वं तमादिदैत्यं हिरण्यकशिपुं हरिणा श्रीनृसिंहेन हतं निशम्य हर्षात्प्रहर्षवेगेनोत्कलितानि विकसितान्याननानि यासां ताः सुराणां स्त्रियः पुष्पवर्षैः पुनःपु
नरप्रीरं ववृषुः ३५ तदा दिदृक्षतां द्रष्टुमिच्छतां स्वर्निर्यमागतानामिव्यर्थः नाकिनां देवानां विमानपंक्तिभिर्नभस्तलं संकुलं संमर्दं बभूव सुराणा
मानकाः पटहाः तैर्दुंदुभयो जघ्निरे ताडिताः गंधर्वमुख्याः ननृतुः स्त्रियोऽप्सरसो जगुः ३६ तत्रोपव्रज्य किंचित्समीपमागत्य ब्रह्मादयः हेता।
मूर्ध्नि बद्धांजलिपुटा यैस्ते आसीनमुपविष्टं तीव्रं दुःसहं तेजो यस्य तं श्रीनृसिंहं नातिदूरवर्तिनः पृथगेकैकशः ईडिरे तुष्टुवुः ॥
३७ ३८ ३९ तावदपारविविधविचित्रशक्तिवीर्यमकर्मायत्जगद्व्यापारं जगत्कारणं स्तुवन्नमस्करोति ब्रह्मा श्रीगणेशायनमः श्री

८।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मु॰

स॰ मा॰ टी॰ टी॰ ४९ सिद्धा अपि सद्योगगत्यपहारकं स्वं दृष्ट्वा तस्य योगगत्या धाकर्षयन्तः स्वं दर्शयन्तौ नेमुः यद्वेति योऽसाधुः हिरण्याक्षादिः सोऽस्माकं योगसिद्धिः अणिमादियोगप्राप्तां
गतिम् अणिमादिकं स्वयोगेन तपोबलेन हृतवानित्यभिलिप्यमाणतया तं नानादर्पिभि नेकेऽप्यपि स्फुतं नरैव पीविदारितवान् तस्मै तुभ्यं वयं शिरस्ता प्रणताः स्मः नम
स्कुर्मः ४५ विद्याधरा अपि तेन पाप्यकृतविद्यादानेन हितकारिणं स्तुवन्तो नमन्ति विद्यामिति धारणया सेना धारणया अनुराज्ञां संसिद्धां विद्याम्
संबन्धिनीमन्तर्धानादिलक्षणां यो ज्ञः महाबलवीर्यः भगवितः दैत्यः दुःस्वप्नं धनि निषिध्य तवान् बलेन स्वबलवीर्यपराभिभवसामर्थ्यं सैन्यं येन
नरसंख्ययुद्धे पशुवत् कृतवान् तस्मै मायानृसिंहमालीयत्वसकर्मोपातन सिंहतनुं नित्यप्रणताः स्म कृत्तिः नमस्कृतवन्तः स्मेत्यर्थः ४६ नागास्तु वन्दनपाकृतस्व
प्रयत्नेनानेककरस्तुवन्तो नेमुः येनेति येन पापात्मना अस्माकं रत्नानि नागकन्यकाः पाणिरत्नानि च अपहृतानि तस्य वक्षोविदारणेन नासौ जीवनं यतः अनन्दयन्त गां॰

सिद्धा ऊचुः योऽनो गतिं योगसिद्धामसाधुरहार्षीद्योगतपोबलेन नानादर्पं तं नखैर्विददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ४५ विद्याधरा ऊचुः
विद्यां पृथग्धारणयानुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यं ४६ नागा ऊचुः येन
पापेन रत्नानि स्त्रीरत्नानि हृतानि नः तद्वक्षःपाटनेनासां दत्तानन्द नमोऽस्तु ते ४७ मनव ऊचुः मनवो वयं तव निदेशकारिणो दितिजेन देव परिभूतसेतवः भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि किंकरान् ४८ प्रजापतय ऊचुः प्रजेशा वयं ते परेशाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः स एष त्वया भिन्नवक्षा नु शेते जगन्मङ्गलं सत्त्वमूर्तेऽवतारः ४९

स्वसंबोधनं तेतुभ्यं नमोऽस्तु ४७ तवाज्ञापरिपालनरूपैकं कर्यविरोधिनिरसनेन नैकं कर्याधायनरूपहितकारिणं स्तुवन्तस्ते स्वप्रार्थयन्ते मनवः
मनव इति वयं तव निदेशकारिणः कैंकर्यकारिणो मनव इति प्रसिद्धस्त्वयमतावन्तं कालं येन दितिजेन दैत्येन परिभूताः परिहापिताः स्वस्वकृताः सेतवः
वर्णाश्रमसमर्यादा येषां तादृशा वयम् अविसमृद्धुना स खलो दितिजस्त्वया उपसंहृतो हतः हे प्रभो नितरां कैंकर्यविरोधिनिरसनेन तदधिकाराधायकं स
र्वेषां शुभाधायकमूर्तिं तुष्टुवुः प्रजापतयः हे परेश परेषां ब्रह्मादीनामपीश त्वया अभिसृष्टा उत्पादिताः सर्गार्थं त्वया सृष्टाः प्रजेशाः प्रजापतय इति प्रसिद्धा
वयमेतत्सर्वं येन दैत्येन निषिद्धाः सन्तः प्रजाः न वै सृजाम न सृष्टवन्तः स एष दैत्यः त्वया भिन्नं विदीर्णं वक्षो यस्य तादृशो नु शेते अतः परं प्रजाः स्रक्ष्याम राम
इत्यर्थः तस्मात् हे सत्त्वमूर्ते प्राकृतसत्त्वविग्रह ते तव अवतारो जगन्मङ्गलं जगतां मङ्गलावहः ४९ तत्कुरेवाज्ञासाध्यं नाज्ञादिकैंकर्यविरोधिनिर नि॰२ ४९
सनेन तदाधायकं स्तुत्वा तुष्टुवुर्गन्धर्वाः श्रीरामश्रीरामश्रीराम श्रीरामश्रीरामश्रीरामश्री श्रीहनुमते विजयते तराम् श्रीराम

अतस्ते किं करवाम इति नः किं करान् अनुशाधि शिक्षय ४८५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रसातीताइति हेपरमसर्वोत्कृष्टेनोस्मान्त्रायताभवतादेवेनकांताःप्रस घगृहीतास्वभागाःस्वकीयायज्ञोपभागाअस्मदारितुखेनत्वमेवभोक्तेत्य।
लिप्रायेण ह्यादः प्रपुक्तः प्रत्याहृताः दैत्याक्रांतमितिद्वितीयांतपाठेतु देवभयाकुलमिति हृदयविशेषणं स्वदेवत्वेनस्वभागग्रहणायेनेनलक्ष्
हंत्वदावासभूतमतस्वामलमस्माकं हृदयं अस्यचाधिमेयेनपर्वसुकुलितमिदानींतदाकारेणनविकासितंभवतीत्यनुषंगः स्वं सेवतामस्माकं
स्वतोलौकिकपुरुषार्थत्रयादिस्वेतत्किंपदित्याह हेनाथस्वामिन्नेतेपुरुषत्रयं तापं त्रपीपरणाइदंलौकिकंपुरुषार्थजातंकालेननक्ष्यमाणंकिय
त्यल्किंचितदित्यर्थः तदेवाह तेषांलोपमित्वरतामुक्तिरपिनवहुमतावस्सेवासुखासक्तानांमुक्तिरपिनपरमंप्रेयानमम तादे नारसिंहापरेरवी।
चीनैःपुरुषार्थैः किंनकिमपितेषामतितुच्छमर्वाचीनपुरुषार्थं जातमितिभावः ४२ अथयस्तुसर्वेषुसाधुपरित्रातारंदुष्टछिनात्तं कन्तुष्टुवुः
त्वमिति परममुक्तंस्वतपस्त्वध्यानरूपेणास्माकंत्वमाप्यउपदिष्टवानपि तदेवविशिनष्टि यतयत्राननलवतेजः प्रकाशकंत्वस्वरूपावेदकंइत्यर्थःयेन

इन्द्र० प्रत्यानीताःपरमभवतात्रायताः स्वभागा दैत्याक्रांतंहृदयम मरेस्तत्वरूपंप्रत्यबोधि कालग्रस्तंकियदिदमहोनाथशुश्रूयतांते
मुक्तिस्तेषांनहिवहुमतानारसिंहापरैःकिं ४२ ऋषयऊचुः त्वंनस्तपःपरममाख्यद्यदात्मतेजोयेनेदमादिपुरुषात्मगतंससर्ज। तद्विप्रलुप्तममुं
नाथशरण्यपालरक्षागृहीतवपुषापुनरन्वमंस्थाः ४३ पितरऊ० श्राद्धानिनोधिबुभुजेप्रसभंतनूजैर्दत्तानितीर्थसमयेप्यपिबत्तिलाम्पः तस्योदरान्
नखविदीर्णवपायआर्च्छत्तस्मैनमोनृहरयेखिलधर्मगोप्त्रे ४४
तपसादिपुरुषआत्ममुखइदंजगदात्मगतंपरमात्मनात्मयागतमंतरात्मतयाससर्ज। आदिपुरुषो भगवतिमिस्वत्रयुं वेमानप्रकारातइतिवसंधिरार्षःआदिपुरुषात्मेतिपाठेआदिपुरुषेतिलुप्तप्रथमांतपृथकपदं पद्यहेत्रादिपुरुषेति
संबोधने ससर्जेत्यत्रेतिविशेषः तत्तपोमुनादैत्येनविलुप्तंविशेषेणप्रलोपितमासीतदेवाधुनाहेशरण्यशरणमर्हतीतितथाभूतहेपालपालकरक्षागृ
हीतवपुषासाधुपरित्राणार्थंगृहीतनरसिंहशरीरेणपुनरन्वमंस्थाःअनुज्ञापितवान् यत्त्वनुमेयाविनाशितोऽतःपुनर्निर्भयंतपःकुरुते त्यनुज्ञापितवा
नसीत्यर्थः ४३ पितरस्तुखदुःखमावेदयंतोऽखिलधर्मगोप्तारंहितकारिणंस्तुवंतोनमस्कुर्वंति श्राद्धानीति अस्माकंतनूजैःपुत्रादिभिरस्मदुद्देशेनदत्तानिश्रा
द्धानिश्राद्धसंबंधीन्यन्नादीनियोदैत्यःप्रसभंबलात्स्वयमधिबुभुजेभुक्तवान् तथातीर्थसमयेस्नानसमयेस्मत्तनूजैर्दत्तंतिलसहितमपस्तिलोदकान्यपिपपिबत्तस्यदैत्य
स्यउदरान्नखैर्विदीर्णवपांउच्चयःपुनराच्छिद्यास्माकंदत्तवान् कथंभूतांउदराल्लोमैर्विदारितात्वाप्यस्य तस्मात् उदरविदारणसमकृतपिंडोदकप्राप्तिरेवफलमितिभा
वः तस्मैसमस्तधर्माणांगोप्त्रेरक्षित्रेनृहरयेनमः तिलोदकसमस्तपिवत्तः तदाप्रसभमितिदेहलीदीपन्यायेनविशेषणं तिलांबुतिलोदकमसमःसभानर्हःयदेसंद्गप्रबुभुजे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्र॰ भा॰ टी॰ ४२ सभास्विति तवामलं यशः सभासु सत्रेषु च गीत्वा वयं महतीं सपर्यां पूजां पदं वा लभामहे तानस्मान्यो दुर्जनो दैत्यः स्ववशाय यथा भवति तथा व्यनैषीत्स एष दुर्जनो हे भग।
वंस्तत्वपालनः स्वतन्त्रदिष्ट्या भवेज्जातैर्दिष्ट्या दैवेन हतस्येतित्वान्वयः यथामयः यथाशिरोव्यथामयो रोगः पीडाकारकः तद्वद्यमासीदिति रीतिशेषः ५४ स्व।
दुःस्वभावस्थं तं सर्वसुखावाधायकं लोकान्तिहरं तुष्टुवुः किन्नराः वयमिति हे ईश वयं किन्नराणां गणाः इति प्रसिद्धास्तवानुगाः अनुचरास्तेवयमेतावन्तमुना दि।
तिजेन विष्टिं मुल्यं विनारणकर्म अनुकारिताः हे हरे अनुचरार्त्तिहर स वृजिनः पापात्मा दैत्यः भवता अवसादितः उपसंहृतः हे नरसिंह हे नाथ नोऽस्माकं विभवाय सु
खसमृद्धये त्वं भव ५५ स्वामिन् हरे पूर्वं तत्प्रतिषिताम्प्रत्यनुग्राहकं पद्मत्वान्सीत्यात्तविष्णुपार्षदाः अद्येति नोऽस्माकं भक्तानां हे शरण शरणप्रद निरतिशय
पुरुषार्थसाधनभूता पापत्रेरेतिवा सर्वेषां लोकानां शर्मसुखावहमेतत् तद्रूपमद्य दृष्टं न तु पूर्वं हे ईश हे स्वामिन् सोऽयं दैत्यस्तव विधिकरः प्रेष्याकारी किंकरः स १:२
च विप्रैः सनकादिभिः शप्तः मध्येऽकर्यविशेषो जात इतिभावः तस्य दैत्यस्येदं निधनं त्वत्कृतमनुग्रहाय पुनः किंकरत्वलाभरूपानुग्रहार्थमेवेति वयं जा।

वैतालिका ऊचुः सभासु सत्रेषु तवामलं यशो गीत्वा सपर्यां महतीं लभामहे यस्तामव्यनैषीद्भृशमेष दुर्जनो दिष्ट्या हतस्ते भगवन्यथामयः ५४
किन्नरा ऊचुः वयमीश किन्नरगणास्तवानुगा दितिजेन विष्टिममुनानुकारिताः भवता हरे स वृजिनोऽवसादितो नरसिंह नाथ विभवाय नो भव ५५
१९ विष्णुपार्षदा ऊचुः अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म सोऽयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनुग्रहाय विद्मः ५६ इतिश्री
मद्भागवते म॰ पु॰ सप्तमस्कंधेऽष्टमोऽध्यायः ८ ना॰ उ॰ वा॰ एवं सुराद्यः सर्वे ब्रह्मरुद्रपुरःसराः नोपैतुमशकन्मन्युसंरम्भं सुदुरासदं १ सा
क्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तं महदद्भुतं अदृष्टाश्रुतपूर्वत्वात्सा नोपेयाय शंकिता २ प्रह्लादं प्रेषयामास ब्रह्मावस्थितमन्तिके तात प्रशमयोपेहि स्वपि
त्रे कुपितं प्रभुं ३
नीमः ५६ इति सप्तमेऽष्टमः ८ एवं प्रसन्नं ब्रह्मादिभिः संस्तुतमप्यत्यन्तं तमैश्वर्येणैरैश्वर्यं हरिं नरसिंहं वत्प्रियावश्यं प्रेषितः प्रह्लादः असाद्य। १२
प८ मासेत्याह देवर्षिः एवं प्रेसनं कस्यं कदाचिदपि प्रसादं सर्वविश्वामनुनासंरंभं स्वक्रोधोपसाम्तं स दुरासदं दुःप्रापं भगवन्तमुपैतुं समीपं गंतुं नाशकन् समर्पणेन वक्तुः
१ पुनरतिशयश्रिया साक्षाद्धसिद्धा श्रीलक्ष्मीरपि देवैर्ब्रह्मादिभिः प्रेषिता पतिसमीपं गच्छेति प्रार्थिता अपि तं महन्नरसिंहरूपं दृष्ट्वा पूर्वमदृष्टमश्रुतं राम
चपूर्वं दृष्टाश्रुतपूर्वत्वं तस्य भावस्तत्वं तस्माद्धेतोः शंकिता सती नोपेयाय तत्समीपमगात् २ एवं स्थिते ब्रह्मा अन्तिके स्थितं प्रह्लादं प्रेष। ५२
यामास प्रेषणप्रकारमेवाह तातेति हे तात हे वत्स स्वपित्रे कुपितं क्रुद्धं प्रभुं भगवन्तं प्रशमय प्रसन्नं कुरु उपेहि समीपं गच्छेति
३ श्रीमते रामानुजाय नमः श्रीगणेशाय नमः श्रीवक्रतुण्डाय नमः श्रीसरस्वत्यै नमः श्रीहनुमते विजयतेतराम्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वयमिति हे विभो ते नरस्य दूगायका नयः सत्किञ्चन रूकमीणिगायकाश्चवयं पैनेतावत्सर्पितमालसा स्वतास्वाधीनाःकृताः कथं भवतेनवीर्यशौर्य
बलं स्तुतिः ताभ्यामोजः प्रभावायस्यताहशेन सखवं हतौभवतानिरतिशायरूपायुतेन इमांदां मरणमिसर्पी नो तःप्रापितः तथाहि उत्पद्यस्य
बलंस्तुतिः ताभ्यामोजः प्रभावायस्यतादृशेन सखवं हतौ भवता निरतिशय कृपायुक्तेन इमां वाम रणमिसर्पी ५९ नस्यादपंकजपरिचायीविरो
उत्पथेकुमार्गेपापकर्मणितिष्ठतीतितथा कुशलायसेमायकल्पतेकिसेमयुक्तोभवतिकिंनकस्यतएवस्यर्पः ५९ नस्यादपंकजपरिचायीविरो
धिनिरसनेतपुनस्सत्साधायकेहितकरंतदेवुधनारणाः हरइति हेहरेश्रामितानिलिरभवापवर्गेहिकामभिकसुखेहेतुतवांघ्रिपंकजमाश्रि
२५ ताः परिचरंतोवयमनेनैनिविधाइतिशेषः सत्यमसत्साधनांतोप्रपन्नानांवालूकयहृदयरोगरूपःत्वयासमापितःउपसंहृतइत्यर्थः ५१ सा
६:२ दुःखमोवदयंतरवानिवर्तकिंसुखाधापकंवर्णयितियक्षाः वयमिति मनोरेःकर्मभिर्वयंतवानुचरअसत्सेवयंइहतावदितिजेनवाहकत्वंयानोदिता
एकत्वंभारवाहकत्वंवाप्रापिताःस्थिताः हेनरहरतेनदितिजेनरूतंनतजनानांभक्तजनानांपरितापंजानताते तत्पायंचविंशः देत्यास्योजीवः पंचतांप्र

गंधर्वा ऊचुः वयंप्रभोतेनटनापगायकाये नालसाछीर्यबलौजसाकृताः सत्ययनीतोभवताद्यमिमाकिंमुत
पस्थःकुशलायकल्पते ५० चारणा ऊचुः हरेतवांघ्रिपंकजंभवापवर्गमाश्रिताः वयंसमापितस्त्वयासत्व।
साधुहृच्छयः ५१ यक्षा ऊचुः वयमनुचरमुख्याःकर्मभिस्तेमनोज्ञैस्तइहदितिसुतेनप्रापितावाहकत्वं सतुजन
परितापंतत्कृतंजानतातेनरहरउपनीतःपंचतांपंचविंशः ५२ किंपुरुषा ऊचुः वयंकिंपुरुषास्त्वंतुमहापुरुषईश्व
रः अयंकापुरुषोनष्टोधिक्कृतःसाधुभिर्यदा ५३ नीतःप्रापितःविज्ञानघनएवैतेभ्योभूतेभ्यःसमुत्थायतान्येवानुविनश्यतीतिवत्पंचविंश
स्यशरीरत्वारिकापंचताप्राप्तिरत्रविवक्षितापंचविंशेतिपाठेजीवशरीरकेतिसंबोधनंसुजनपरितापइतिपाठेपिनदितिसुतेनवाहकत्वंनीताः सत्तुपंच
विंशइत्यन्वयः ५२ स्वैन्याग्रसंधानपूर्वकमनितरसाधारणप्रभावंतुष्टुवुःकिंपुरुषाः वयंकिंपुरुषाःकुत्सिताःपुरुषाःत्वंतुमहापुरुषअनितरसाधार
णगुणपूर्णःईश्वरःसर्वनितरात्मा अयंमहानदैत्योहतस्त्वयेतितिकिंनवर्ण्यतइत्याशंक्य किमयेतदित्याहुः अयमिति कापुरुषःकुपुरुषःअ
स्यदेवक्षयावलीयांस्त्वतोयमइतिभावः देवदर्पइतिसत्त्रेणकुत्सितस्यकादेशः यदासाधुभिर्धिक्कृतःतिरस्कृतःतदेवनष्टोनष्टप्रायः।
अतःकिमेतत्तवेतिभावः ५३ अस्मत्संमानासहनत्वगुणगानविरोधिनिरसनेनत्वयैववयंबहुमताइत्याहुर्वैतालिकाः श्रीरामपत्री

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नर श्री

स्. भा. टी. वी. ७३ मन्य इति द्वाभ्यां । धनादयः परमपुरुषस्याराधनाय संतोषनिमित्ताराधनाय न भवंतीति मन्ये किंतु भक्तिरेव भवतीति मन्ये इत्यर्थः कुतः हि यस्माद्भगवान् गजयूथपाय
नाम्नि रिल्लाय गजेंद्राय भक्त्यैव तुतोष तत्र धनं वित्तमभिजनः सत्कुले जन्म रूपं सौंदर्यं तपः स्वधर्मः श्रुतं पांडित्यं ओज इंद्रियबलं तेजः कामका
न्तिः प्रभावः प्रतापः बलं शारीरं पौरुषम् उद्यमः बुद्धिः प्रज्ञा योगः अष्टांगयोगः ९ एवं धनाद्यभावेपि केवलभक्त्यैव भगवतो वशत्वं दर्शितं यतो भक्तिरेव भगवतो वशे हेतु
स्त्वमतस्तद्वतस्तद्गुणसंपत्त्यपेक्षया भगवद्भक्तिसंपत्तिरेव श्रेयसीत्याह विप्रादिति द्विषड्द्वादशगुणास्ते च धर्मश्च सत्यं च दमः श्रुतं चामात्सर्यं ह्रीस्तितिक्षान
भक्तिः श्लो ५ सूयाज्ञानं यज्ञश्च दानं च धृतिः श्रुतं च व्रतानि वै द्वादश ब्राह्मणस्येति सनत्सुजातोक्ताः एतैर्युक्तादरविंदनाभस्य पादारविंदविमुखाद्ब्राह्मणाच्छ्वपचं श्वपाकं श्रेष्ठं मन्ये श्वपचं विशिन
ष्टि तदर्पितेति तस्मिन्नरविंदनाभे अर्पिताः समर्पिताः मनआदयो येन तत्र ईहितं कर्म तस्य श्रेष्ठत्वे हेतुः विप्रस्यावरत्वे हेतुमाह स स्वयं भूतः श्वपचः स्वकुलमपि
पुनाति भूरिमानो गर्वी द्विषड्गुणयुक्तोपि सतु विप्रः न स्वात्मानमपि पुनातीत्यर्थः यद्यप्युक्तगुणा भगवद्भक्त्युपयोगाः का भक्तिश्च वेदांतविहिता त्रैवर्णिकाधिका
रिका तत्र चाधिकारस्त्रैवर्णिकस्यैव न तु शूद्रस्य तत्र श्वपचशरीरकायस्य अधिकारस्याप्रसिद्धेः एवं च न तत्र सुतरां श्वपाकस्याधिकारो न संभवतीति उक्तगुणयु

मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः नाराधनाय हि भवंति परस्य पुंसो भक्त्या तुतोष भगवान् गजयूथपाय ९ विप्रा
द्द्विषड्गुणयुतादरविंदनाभपादारविंदविमुखाच्छ्वपचं वरिष्ठं मन्ये तदर्पितमनोवचनेहितार्थप्राणं पुनाति स कुलं न तु भूरिमानः १० ननु द्विजादुक्तियुक्त ।

स्य श्वपाकस्य वरत्ववर्णनमनुचितं तथाप्यत्र प्रकरणे भक्तिरूपेण प्रपत्तिश्चोच्यते प्रपत्तौ सर्वेषामधिकारो बहुप्रमाणप्रतिपन्नः अतश्च बहिर्दैत्येयाप्यरक्षांसि स्त्रि
यः शूद्रा व्रजौकसः खगा मृगाः पापजीवाः संति ह्यच्युततां गता इति स्त्रीशूद्रादीनामपि भगवति भक्त्या तत्साधर्म्यापत्तिरुक्तोपपन्ना भवति एवं गतायच्छरणागतस्य उपेत
नारायणमादिदेवं मन्ये तेन तदखिलं परमस्य पुंसः स्वात्मार्पणं स्वसुहृदः परमस्य पुंस इति प्रपत्तिं कर्तव्यत्वेन एव मुक्त्वा च सतां न विरोधः उपपादितं चैतत्पुरस्तात् मनआदि
नामर्पितत्वमित्येतत् समर्पणं नाम तद्भोग्यत्वेन तदायत्तसत्ताकत्वेन वानुसंधानरूपाध्यवसायात्मकं ज्ञानं प्राणशब्दः प्राणाद्यस्य प्रत्यगात्मस्वरूपस्यापि उपलक्षकः सर्वात्मा राम
त्मीयादि समर्पणेन भगवति न्यस्तभरः श्वपाकोपि भगवत्तोषकत्वादुक्तविधाद्विप्राद्भूयानिति भावः उक्तं भगवता अपि चेत्सुदुराचारो भजते मामनन्यभाक् साधु ७३
रेव स मंतव्यः सम्यग्व्यवसितो हि सः इति प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः अपि पापेष्वभिरताः मद्भक्ताः पांडुनंदन मुच्यंते पातकैः सर्वैः पद्मपत्रमिवांभसेति १० ननु परि
पूर्णस्य भगवतो जातिगुणवित्तादिहीनश्वपाकसमर्पितमनआदिभिः किं प्रयोजनं कथं वा ततस्तस्य तोषः कथं वैतद्वैविध्यापि मामनन्यभावेन भजन्तीति तरां प्रियं
ति भगवतोक्तं इत्यत्राह श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्री

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हे राजन्युधिष्ठिर तथेत्यभ्युपगम्य भागवतोऽर्भकः प्रह्लादः शनकैः समीपमेत्य प्राप्य विधृतः कृताञ्जलिर्येन तादृशः भुवि दीर्घेन दण्डवन्नमनं नम
स्कृतवान् ४ ततः स्वस्य पादयोर्मूले पतितं तमर्भकं प्रह्लादं विलोक्य देवः श्रीनृसिंहः कृपया परितः प्लुतो व्याप्तः तमुत्थाप्य तस्य प्रह्लादस्य शि
रसि करांबुजमदधात् निहितवान् कथंभूतं कालएवाहिः सर्पस्तस्मात् त्रस्ता भीता धीर्येषां तेषां कृतमभयमभयप्रदानं येन तादृशं संसृतिभीरूणां कृ
ताभयप्रदानमित्यर्थः ५ स प्रह्लादस्तस्य भगवतः करस्पर्शेन धुतं निरस्तमखिलमशुभं यस्य तादृशः सपदि अभिव्यक्तो प्रत्यक्षितो परमात्मनो ब्र
ह्मपरमात्मनोस्तयोर्दर्शनं यस्य साक्षात्कारात्मकं यस्य सर्वं प्रत्यक्षतापन्नरूपं भगवद्विषयज्ञानं प्रकटं करस्पर्शेन तु ज्ञानं दृष्टं च तत्तेनोक्तविधपर
मात्मज्ञानयुक्त इत्यर्थः अत एव निर्वृतः सुखितः तस्य हृष्यत्तनुरुद्वितरोमयुक्ता तनुः क्लिन्नं प्रेमार्द्रं हृत् यस्य अश्रूणि पानंदजानि लोचने यस्य तादृशः
तस्य भगवतः पादपद्मं हृदि दध्यौ ध्यातवान् निरतिशयपुरुषार्थत्वेनानुसंहितवानित्यर्थः ६ ततः प्रेमगद्गदया वाचा एकाग्रमनसा भगवदेकविषयेण मनसा ह

तथेति शनकै राजन्महाभागवतोऽर्भकः उपेत्य भुवि कायेन ननाम विधृताञ्जलिः ४ स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः उ।
त्थाप्य तच्छीर्ष्ण्यदधात्कराम्बुजं कालाहिवित्रस्तधियां कृताभयं ५ स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः तत्पादपद्मं हृदि निर्वृ
तो दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ६ अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ७ प्रह्लाद उ० ब्रह्मादयः सु
रगणा मुनयोऽथ सिद्धाः सत्वैकतानमतयो वचसां प्रवाहैः नाराधितुं पुरुगुणैरधुनापि पिप्रुः किं तोष्टुमर्हति स मे हरिरुग्रजातेः ८ रिमस्तौषीच्च कथं भू
तः सुसमाहितः सुसमाधिमिवाह तस्मिन्नेव न्यस्ते हृदयं ईक्षणं च येनेति हृदा मनीषा मनसाभिक्लृप्त इति वचनात् बुद्धिवृत्तीनां एकविषयत्वाभिप्रायेणैकवचनमतस्त
न्न्यस्तहृदयेक्षण इत्युक्तं ७ स्तुतिमेवाह द्विभिः श्लोकैः तावद्भगवत्स्तुतावात्मनोऽनधिकारमाविष्करोति ब्रह्मादय इति चतुर्मुखप्रभृतयो देवगणाः सत्वैकतानमतयः स
त्त्वैकतानाः मुख्याः यासां मतिर्येषां केवलं सत्त्वप्रधानमतय इत्यर्थः अनेनैव सततं निर्मलत्वाद्भगवत्प्रकाशकमनाविलमित्युक्तं सोऽभीष्टिपार्षदत्वेनयोग्यत्वं सूचितं ए
नृ५ वं विधा अपि मुनयः सिद्धाश्च वचसां प्रवाहैः स्तोत्रैः तथा वक्ष्यमाणैर्बहुभिर्गुणैरपि यमाराधितुं स्तुतिभिः सन्तोषयितुमद्यापि न पिप्रुराराधयितुं
न पर्याप्तानसमर्था इत्यर्थः स हरिरुग्रजातेः असुरजातिर्यस्य तस्य मे नेन वक्ष्यमाणगुणराहित्यमुक्तं मम किं कथं तोष्टुं तोषं प्राप्तुमर्हति वाङ्मनसापरिच्छेद्यस्वरू
पस्वभावो विपुलबुद्धिभिर्ब्रह्मादिभिरपि स्तोतुमशक्यः कथं मत्सदृशैरासुरस्वभावस्य मम स्तुत्या तुष्याद् इत्यर्थः ८ एवमनधिकारमात्मनः सूचयित्वा पुनरधिका
रं संभावयितुं तावद्भगवतो जातिगुणत्वस्यादितारतम्यानादरेण भक्त्यैकतोष्यत्वमाह श्रीहनुमता विजयते तराम् श्रीमेतरामानुजायनमः श्रीः।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सर्वेपीति हे ईशवयमिवयथावयंतथा विकिंकरास्त्वयामी सर्वेब्रह्मादयोपिसत्वधाम्नस्तवविधिकराः किंकरास्तव अस्त्वेवंततः किमतआह नोद्विजंतः नत्वकोपाद्बिभ्यतैव
इतितेषामप्युपरितनेनोत्तरेणान्वयः सत्वधाम्न इत्यनेन शुद्धसत्वैकतानस्यतवकोपः स्वाभाविकोनभवतिकिंतुलोकरक्षणार्थंकृतस्ततस्तद्रक्षणरूपक्रीडार्थमेव।
यदभिप्रेतंतदेवअनक्ति क्षेमायेति अस्यजगतः क्षेमायपालनपरिरक्षणाय भूतयेयोगायालभलाभायालसुखायअलालकस्वात्मानंदानुभवजसु
खायचभगवतस्तवरुचिरैः सुंदरैरवतारैर्नृसिंहादिभिर्विक्रीडितंभावितः विविधाक्रीडाइत्यर्थः इयंतुमेविषयकोपाग्निस्तातवक्रीडालोकक्षेमायभीमि
तिभयः स्वंविधक्रीडयाहिदुष्कृतविनाशाद्धारस्थितिःपरिपालनमपवर्गश्रेयःप्राप्तिः श्रवणास्मिल्लीलाक्रीडामनुभवतोलोकस्यनिःश्रेयसबंधकर्मक्षयरूपमोक्ष
द्वारात्मसुखानुभूतिश्चभवतिस्तिस्त्यतदर्थंतवविक्रीडितमितिभावः १३ यतस्तवविक्रीडितंलोकस्यक्षेमायर्थंततस्माद्धेनृसिंहमन्युंयच्छउपसंहरहतःपरंनम।
नुनाशयोजनमस्तीत्याह अधुनाअसुरोमत्पितात्वयाहतःलोकानिर्वृतिंसुखंइताःप्राप्ताश्च ननुलोकानिर्वृतिंयंतुनाममलोकांतर्गतःसाधुजनमुम

सर्वेप्यमीविधिकरास्तवसत्वधाम्नोब्रह्मादयोवयमिवेशनचोद्विजंतः क्षेमायभूतयउतात्मसुखायचास्यविक्री
डितंभगवतोरुचिरावतारैः १३ तद्यच्छमन्युमसुरश्चहतस्त्वयाद्यमोदेतसाधुरपिवृश्चिकसर्पहत्या लोकाश्चनि
र्वृतिमिताःप्रतियंतिसर्वेरूपंनृसिंहविभयायजनाःस्मरंति १४ नाहंबिभेम्यजिततेतिभयानकास्यजिह्वार्कनेत्रभ्रुकु
टीरभसोग्रदंष्ट्रात् आंत्रस्रजःक्षतजकेसरशंकुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् १५ ननुतामीमांसूतहिंसांनानुमोदेतात

आह साधुरपिलोकोपद्रवकारिवृश्चिकसर्पादिहत्यामोदेतवृश्चिकसर्पादितुल्यस्यममपितुर्हत्यासाधुजनोपिमोदेतैवेत्यर्थः प्रतिशाह किंचतःसर्वब्रह्मा
दयोनिर्भयाःप्रतियंतुस्वस्थानानिप्रतिगच्छंतु इतःपरं इदंतद्रूपमभयायजनाःस्मरंति १४ ब्रह्मादयस्तूद्विजंतएतविशेषणब्रह्मादीनामेवकोपभुक्तमस्मद्
पाद्रूपंदृष्ट्वातुनबिभेषिकिमतआह नेति हेअजितत्वदस्माद्रूपादितिविशेष्याध्याहारः अहंनबिभेमिकथंभूतात्स्यंजिह्वार्कसदृशेनेत्रेचभ्रुकुटी
रभसउग्रोपद्रवयादंष्ट्राश्चनात्यतिभयानकानियस्मिनांत्रमय्यःस्रजोयस्मिन्क्षतजाहरुधिराक्ताःकेसरायस्मिन्शंकुवदुन्नतौकर्णौ
विर्भूतगुणाष्टकत्वेन भगवत्साधर्म्यमागतो मुक्तो भवतीति यावत् ९ अमे हृदि कामानुदयरूपाद्वरादन्यं वरं सर्वथा मा दा इति प्रार्थनाभि
प्रायेण भगवंतं नमस्करोति ॐ नम इति भगवते षड्गुणाश्रयाय पुरुषाय सर्वांतरात्मने महात्मने केवलं भक्ता वनैकस्वभावाय ह
रये आश्रितार्तिहराय अद्भुतसिंहाय माहात्म्यासाधुपरित्राणार्थमुपात्तनृसिंहरूपाय ब्रह्मणे स्वरूपेण गुणैश्च निरतिशय बृह
ते परमात्मने लोकत्रयस्यांतः प्रवेशेन भर्त्रे अपाणवपतिपाद्याय तुभ्यं नमः १० एवं प्रत्याख्यातवरायैव प्रह्लादमाह भ
गवान् श्री नृसिंहः नैकांतिन इति भवद्विधास्त्वादृशा मत्प्रियैकांतिनः एकांतभक्ता अनन्यप्रयोजनेन भजंतः मे मत्तः जातु कदाचि
दपि इह अमुत्र च लोके आशिषः कामाना शासते न यद्यपि न प्रार्थयंते तथाप्येतन्मन्वंतरपर्यंतमत्रैव लोके दैत्येश्वराणामपि योग्यान्भो
तिरीयः मा मास्तु इत्यत आह वद्वः स्यां इत्यत आह श्रीगणेशाय नमः श्रीहनुमते नमः श्रीसरस्वत्यै नमः श्रीपत्नमः श्री:

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ टी॰ ५५ सर्वात्मनेतिद्वाभ्यां हे वत्स लोके ये मद्भक्ताः पुरुषास्त्वां मद्भक्तमनुव्रताः अनुवर्तमाना भवंति त्वं यथा मद्भक्तोसि स्तत यद्यपि भगवद्भक्ता।
भेवमतस्तस्त्वमपि वर्तमाना मद्भक्ताः भवंति अतः सर्वेषां भक्तानां प्रतिरूपधृक् दृष्टांतभूतः अतस्त्वं भागवतोत्तमोसीति भावः तदनुव।
त्ति प्रकारमाह उत्कृष्टेष्वपकृष्टेषु च भूतग्रामेषु देवमनुष्यादिभूतसंघेषु सर्वात्मना करणत्रयेण न किंचिदपि हिंसंति मद्भक्ता विगतास्पृहा ये।
षां मम साम्यापत्तिनिस्पृहा इतिवा नाहं त्वाशीर्भवं लिस इत्यंते नैवामाने शिक्षयंतीत्यर्थः २० २१ अतः सर्वपापैः तस्य विशुद्धस्य तव पितुः प्रेतकार्याणि।
दाहादिकर्माणि कुरु अंग हे प्रह्लाद शोभना प्रजा पुत्ररूपा यस्य स त्वयि तामदंगस्पर्शेन मच्छरीरसंस्पर्शेन हेतुना पुण्यलोकान्यास्यति प्राप्स्यति प
द्गुपतीति पाठे द्रक्ष्यतीत्यर्थः वर्तमानसामीप्ये भविष्यति लट् २२ पित्र्यं पितृसंबंधि पित्राधिष्ठितं मद्देहं भवनं विहाय पित्र्यं हा नाधिप संस्थानमधि।
तिष्ठेत्यर्थः हे तात मयि मन आवेश्य न लब्वाहिमिरुक्तमनतिक्रम्य कर्माणि मत्पराः धनकृपाणि मत्परः अहमेव परस्तेषां कर्मणां फलं यस्य तथाभूतः

सर्वात्मना न हिंसंति भूतग्रामेषु किंचन उच्चावचेषु दैत्येंद्र मद्भावविगतस्पृहाः २० भवंति पुरुषा लोके मद्भक्तास्त्वामनुव्रताः भवान्मे।
खलु भक्तानां सर्वेषां प्रतिरूपधृक् २१ कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः मदंगस्पर्शनेनांग लोकान्यास्यति सुप्रजाः २२ पि
त्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्मवादिभिः मय्यावेश्य मनस्तात कुरु कर्माणि मत्परः २३ नारद उ॰ प्रह्लादोपि तथा चक्रे पितुर्यत्सांपराय
कं यथाह भगवान्राजन्नभिषिक्तो द्विजोत्तमैः २४ प्रसादसुमुखं दृष्ट्वा ब्रह्मा नरहरिं हरिं स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः २५।
ब्रह्मोवाच देवदेवाखिलाध्यक्ष भूतभावन पूर्वज दिष्ट्या ते निहतः पापो लोकसंतापनोसुरः २६ त्वंकुरु २२ एवमुक्तः प्रह्लादो यथोक्तम

करोदित्याह नारदः प्रह्लादोपीति हे राजन् युधिष्ठिर यथा भगवानाह तथा प्रह्लादः पितुर्यत्सांपरायिकं प्रेतोद्देशेन कर्तव्यं तत्सर्वं चक्रे ततो द्विजोत्तमै
रभिषिक्तश्च बभूव दानवादीनामाधिपत्य .. मकरोदित्यर्थः २४ ततः प्रसादाभिमुखं सुंदरं मुखं यस्य तं नरहरिं भ्रान्तसिंहरूपं हरिम
भिन्नार्तिहरं भगवंतं दृष्ट्वा चतुर्मुखः देवादिभिः परिवृतः पवित्राभिर्वाग्भिः स्तुत्वा वाचां भगवद्गुणविषयकत्वेन लोकपावनकरत्वा
त्पवित्राभिरित्युक्तं प्राह वा च २५ तदेव चतुर्मुखवाक्यमाह चतुर्भिः हे देवदेवानामपि देव ननु त्वं इंद्रादिदेवानामपि देवो नाहं
तत्राह हे अखिलाध्यक्ष ननु सोपि त्वमेव तत्राह हे भूतभावन भूतानि भावयसि उत्पादयसीति तथा ननु सोपि त्वमेव तत्राह हे पूर्वज ममापि पूर्व राम ५५
कारणत्वेनावस्थित लोकानां संतापनकरो तस्त्वयायो पमसुरो दिष्ट्या दैवात् अद्य पातितः हतः दिष्ट्या हत इति तन्नहरस्य दुष्करत्वं सूचितं २६ श्रीश्री

3

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ईश्वरान्नपाप्नोति इत्याधिपत्यः स्वपितुर्निष्कृतिं प्रार्थयते त्रिभिः प्रह्लादः वरमिति हे महेश्वर वरदानां ब्रह्मादीनामपीश्वर तेऽहमेतद्वरं वृणे।
किं तद्यन्मे पिता ईश्वरस्य तव संबंधि तेजः प्रभावमविद्वानजानन् १५ सर्वलोकहितायेश्वरं प्रभुं त्वामनिंदन्निंदितवान् कथंभूतः त्वमा
दृष्टेति मिथ्यादृष्टिः निरभिमानयुक्तोऽत एव रुद्धामर्षाशयः प्रवृद्धो यो मर्षः क्रोधः तद्युक्तः आशयोंऽतःकरणं यस्य तादृशः इति पाठेऽप्ययमेवा
र्थः विद्धेति पाठे विद्धो व्यथितः स चासावमर्षयुक्तोऽतःकरणं यस्य सः एवंभूतस्त्वां सर्वलोकहितायेश्वरं प्रभुमनिंददिति यत्तदन्व
त्वद्भक्ते मयि च अघवान् द्रोही द्रोहं कृतवानिति १६ तस्माद्दुस्तराद्दुरंतात्पापात् मे पिता पूयेत विशुध्येत इति एतद्वरं वृणे इत्यन्वयः यद्यपि ते त
वापांगेन संदृष्ट एव पूतः मम पिता तथापि हे कृपणवत्सल कामदरूपेन प्रार्थये इत्यर्थः १७ एवं प्रह्लादेन प्रार्थितो भगवांस्तमाह

प्रह्लाद उ० वरं वरय एतत्ते वरदेशान्महेश्वर यदनिंदत्पिता मे त्वामविद्वांस्तेज ऐश्वरं १५ विद्धामर्षाशयः साक्षात्सर्वलो
कगुरुं प्रभुं भ्रातृहेति मृषादृष्टिस्त्वद्भक्ते मयि चाघवान् १६ तस्मात्पिता मे पूयेत दुरंताद्दुस्तरादघात् पूतस्तेऽपांगसं
दृष्टस्तदा कृपणवत्सलः १७ श्रीनृसिंह उ० त्रिःसप्तभिः पिता पूतः पितृभिः सह तेऽनघ यत्साधोऽस्य गृहे जातो भवान्वै कु
लपावनः १८ यत्र यत्र च मद्भक्ताः प्रशांताः समदर्शिनः साधवः समुदाचारास्ते पूयंतेऽपि कीकटाः १९ श्रीरामः॥।

वीद्रुः त्रिःसप्तभिरिति न केवलं ते पितैव पूतः अपि तु हे अनघ त्रिःसप्तभिः पितृभिः सह पूत इत्यर्थः कुतः यद्यस्मात् साधो महाभागवत
कुलपावनः भवांस्तस्य हिरण्यकशिपोर्गृहे जातः यद्यपि हिरण्यकशिपोः पितरः कश्यपो मरीचिर्ब्रह्मा चेति त्रय एव तथापि प्राक्स्वगत
पित्राद्यभिप्रायेण त्रिःसप्तभिरित्युक्तं मद्भक्तस्य तव जननादेव दत्तकुलं पूतं इत्यभिप्रायः १८ एतदेव स्वभक्तप्रभावदर्शनेनाह मि३
यत्रेति समदर्शिनः कृत्स्नं जगद्ब्रह्मात्मकत्वेन पश्यंतः प्रशांताः जितेंद्रियाः सम्यगुत्तम आचारो येषां ते साधवः परोपकारशीलाः
मद्भक्ताः यत्र यत्र देशे संति ते कीकटतुल्या निकृष्टदेशा अपि तावदास्तां भवादृशाः अपि पूयंते शुद्धा भवंति १९ ननु त्वद्भक्तानामयं
प्रभावः इति तत्र विश्वासो नाहं वृतात्मा इति चिंते तत्राह श्रीगणेशायनमः श्रीरामायनमः श्रीरामानुजो विजयतेतराम् श्रीसूर्येनमः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ वी॰ ५६ एवमितिसप्तभिः विजयौपार्षदौ स्थितौ विप्रशापेनसनकादीनांशापेनहेतुना पुनःत्वमेवंप्रापितौवैरभावेनहेतुनाकृदिस्थितेनहरिणानृसिंहरूपंविभ्रताहतौ ३५
पुनः कुंभकर्णरावणाख्यौराक्षसौबभूवतुः तौचरघुवरस्यरामस्यविक्रमैर्हतावभिमतावित्यर्थः ३६ तौचरामस्यराघवस्यरामस्यसायकैर्बाणैःपुनः
निर्भिन्नहृदयौयथोस्तौशयानौतस्मिन्श्रीरामेसर्वमिवत्तंययोस्तौयथाप्राक्तनजन्मनितद्देहंजहतुः तत्यजतुः ३७ तावेवेहशिशुपालकरूषकौ
शिशुपालदंतवक्त्ररूपेणजातौपुनर्हरिणाहतौवैरानुबंधेनहेतुनातेतवपश्यतः सतःसमीपंतुसायुज्यंप्रापतुः ३८ नकेवलंशिशुपालकरूषकौ
वसमीपंतुरपितन्येपिराजानःकृष्णेवैरिणस्तसेवेतिचेदनःपापंपूर्वकृतंजहुःतत्यजुःततघालनः कृष्णात्मानंध्यानंभवन्नयथापेशस्कृतन्त्विंत्यमानो
टी॰५ कीटतद्धामभवतितद्वत्तत्तुल्यस्वभावाज्यभवन्नित्यर्थः आत्मशब्दःस्वभाववाचीतस्यवात्मास्वभावोयेषांतेइत्युपेमानबहुव्रीहिः अन्यथाहसंतेवपश्यो

एवंतौपार्षदौविजयौपुनस्त्वंप्रापितौरितिः हृदिस्थितेनहरिणावैरभावेनतौहतौ ३५ पुनश्चविप्रशापेनराक्षसौतौबभूवतुः कुंभकर्णदशग्रीवौहतौतौरामविक्रमैः ३६ शयानौयुधिनिर्भिन्नहृदयौरामसायकैः तच्चित्तौजहतुर्देहंयथाप्राक्तनजन्मनि ३७ ताविहाथपुनर्जातौशिशुपालकरूषकौ हरौवैरानुबंधेनपश्यतस्तेसमीयतुः ३८ एनःपूर्वकृतंयत्तद्राजानःकृष्णवैरिणः जहुस्तेन्तेतदात्मानःकीटःपेशस्कृतोयथा ३९ यथायथाभगवतोभक्त्यापरमयाभिदा नृपाश्चैद्यादयःसात्म्यंहरेस्तच्चिन्तयाययुः ४० आख्यातंसर्वमेतत्तेयन्मांत्वंपरिपृष्टवान् दमघोषसुतादीनांहरेःसात्म्यमपिद्विषां ४१ एषाब्रह्मण्यदेवस्यकृष्णस्यचमहात्मनः अवतारकथापुण्यावधोयत्रादिदैत्ययोः ४२ प्रह्लादस्यानुचरितंमहाभागवतस्यच भक्तिर्ज्ञानंविरक्तिश्चयाथात्म्यंचास्यवैहरेः ४३

टी॰ नहिकीटःपेशस्कृतंहिध्यायतिकिंतुतस्यसमानाकारोभवस्तथ
वसनंतरंस्वेषसाम्यंयपुरित्यर्थः ३९ यथायत्नथाभक्त्याभगवतःसाम्यंयातितत्प्राकाश्यतयान्वियादयोपिनृपाःतस्यभगवतश्चिंतयासंरंभ
भक्तिवितयाहरेःसाम्यंययुः इन्नप ४० त्वंमांयत्पृष्टवान्किंतद्धुवतामपिदमघोषसुतादीनांशिशुपालादीनांहरेःसाम्यमित्येतत्सर्वंतेतुभ्यमा
टी॰ २ ख्यातंमयेत्यर्थः ४१ तदेवंप्रश्नस्योत्तरमुपसंहृत्यतदेतदाख्यानंविशिंषन्तत्कीर्तनश्रवणादिफलमाह एषेतिषड्भिः ब्रह्मणिब्रह्मकुलेसाधुर्ब्र राम ५६
ह्मण्यःसचासौदेवस्तस्यलोकत्रयमंतःप्रविश्यविभ्रतःकृष्णस्येयमवतारकथापुण्यापुण्यावहायत्रकथायामादिदैत्ययोर्हिरण्याक्षहिरण्यकशिपुर्व
धः प्रतिपाद्यते ४२ तथायत्रमहाभागवतस्यप्रह्लादस्यचरितंभक्तिर्ज्ञानंविरक्तिश्चभक्तिशब्देनभक्तियोगानुष्ठानप्रकारोविवक्षितःविरक्तिशब्दे
नतदुत्पत्तिप्रकारःज्ञानशब्देनात्मयाथात्म्यविवेचनपूर्वकंतदनुसंधानप्रकारः एतत्सर्वंयत्रकथायांप्रतिपाद्यतइत्यर्थः ४३ श्रीरामश्री

५४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तदेवाविःकुर्वन्नसुरंविशिनष्टि योसावसुरःमत्तःलब्धोवरोयेनतादृशः ममसृष्टिभिर्मयासृष्टैर्भूतैर्नवध्यःहंतुमशक्यःतपोयोगबलेनोन्नद्धःगर्
वितःसमस्तनिगमान्शास्त्रीयधर्मानहन्नुल्लंघितवान्सतुत्वयाविनाशितःतद्दिष्ट्याजातइतिभावः २७ किंतद्दिष्ट्याजातंकिमस्यासुरस्य
तनयोमहाभागवतोर्भकःप्रह्लादःत्वयामृत्योःसकाशाद्विमोचितइतिसन्ततवामितोदकोपाविष्टंसम्पर्णितःप्राप्तोधुनाप्रेतितैवतद्दिष्ट्याजा
तमित्यर्थः २८ हेभगवंस्तवैतद्वपुःनृसिंहरूपंध्यायतःप्रयतेनमनःसमाहितमनसःपुंसःसर्वतःसंत्रासाद्भयात्मृत्योरपिजिघांसतःहंतुमिच्छतःतस्मा
त्सोरपिसकाशाद्गोप्तृ ... एतच्चप्रह्लादरक्षातैनास्माभिरनुवर्तितमितिभावः २९ एवमभिहितस्तमाहभगवान्नेति हेपद्मसंभवैवंवरःप्रम
सेवंवरोऽसुराणांतेत्वयानप्रदेयःक्रूरोनिसर्गःस्वभावोयेषांतेषामहीनांसर्पाणांममृतंक्षीरंयथाक्षीरप्रदानेनतद्दर्पयथालोकोपद्रवकारितद्वद्वरं

योसौलब्धवरोमत्तोनवध्योममसृष्टिभिः तपोयोगबलोन्नद्धःसमस्तनिगमानहन् २७ दिष्ट्यास्यतनयःसाधुर्महाभागवतोर्भकः त्वयावि
मोचितोमृत्योर्दिष्ट्यात्वांसमितोधुना: २८ एतद्वपुस्तेभगवन्ध्यायतःप्रयतात्मनः सर्वतोगोप्तृसंत्रासान्मृत्योरपिजिघांसतः २९ नृ
सिंह उ० नैवंवरोसुराणांतेप्रदेयःपद्मसंभवः वरःक्रूरनिसर्गाणामहीनाममृतंयथा ३० नारद उ० इत्युक्त्वाभगवान्राजंस्ततश्चांतर्दधे
हरिः अदृश्यःसर्वभूतानांपूजितःपरमेष्ठिना ३१ ततःसंपूज्यशिरसाववंदेपरमेष्ठिनं भवंप्रजापतीन्देवान्प्रह्लादोभगवत्कलाः ३२ त
तःकाव्यादिभिःसार्द्धंमुनिभिःकमलासनः दैत्यानांदानवानांचप्रह्लादमकरोत्पतिं ३३ प्रतिनंद्यततोदेवाःप्रयुज्यपरमाशिषः स्वधामानि
ययूराजन्ब्रह्माद्याःप्रतिपूजिताः ३४

तेषांवरप्रदानमित्यर्थः ३० एवंब्रह्माणमनुज्ञाप्यान्तर्दधेहरिरित्याहनारदः इतीति हेराजंस्त
तःपरमेष्ठिनापूजितःसर्वभूतानामदृश्यःहरिरित्युक्त्वांतर्दधे इत्यन्वयः ३१ ततःप्रह्लादःपरमेष्ठिनंब्रह्माणंभवंरुद्रंप्रजापतीन्मरी
च्यादीन्देवांश्चइंद्रादीन्भगवत्कलाःभगवदंशभूतान्संपूज्यशिरसाववंदेननाम ३२ ततःकमलासनोब्रह्माकाव्यादिभिर्भृगि
वादिभिःसहितःप्रह्लादंदैत्यानांदानवानांचपतिमकरोत् ३३ हेराजन्ततोब्रह्मादयःसर्वेदेवाःप्रह्लादंप्रतिनंद्याहोत्व सभा
वोनिरैतेसाधारणइत्यभिनंद्यपरमाःश्रेष्ठाआशिषःप्रयुज्यप्रह्लादेनप्रतिपूजितास्वधामानिस्वस्थानानिययुः ३४ तदेवंशिशुपालदंत
वक्त्रयोर्भगवंतंद्विषतोःकथंमुक्तिरितियुधिष्ठिरप्रश्नस्यतद्वैजन्मादिस्मरणेनोक्तमुत्तरंउपसंहरति श्रीगणेशायनमः श्रीरामः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ टी॰ बी॰ ५० नेति यस्य भगवतो रूपं भवपद्मजादिभिः रुद्रब्रह्मादिभिः धियास्वमनीषया वस्तुतया याथात्म्येन न वर्णितं विषयीकृतं न भवति वाङ्मनसागोचरस्वरूपस्वभावत्वा
त्तैरेतावदित्युपवर्णितुमशक्यमित्यर्थः किंतु केवलं मौनेन तूष्णींभावसंशीलनरूपेण भक्त्योपासनालिकया प्रीति रूपयोपशमेन तैर्द्रुपजपादिना च पूजितस्तस्मा
धितः स तस्मान्ननु तां योगेश्वराणां पतिर्भगवान्मम प्रसीदतां प्रसन्नो भवतु ५० एवं संप्रार्थ्य श्रीरुद्रस्य सर्वव्यालिंगस्य परब्रह्मत्वसूचकं इतिहासं प्रस्तौति त।
त्प्रस्तावसरप्रहानाय श्रीरुद्रो विशिनष्टि सहेति हे राजन् स एष भगवान् ज्ञानशक्तिवैलक्षण्यादिभाक् स एव मुक्तः श्रीरुद्रः पुरा ऽनंतमायिना ऽनंता बहो मा
यायस्य तेन मयेन निर्मितं भूतेन रुद्रस्य देवस्य यच्छिद्रं तत् यशः तं यत्नेन ततानेन रुद्रादीनामपि यशः आदिगुणं हरत्वा अपायकल्पकमयेन स्वयमहृतं दुस्तरेणां।
तथाभायकल्वायोगासामर्थ्यात् त्वाभिन्नचपरब्रह्मत्वं समन्वितं ५१ तदेवं लब्धप्रस्तावसरो हृदयशङ्कापञ्चपञ्चकारं बुभुत्सुः पृच्छति कस्मिन्निति जगदीशितुर्भ
गवदायत्तजगदीशितुर्विलोकयमन्यसंकल्पं विमनस्कं स्वष्टुं इत्यादिना भगवदायत्तसामर्थ्यस्य वक्ष्यमाणत्वाद्देवस्य रुद्रस्य कीर्त्तिः कस्मिन्कर्मणि येन स्मीकेरेन

नयस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितं मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतांपतिः ५० स एष भगवान् राजन्व्य।
तनोद्धितं यशः पुरा रुद्रस्य देवस्य मयेनानंतमायिना ५१ युधिष्ठिर उ॰ कस्मिन्कर्मणि देवस्य मयोहन् जगदीशितुः यथा चोपचिता कीर्तिः कृष्णेना।
नेन कथ्यतां ५२ श्रीनारद उ॰ निर्जिता असुरा देवैर्युध्यनेनोपबृंहितैः मायिनां परमाचार्यं मयं शरणमाययुः ५३ स निर्माय पुरस्तिस्रो हैमीरौप्यायसी
र्विभुः दुर्लक्ष्यापायसंयोगा दुर्वितर्क्यपरिच्छदाः ५४ ताभिस्तेऽसुरसेनान्यो लोकांस्त्रीन्सेश्वरान्नृप स्मरंतो नाशयांचक्रुः पूर्ववैरमलक्षिताः ५५ ततस्ते से
श्वरा लोका उपासाद्येश्वरं विभुं त्राहि नस्तावकान्देव विनष्टांस्त्रिपुरालयैः ५६ अथानुगृह्य भगवान् माभैष्टेति सुरान्विभुः शरं धनुषि संधाय पुरेष्वस्त्रं
व्यमुंचत ५७ ततोऽग्निवर्णा इषव उत्पेतुः सूर्यमंडलात् यथा मयूखसंदोहा नादृश्यंत पुरो यतः ५८ कृष्णेनेत्येन निर्मितेनोपचिता तत्कथ्यतां ५२ इति पृष्टः श्री
हेत्वर्षिः निर्जिता इत्यादिना अस्मिन्नेन रुद्रेणोपबृंहितैः रक्षितैः तत्तैः देवैर्निर्जिता असुरा मायिनां परमाचार्यं तमप्याचार्यं मयं शरणं जग्मुः ५३ ततः स विभुः समर्थो मयः हैमीविकृतैः
स्वविकृतिः हैमीरूप्यमयरजतैरौप्याः अयसोलोहस्यायसी आयसीः तिस्रस्त्रयाणामितरेतरयोगद्वंद्वः तास्तिस्रः पुरो निर्ममे कीदृशीः दुर्लक्ष्योऽपायः संयोगश्चयासां ता
स्मोः पुरश्चागमनिर्गमनाश्चेति जनैरलक्षिता इत्यर्थः तथा दुर्वितर्क्याः साविज्ञनीयसाधारणेऽपि नतर्कितुमशक्याः परिच्छदा उपकरणानि यासां ताः ५४ ताभिस्त्रिविमानरूपाभिः पुरीभिर्
दृश्यागमनत्वमाभिः पुरीभिरसुरसेनान्यो दैत्यसेनानायकाः हे नृप अलक्षिताः वैरं स्मरमाणाः पूर्ववैरं स्मरंतः सेश्वरान्सपालान्त्रीन्लोकान्नाशयांचक्रुः नाशयितुमारब्धवंतः ५५
र्थः ५५ ततस्ते सेश्वराः इंद्रादिलोकपालैः सहिताः लोकाजनाः ईश्वरं रुद्रमुपासाद्य प्राप्यानताः संतः ऊचुः हे विभो त्रिपुरस्य पालयानिस्थानानि येषां तैर्विनष्टान्तावकान्त्वदीयान्नस्मा
न्हे देव त्राहि पालयेति ५६ अथ तदितरानंतरं तान्सुरान्माभैष्ट भयं मा कार्ष्टेत्यनुगृह्य भगवान्विभुः रुद्रः धनुषि शरं बाणं संधायारोप्य पुरेषु तत्स्मिन्संधानमस्त्रं पाशुपतं ततस्तिस्रोऽपि पुरेषु

राम ५०

55

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तथाजगत्सर्गस्थितिलयकारणस्यहरेर्वीर्याख्यंतत्ववर्णनंतस्यगुणानांकर्मणांचवर्णनं परावरेषांदेवासुरादीनांयानिस्थानानितेषांकालेननिमितेनम
टी२ हान्व्यत्ययोविपर्यासश्च ४४ भगवान्येनगम्यतेतल्लभ्यतेसभौगवतानांधर्मस्तयज्ञाध्यात्मिकमात्मानमधिकृत्यवर्तमानंतत्तुवेत्तितेरेतत्सर्वम।
स्मिन्नाख्यानेसम्यगाख्यातं ४५ यःपुमानेतद्धिस्मावीर्येणपराक्रमादिगुणजातेनोपबृंहितंततल्लतिपाद्येननविस्तीर्णमतस्यवपुराणमाख्यानंश्रुत्वा
श्रुत्वाकीर्तयेत्सपुमान्कर्मपाशैःपुण्यपापात्मकैःकर्मभिरेवपाशैर्विमुच्येत ४६ किंचयःपुमानादिपुरुषस्यमत्स्यनृसिंहस्यबमालीलादेहेष्वेषु
यवधात्मिकाप्रतिपाद्यायस्मिन्तदेतदाख्यानंप्रयतः समाहितचित्तःसतांप्रवरस्यप्रल्हादस्यपुण्यंप्रभावंचश्रुत्वापठेत्तेसोऽकुतोभयंकुतश्चिद्भय
रहितंलोकंवैकुंठाख्यंस्वर्गतिप्राप्नोतिपूर्वैकर्मपाशैर्विमुच्यतेत्स्तुकमत्राकुतोभयंलोकमेतीत्युक्तंकर्मपाशविमोचनद्वाराऽकुतोभयंलोकमेतीत्य

मू१ सर्गस्थित्यैसोत्स्वगुणकर्मानुकीर्तनं परावरेषांस्थानानांकालेनव्यत्ययोमहान् ४४ धर्मोभागवतानांचभगवान्येनगम्यते।
आख्यानेस्मिन्समाख्यातमाध्यात्मिकमशेषतः ४५ यएतत्पुण्यमाख्यानंविष्णोर्वीर्योपबृंहितं कीर्तयेच्छ्रद्धयाश्रुत्वाकर्म
पाशैर्विमुच्यते ४६ एतद्यआदिपुरुषस्यमृगेन्द्रलीलांदैत्येंद्रयूथपवधंप्रयतःपठेत् दैत्यात्मजस्यचसतांप्रवरस्यपुण्यंश्रुत्वानुभा
वमकुतोभयमेतिलोकं ४७ यूयंनृलोकेवतभूरिभागालोकंपुनानामुनयोऽभियंति येषांगृहानावसतीतिसाक्षाद्गूढंपरंब्र
ह्ममनुष्यलिंगं ४८ सवाअयंब्रह्ममहद्विमृग्यंकैवल्यनिर्वाणसुखानुभूतिः प्रियःसुहृद्वःखलुमातुलेयआत्मार्हणीयोविधि
कृद्गुरुश्च ४९ टी: एतानेषानरत्नयं ४७ अहोप्रल्हादस्यभाग्यंयेनभगवान्दृष्टोवयंतुमंदभाग्याइतिविषीदंतंयुधिष्ठिरमाहत्रिभिः॥
यूयमिति लोकेयूयमहोभूरिभागाबहुभाग्यवंतः तेद्वचयंजपंतान्विशि नष्टियेषांयुष्माकंगृहान्लोकंपुनानामुनयोऽभियंतिसर्वतःस।
मायांति तत्कुतःमनुष्यलिंगमनुष्यशरीरंपरंब्रह्मश्रीकृष्णरूपंगूढंप्रच्छन्नंसद्येषांगृहानावसतीतिहेतोःसमायांति ४८ ननुश्री टी२
कृष्णोस्माकंमातुलेयःकथंपरंब्रह्मेत्युच्यतेतत्राह सवैसायंश्रीकृष्णोब्रह्मैवकिंतद्ब्रह्मयद्भिन्नःश्रीकृष्णोवायुष्माकंनकेवलं।
मातुलेयोऽपितुप्रियःसुहृच्चात्मातेरात्मार्हणीयःपूज्यःविधिकृन्नियोगकारीगुरुरितियेद्वान्वैवमनेकधायुष्माकंतसंबंधिनांभाग्यं
मू२ किंयदितिवक्तव्यमितिभावः महद्विमृग्यमित्यनेनमहतामपितत्स्वरूपंयथावद्दुरवगममित्युक्तं प्रियःसुहृदित्यनेनतन्महद्वि
मृग्यंतत्स्वयमेवयुष्माकंप्रसन्नंइतिच ४९ महन्मृग्यत्वमेवप्रपंचयन्तत्प्रसादंप्रार्थयेत श्रीहृत्तमतोविजयतेतराम्॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

संबधीत्यत्राहमहदितिप४

स॰ टी॰ भा॰ टी॰ पृ॰ ७०

तत्र शक्तिर्नाम स्वाप्यकलितविशेषभक्तकार्यायियुक्तासा च धर्मादिरूपेण बहुविधा तत्र धर्मशक्तिर्नाम साधुपरित्राणसामर्थ्यात्मिका तथा चोक्तं श्रीमन्मा।
यमुनिभिः योवीतियुगपत्सर्वं प्रत्यक्षेण सदा स्वतः इति विरक्तिर्नाम सर्वेभिः मध्यो तावाक्यैः इति श्रुत्यवगतावाप्तसमस्तकामत्वेपित्त्नादरेणा
वस्थानसामर्थ्यात्मिका ऋद्धिर्नाम ऐश्वर्यं स्थसर्वेश्वरः एष भूताधिपतिरित्यादिप्रमाणावगतसर्वान्तरात्मत्वेन तानि यंत्रत्वसामर्थ्यं तपः शक्तिर्नाम सत्तपोत
प्यत स तपस्तप्त्वा इदं सर्वमसृजतेत्यादिश्रुत्यवगता जगद्रूपेण परिणामयुक्तसंकल्परूपज्ञानात्मिका विद्यानाम सत्यकामः सत्यसंकल्प इत्याद्यवगतास
त्यसंकल्पात्मिका सत्यसंकल्पत्वं च स्वावताराद्ब्रह्मविभागान्तरसृष्टौ जगद्व्यापारादि च यासां सघसंकल्पसंक्रियानामाघटितघटनात्मिका स्वा
विकी ज्ञानबलक्रिया चेत्याद्यवगता आदिशब्देन बलवीर्यतेजआद्यस्तत्र बलं श्रमप्रसंगरहितं सर्वधारणसामर्थ्यं एष सेतुर्विधारण इत्यादिभि
वगतं वीर्यं नाम सर्वधारणे विकाररहितत्वं तेजः अन्याधीनसहकार्यनिरपेक्षत्वं रूपमिति वाहानश्वान् वर्म कवचमादिशब्देन प्रग्रहादिकं गृह्यते ६७
भगवद्धर्मेशत्वात्मकं रथमारुह्य सन्नद्धः कवचितः इषुः शरं धनुश्चोपाददे स्वीकृतवान् ततो धनुषि शरं संधायाभिजिन्मुहूर्ते दिवसस्याष्ट

धर्मज्ञानविरक्त्यृद्धितपोविद्याक्रियादिभिः रथं सूतं ध्वजं वाहान् धनुर्वर्म शरादि यत् ६७ सन्नद्धो रथमास्थाय शरं धनुरुपाददे शरं धनुषि
संधाय मुहूर्तेऽभिजितीश्वरः ६८ ददाह तेन दुर्भेद्यो हरोऽथ त्रिपुरं नृप दिवि दुन्दुभयो नेदुर्विमानशतसंकुलाः ६९ देवर्षिपितृसिद्धेशा जयेति कु
सुमोत्करैः अवाकिरन् जगुर्हृष्टा ननृतुश्चाप्सरोगणाः ७० एवं दग्ध्वा पुराणि त्रीणि भगवान् पुरहा नृप ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्य
त ७१ एवंविधान्यस्य हरेः स्वमायया विडम्बमानस्य नृलोकमात्मनः वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकान् पुनानान्यपरं वदामि किं ७२ इति सप्तमे १०

मे मुहूर्ते ६८ भगवतः श्रीरुद्रस्य तेजसा तत्तथाविधेन युक्तं त्रिपुरं ददाह बाणप्रयुक्तहरेण हे नृप तदा दिवि दुन्दुभयो नेदुः देवानां विमानशतानि संकुलानि
येषां ते ६९ देवर्ष्यादयः जयेति वदन्तः उत्कर्षेण वर्तस्वेति वदन्तः कुसुमोत्करैः पुष्पवर्षैः भुवमवाकिरन् ववृषुः अप्सरसां गणाश्च जगुर्ननृतुः ७० हे नृप एव
मित्थं त्रीणि पुरः पुरीः दग्ध्वा पुरहा भगवान् रुद्रः ब्रह्मादिभिः स्तूयमानः स्वस्थानं प्रत्यपद्यत प्राप्तवान् ७१ श्रीकृष्णस्य परब्रह्मत्वाभिन्नत्वस्य च प्रभावप्रतिपादनमु
पसंहरन् प्रश्नान्तरावसरं प्रयच्छति एवमिति आत्मनः स्वस्य मायया संकल्पेन न तु कर्मणेति भावः नृलोकं विडम्बमानस्य अनुकुर्वतः तरसजातीयत्वं कुर्वतः इत्यर्थः
हरेरशितानि चरित्रलोकस्य हितोपदेशकस्य श्रीकृष्णस्य ऋषिभिः गीतानि एवंविधानि वीर्याणि लोकं पुनानानि बहूनि सन्तीति शेषः साकल्येन केनापि वक्तुं न शक्यानीति भावः
अतोऽन्यत्किं वदाम्यन्यत्किं विलपाम्यस्मि इति वक्तव्यामित्यर्थः ७२ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे दशमोऽध्यायः १० श्रीरामः

५३ राम ५९

56

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तैरिषुभिः स्पृष्टास्ताडिताः त्रीणि पुराण्योकांसि स्थानानि येषां ते असुराः सर्वे व्यसवः विगतासवः प्राणा येषां तादृशाः संतो निपेतुः पतितवंतः।
तान् व्यसून् असुरान् आनीय महायोगी मयः कूपरसे स्वयं विनिर्मिते कूपगते रसे अमृते संजीवयितुं अक्षिपत् अपातयत् ५९ तेन सिद्धामृतरसेन स्पृ-
ष्टा असुराः वज्रसारवद् दृढांगा महौजसो महाबलाः संतो मेघदलना मेघभेदका वैद्युता वह्नय इव उत्तस्थुः उत्थितवंतः ६० तथा भग्नः संकल्प-
स्यात एव विमनस्कं दुःखितमनस्कं वृषध्वजं रुद्रं विलोक्य अयं भगवान् श्रीकृष्णो विष्णुस्तत्र सिद्धामृतरसविनाशे उपायम् अकल्पयत् ६१ स।
देवाह वत्स इति अयं श्रीकृष्णो विष्णुः स्वयं गौर्धेनुरूपा आसीत् ब्रह्मा च वत्सो वत्स आसीत् ततो गोरूपोऽयं विष्णुः स्वयं त्रिपुरं त्रयाणां पुराणां
समाहारस्तत् प्रविश्य काले मध्याह्ने रसकूपामृतं रसस्य कूपगतम् अमृतं पपौ पायितवान् ६२ ते असुराः पिबंतीं गां पश्यंतोऽपि भगवन्मायया वि-

तैः स्पृष्टा व्यसवः सर्वे निपेतुस्त्रिपुरौकसः तानानीय महायोगी मयः कूपरसेऽक्षिपत् ५९ सिद्धा-
मृतरसस्पृष्टा वज्रसारा महौजसः उत्तस्थुर्मेघदलना वैद्युता इव वह्नयः ६० विलोक्य भग्नसं-
कल्पं विमनस्कं वृषध्वजं तदायं भगवान् विष्णुस्तत्रोपायमकीकरत् ६१ वत्स आसीत्तदा ब्रह्मा स्वयं
विष्णुरयं हि गौः प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ६२ तेऽसुरा ह्यपि पश्यंतो न न्यषेधन् विमोहिताः
तद्विज्ञाय महायोगी रसपालानिदं जगौ ६३ स्वयं विशोकः शोकार्तान् स्मरन् दैवगतिं च तां ६४ मय उ० दे-
वोऽसुरो नरोऽन्यो वा नेश्वरोऽस्तीह कश्चन आत्मनोऽन्यस्य वा दिष्टं दैवेनापोहितुं द्वयोः ६५ नारद उ० अथासौ श-
क्तिभिः स्वाभिः शंभोः प्राधानिकं व्यधात् ६६

तौ ताय
मोहितास्तान् न्यषेधन् न्यवारयन् ततः [redacted] ज्ञात्वा महायोगी मयः रसं कूपगतम् अमृतं
रसपालयंतीति तथा तान् असुरान् शोकार्तान् दैवगतिं स्मरन् तस्य विशोकः स्वयं स्मयन् इदं वक्ष्यमाणं जगौ उवाच ६३ ६४ तदेवाह देवइ-
ति आत्मनोऽन्यस्य वा द्वयोरपि दैवेन ईश्वरेण दिष्टम् उपकल्पितं सुखं दुःखं वा अपोहितुं इह लोके देवादन्यस्तौ यः कश्चिद् देवादिर्न ईश्वरः न प्रभुर्न समर्थः
दैवेन सुखं दुःखं वापि हेतुं समर्थः ६५ अथ निःशेषरूपामृतरसपानानंतरम् असौ श्रीकृष्णः धर्मादिभिः स्वाभिः शक्तिभिः शंभोः रुद्रस्य प्राधानिकं
प्रधानं संग्रामः तस्य साधनं पदार्थसमूहं तादृशं पंतम् धात् क्रमेण धर्मादिस्वशक्तीः रथादिरूपेण आदिसृष्टिः तत्राह तदा शक्तिम् अकरोदिति यावत् ६६।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰
भा॰ टी॰
वी॰
५९

एवमापृष्टो धर्मान्भगवान्नारदस्तान्विवक्षुः स्वस्य साक्षात्तदुपदेष्टारं श्रीमन्नारायणं नमस्कुर्वन्प्रतिज्ञाय तं विशिनष्टि नत्वेति द्वाभ्यां अजाय कर्मायत्तोत्पत्तिरहिताय
भगवते नारायणाय लोकानां यो धर्मस्तस्य सेतवे कारणाय प्रवर्त्तकाय तस्मान्नारायणमुखाच्छ्रुतं सनातनं धर्मं वक्ष्ये ५ एवं प्रतिज्ञां कृत्वा तन्मुखादात्मनः
श्रवणं संभावयन्तं विशिनष्टि यो भगवानात्मनोंशात्मभूतेन नरेण सह दाक्षायण्यां तु मूर्त्तौ धर्मतो मूर्त्त्यभिधेरवतीर्य लोकानां स्वस्तये बदरिकाश्रमेऽध्या
स्ते ६ तावद्विविक्तेन धर्मप्रमाणमाह धर्मस्य मूलं प्रमाणं धर्मप्रमापको भगवानेवेत्यर्थः ननु भगवतः प्रत्यक्षादिप्रमाणानतीतत्वात्कथं तस्य धर्म
प्रमापकत्वमिति शंकां निराकुर्वन्तं विशिनष्टि सर्ववेदमयः ऋग्यजुःसामादिवेदैः स एव प्रभुरतः न साक्षाद्भगवान्प्रमाणमपि तु साक्षात्प्रमाणभूतसर्व
वेदाविष्कारद्वारेति भावः तदाविष्कारकारकत्वं चैतस्य श्रूयते तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतदृग्वेद इत्यादि किं च हे राजन् त

नारद उ॰ नत्वा भगवतेऽजाय लोकानां धर्मसेतवे वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतं ५
योऽवतीर्यात्मनोंशेन दाक्षायण्यां तु धर्मतः लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्रमे ६
धर्ममूलं हि भगवान्सर्ववेदमयो हरिः स्मृतं च तद्विदां राजन्येन चात्मा प्रसीदति ७

द्विदां वेदविदां स्मृतयः तद्धर्ममूलं इत्यर्थः तद्विदामित्यनेन स्मृतीनां स्वमूलभूतश्रुत्यनुमापनद्वारा धर्मप्रमापकत्वमिति सूचितं तद्विदां
स्मृतयः इत्यनेन तद्भिन्नमूलकशाक्यादिस्मृतिव्यावृत्तिः स्मृतं च शीलमिति चशब्देन शिष्टाचारादिसंग्रहः तदुक्तं मनुना वेदोऽखिलो धर्ममूलं स्मृ
तिशीले च तद्विदां आचारश्चैव साधूनामात्मनस्तुष्टिरेव चेति याज्ञवल्क्योऽपि श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः
सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतमिति धर्मं विशिनष्टि येन धर्मेण स्वाचरितेन भूतेनात्मा परमात्मा प्रसीदतीति परमात्मप्र
सादहेतुत्वादवश्यं तच्छ्रवणादिकर्त्तव्यमिति भावः ७ एवं धर्मप्रमाणान्यभिधाय तावल्लक्षणाय साधारणधर्मानाह पंचभिः श्रीः

57

राम
५९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तरेवं श्रुतप्रह्लादचरितोऽपरं वदाम किं इति प्रश्नायचेदितो युधिष्ठिरः वर्णाश्रमादिधर्मान् तत्र तत्र भगवद्भक्तियोगांगत्वेनोक्तान् बुभुत्सुः पप्रच्छेति तन्निर्णयाय
तदेवं श्रुतप्रह्लादचरितोऽपरं वदाम किं इति प्रश्नायचेदितो युधिष्ठिरः
साह भगवान् शुकः श्रुत्वेति उरुक्रमे भगवत्यात्मा मनो यस्य दैत्यपतेः प्रह्लादस्य साधुभिः सभाजितमनुसेवितं ईहितं चरितं श्रुत्वा हर्षेण युक्तो युधिष्ठिरः
पुनर्महत्तमानामग्रण्यमग्रगण्यं ब्रह्मणः पुत्रं नारदं पप्रच्छ साधुसभाजिते महत्तमाग्रण्य उरुक्रमात्मन इति पाठान्तरं तत्र महत्तमानामग्रण्य एव मुख्यः उरु
क्रमात्मनः प्रह्लादस्येहितं साधूनां सभायां सभाजिनं सत्कृतं श्रुत्वेत्यर्थः १ प्रश्नमेवाह त्रिभिः हे भगवन् नृणां वर्णानां ब्राह्मणादीनामाश्रमाणां ब्रह्मच
७।५ र्याद्याश्रमनिष्ठानां चारैर्युतं नृणां सनातनमनादिपरंपरागतं नतु सर्वाचीनपाखंडिकल्पितं वर्णाश्रमाचारयुतेन तत्तत्प्रतिपन्नजनाचारयुतं स्वं स्वं क्रिया
कर्मादिरूपं धर्मं आत्मा नाविदितं इतिभावः वर्णाश्रमाचारवता पुरुषेण परः पुमान् विष्णुराराध्यते नान्यः पंथास्तत्तोषकारणं इति स्मृतेः धर्मश्रोतुमिच्छामि त
त्त्ववेत्ता अयां हेतुं वदन् विशिनष्टि यद्यस्माद्धर्मात्परं परमपुरुषं विंदते भक्तियोगनिष्पत्तिद्वाराप्राप्नोतीत्यर्थः २ ननु धर्मविषये बहुकर्त्तारो श्रोतव्याः प्रष्टव्यास्त

श्रीशुक उ॰ श्रुत्वेहितं साधुसभासभाजितं महत्तमाग्रण्य उरुक्रमात्मनः युधिष्ठिरो दैत्यपतेर्मुदा युतः पप्रच्छ भूयस्तनयं स्वयंभुवः १ यु
धिष्ठिर उ॰ भगवन् श्रोतुमिच्छामि नृणां धर्मं सनातनं वर्णाश्रमाचारयुतं यत्पुमान्विंदते परं २ भवान्प्रजापतेः साक्षादात्मजः पर
मेष्ठिनः सुतानां संमतो ब्रह्मन् तपोयोगसमाधिभिः ३ नारायणपरा विप्रा धर्मं गुह्यं परं विदुः करुणाः साधवः शांतास्त्वद्विधा
न तथापरे ४ श्रीरस्तु

आह भवानि त्वमेवास्य धर्मं गुह्यं न विदुस्तस्मात्त्वमेव ब्रूहीतिभावः तदेव व्यंजयंस्त्वां विशिनष्टि प्रजानां पत्युः परमे
ष्ठिनः साक्षाद्भवानात्मजः पुत्रः सर्वोपि धर्मः परमेष्ठिमुखेनोपदिष्टः इति ततो गृहीतधर्मरहस्यस्त्वमेव तद्वक्तुं समर्थ इतिभावः ननु परमेष्ठिनः सुता अपि ब
हवः संतीत्यत्राह हे ब्रह्मन् सुतानां मध्ये भवान् परमेष्ठिनः संमतः मततरां प्रीतिविषयः सुतोतो धर्मरहस्यं तेन तुभ्यमुपदिष्टं भवेदितिभावः ३ ननूपदिष्टधर्मरहस्यो परं
तद्विस्मृतवानित्यत्राह तपआदिभिरुपायैर्नारायणपराः नारायणपरस्त्वत्तुल्या अन्ये शांता दर्शविप्रायस्वं परं धर्मं गुह्यं विदुः भगवद्भक्त्यंगत्वेन वर्णाश्रमादि
धर्मं नु तिष्ठतां युष्माकं न तद्विस्मृतिरितिभावः जानंतो वयं रहस्यार्थं नकथयामइतित्वत्राह करुणा इति करुणावंतः करुणावतां
मम धर्मरहस्यज्ञानप्रयुक्तदुःखस्य निरास चिकीर्षायुक्तैवेतिभावः ननु तच्छ्रवणे त्वमनधिकारीतिशंकां निरः कुर्वन्विशिनष्टि शांता रागादिप्रयुक्तैष
म्यरहिताः किं तवैतद्रहस्योपदेशेन मम प्रयोजनं तत्राह साधवः स्वार्थनिरपेक्षपरोपकारशीलाः सर्वं भूतमलहिधायस्य न तथापरे संतीत्यर्थः ४ श्रीरस्त

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰
भा॰ टी॰
वी॰
६०

संस्कारा इति यत्र संस्काराः गर्भाधानादयोऽविच्छिन्नाः स द्विजः ननु मध्ये स्थापितत्वविच्छेदे द्विजत्वं स्यात्तत्राह अजो ब्रह्मायमेवं संस्कारयुक्तं।
जगाद श्रुतिस्मृतिमुखेन स द्विजः एतदुक्तं भवति यत्र वंशे संस्कारयुक्तं जगादनेवाय नयनवर्त्मनोनासौ द्विजः तथाच श्रुतिः विवाहमात्रं संस्कारं शूद्रोऽपि
लभतां सदा नेकं न व्यभवत् समसृजत इत्यादं प्रजापतिरिति श्रुतिश्च गायत्र्या ब्राह्मणमसृजत् त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छन्दसा शूद्रमिति अतो विवा
हव्यतिरिक्तसंस्कारस्याभावात् पुनः पुनः स्तुतिनिषेधान्न तस्य द्विजत्वमुच्यते इति व्याचक्षते वस्तुतस्तु द्विजत्वादिकमदृष्टविशेषसंबंधरूपं न जातिरूपं
न ब्राह्मणो द्विजः तस्य पादे विश्वस्योत्पत्तिमात्रं केवलसंस्कारमात्रत्वं वा अन्यथादिकाललक्षणामुखवर्षादि प्रभवानां पश्वादिभ्योऽभिन्नप्रभवानां ब्राह्मण्या-
द्यभावप्रसंगात् संतानविशेषप्रसूतत्वादिकं च तादृगदृष्टविशेषवत्त्वसूचकं संतानविशेषो यत्तैस्तन्मूलकसंसारो ब्रह्मकृतादृष्टकार्यत्वादेतो
किकविप्रकर्षविशेषकारणत्वाच्च एवं च कार्यकारणानुमानमिति न्यायेन यत्र कार्यभूताः संस्कारा अविच्छिन्नाः पित्रादिपरंपरया विच्छिन्नादृष्टाः

संस्कारा यत्र विच्छिन्नाः स द्विजोऽजो जगाद यं १३
इज्याध्ययनदानानि विहितानि द्विजन्मनां
जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः १४

स द्विजः इत्यर्थः संतानविशेषप्रभवत्वतन्मूलकसंस्कारादिमत्त्वानुमितादृष्टसंबंधविशेषवान् द्विज इति यावत् संस्काराश्च ब्राह्मणादेस्तथा
प्रसूतस्यैव कर्तव्याः येन प्रजापतिना अष्टवर्षं ब्राह्मणमुपनयीत इत्यादि श्रुतिस्मृतिमुखेन गदिताः तथा च यत्र संतानविशेषप्रभवसंस्कारमजो जगाद
स संतानप्रभवसंस्कारानुमितादृष्टविशेषसंबंधवान् द्विज इति फलितार्थः १३ त्रैवर्णिकानामावश्यकधर्मानाह इज्येति जन्मना कुलेन कर्मणा
चावदातानां शुद्धानां द्विजानां त्रैवर्णिकानां इज्यादीनि स्वाश्रमचोदितानि ब्रह्मचर्याद्याश्रमेषु विहिताः क्रियाः चोदितानि विहितानि नो स्वाश्रमकर
णे प्रत्यवाय इति भावः तुर्याश्रमिणामनग्नित्वेन इज्याद्यभावात् तदभिप्रायेण स्वाश्रमचोदिताः क्रिया इत्युक्ताः साग्नित्वे इज्यादी
नि त्रीणि स्वाश्रमचोदिताः क्रियाश्च विशेषतः सन्निहितानि अनग्नित्वे स्वाश्रमचोदिताः क्रिया विहिता इत्यर्थः अनाश्रमिणां विधुरादीनां तु
पूर्वोक्तत्रिंशल्लक्षणवान् धर्म इति भावः १४ एवं त्रैवर्णिकानामावश्यकधर्मानभिधाय तत्र विप्रस्याजीविकाधर्मानाह श्रीरामः

राम
६०

58

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सत्यमिति सत्यं भूतहितत्वं दया स्वार्थनिरपेक्षपरदुःखासहिष्णुत्वं तपः अनशनादिरूपं शौचं स्नानादिजं शुचित्वं तितिक्षा शीतोष्णादि
द्वंद्वसहिष्णुता ईक्षा हेयोपादेयविवेकः शमो अंतरिंद्रियजयः दमो बाह्येंद्रियजयः अहिंसा करणत्रयेणापि परपीडानिवृत्तिः ब्रह्मचर्यमनुचितकाले स्त्रीसंगमराहित्यं त्यागो लोभराहित्यं स्वाध्याये यथोचितमंत्रजपः आर्जवं मनोवाक्कायानामेकरूपं ८ संतो
षो दैवात्सिद्धेनालंबुद्धिः समदृशां महतां सेवा ग्राम्येहाभ्यः प्रवृत्तिकर्मभ्यः उपरमो निवृत्तिः नृणां विपर्ययेहेक्षा निष्फलचेष्टा
निरूपणं मौनं मितभाषणं आत्मविमर्शनं देहविलक्षणात्मयाथात्म्यपरिशीलनं ९ भूतेभ्यो यथायोग्यमन्नाद्यमन्नभक्ष्य
तदादेः संविभागः विभज्य प्रदानं तेषु भूतेष्वात्मदेवताबुद्धिरिष्टदेवताबुद्धिः हे पांडव नृषु मनुष्येषु सुतरामात्मदेवताबुद्धिरि

सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः । अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवं ८
संतोषः समदृक्सेवा ग्राम्येहोपरमः शनैः । नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनं ९ अ
न्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः । तेष्वात्मदेवताबुद्धिः सुतरां नृषु पांडव १० ।
श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः । सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणं ११ ।
नृणामयं परो धर्मः सर्वेषां समुदाहृतः । त्रिंशल्लक्षणवान्राजन्सर्वात्मा येन तुष्यति १२ ।

त्यर्थः १० महतां गतेः भक्तानां शरण्यस्य भगवतः श्रवणं वक्तरि सति कीर्तनं गुणप्रतिपादकनामादिकीर्तनं स्मरणं स्वरूप
रूपगुणविभूतिस्मरणं सेवा पादपीडनादिरूपा इज्या ऽर्घ्यपाद्यादिनिवेदनरूपा अवनतिर्नमस्कृतिः प्रह्वीभावो वा सख्यं सर्वात्मनानु
कूल्यं आत्मसमर्पणं स्वात्मनस्तदनुबंधिनश्च तदायत्ततादिमत्वानुसंधानं चेत्ययं त्रिंशल्लक्षणवान्सर्वेषां नृणां साधारणः पर
उत्कृष्टो धर्मः उदाहृतः प्रदर्शितः येन धर्मेण सर्वांतरात्मा भगवान् तुष्यति प्रसन्नो भवति सोयं त्रिंशल्लक्षणवानित्यर्थः ११
१२ सर्वनृणां साधारणधर्ममभिधायाथ नरविशेषाणां ब्राह्मणादीनां त्रयाणामावश्यकान् धर्मान्विवक्षुस्तावत्त्रैवर्णिकसाधा
रणोपनद्विजत्वलक्षणमाह श्रीहनुमंता विजयतेतराम् श्रीगणेशायनमः श्रीमतेरामानुजायनमः श्रीरामश्री

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ ७

स्वेच्च तुर्णांवर्णानामावश्यकात्जीविकारूपांश्च धर्मानभिधायाद्येतयाभेवात्तरसंतराणिविवक्षुस्तावद्ब्राह्मणस्यमुख्यानुकल्पभेदेनद्दसंतरा।
णयाह वार्त्तेति विचित्रावार्त्ताकृष्यादिरूपाशालीनधान्यैर्विनेवयाननयाचितभिस्यर्थः शालीनकौपीने धृष्टाकार्ययोरितिनिपातितः।
शालीनःशरद्इदंछितीयंयायावरःप्रवासितस्यकर्मयायावर्यंप्रवासादिनायाच्ञापूर्वकमर्जनंस्तृतीयं शिलोञ्छनंउञ्छःकणशआदानंक।
णिकाद्यर्जनंशिलंतदुभयमेकीकृत्यचतुर्थीयंविप्रस्यवृत्तिरित्युक्तं आसांचलक्षणोपंतीनांपर्वपूर्वापेक्षयोत्तरोत्तरा श्रेयसीश्रेयसी
उत्तमेतियावत् यद्यपिपर्वविप्रस्याध्ययनादीनिषडन्यस्याप्रतिग्रहइतिविप्रस्यप्रतिग्रहोक्तेःकथंसत्वानमर्यायानेयायावर्यंवृत्तिनकथनीयं
तथापिसत्त्वप्रतिग्रहोयाच्ञापूर्वकस्तदपूर्वकश्चेतिद्विविधइतिवक्तुंशालीनयायावर्यवेत्युक्तं १७ सर्वविप्रस्ययजनाद्यलाभेवार्त्तादिरूपा
वृत्तिस्तत्रापुनरोत्तरोत्तम सर्वोत्तं अधोत्तरोत्तरवर्णस्य स्वस्वदृत्यलाभएवायदिपूर्वपूर्ववर्णस्यचोत्तरोत्तर परवृत्त्याश्रयणंवक्तुंतावद्ना

वार्त्ताविचित्राशालीनयायावर्यशिलोञ्छतं विप्रवृत्तिश्चतुर्धेयंश्रेयसीचोत्तरोत्तरा १७ जघन्योनोत्त
मांवृत्तिमनापदिभजेन्नरः ऋतेराजन्यमापत्सुसर्वेषामपिसर्वशः १८ ऋतामृताभ्यांजीवेत।
मृतेनप्रमृतेनवा सत्यानृताभ्यांजीवेननश्ववृत्त्याकथंचन १९ ऋतमुञ्छशिलंप्रोक्तमम्।
तंयदयाचितं मृतंतुनित्ययाच्ञास्यात्प्रमृतंकर्षणंस्मृतं २० श्रीमतेरामानुजायनमः श्रीश्री

पोद्दतदाश्रयणंनिषेधति जघन्यइति जघन्यवर्णोनरोनापदिस्वस्वस्यलाभरूपायामापद्युत्तमांपूर्वपूर्ववर्णवृत्तिंनभजेत्आप
द्यापत्सुतुराजन्यंविनाराजन्यव्यतिरिक्तानांसर्वेषामपियथालाभंसर्वाअपिवृत्तयःआश्रयणीयाभवंति सर्वेषांसर्वशइत्येतावदु
क्तेराजन्यस्यप्रजापालनप्रयुक्तकरादानरूपस्वस्वस्यलाभरूपापदियाजनाध्ययनप्रतिग्रहादिरूपपूर्ववर्णवृत्त्याश्रयणंवार्त्ताशुश्रू
षयोरुत्तरवर्णवृत्त्योश्चाश्रयणंप्रसक्तं ऋतेराजन्यमितितन्निषिध्यते १८ अथविप्रराजन्ययोस्स्ववृत्त्यलाभरूपापद्युपादेयवृत्ति
निष्कृष्य दर्शयन्नुत्तरोत्तरवर्णसेवारूपांवृत्तिंप्रतिषेधयति ऋतामृताभ्यामिति ऋतादयन्यतमेनजीवितव्यंश्ववृत्त्यातुक
थंचनननजीवेत्तस्यैवापवृत्तिनाश्रयेदित्यर्थः १९ ऋतादिपदार्थानाहसार्धेन ऋतमिति स्पष्टोर्थः २० नकर्षंच
नेतिव्याख्येयं श्रीमतेरामानुजायनमः श्रीरामोविजयतेतराम् श्रीहनुमतोविजयतेतराम् श्रीयेनमः श्रीराम

टी ५

राम ७

59

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विप्रस्याध्यापनादीनीति अध्ययनयाजनप्रतिग्रहौ विवक्षितौ याजनाध्यापनप्रतिग्रहजीविकाः धर्मोः ब्राह्मणस्य तदानामित्याव्यापकाधर्मान्नित्यर्थः सर्वं
भूपतिप्रसपत्धर्मोः तथाचोक्तं मनुना षण्णांतुकर्मणामस्यत्रीणिकर्माणिजीविका याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति अन्यस्य क्षत्रियस्याप्रतिग्रह
तिमतिग्रहाविरिक्तयाजनमध्यापनं चानुजानाति वक्ष्यतिचानंतरमेव क्षत्रराजन्यमितिच्यतेतवाश्वपतिकैकयप्रभृतीनामुपदेष्टृत्वादि प्रजापालनेनधिकृतस्य १२
क्षत्रियस्य तत्वंतरमाह राज्ञ इति याचं हेतनित्यं प्रभुत्वादालिंग्यं सर्ववर्णानां पालितः ध्याध्यापयाधिकरणे क्षत्रियादेर्याजनाध्यापनयोर्प्यतिक्रमहेतिविद्वा २४
द्वर्णान्पुनःपुरुषार्थमतःकर्मविगुणंनास्तिकिंचनयाजनाध्यापनप्रतिग्रहा ब्राह्मणस्यैववृत्त्युपायाः इतिनियमः पुरुषार्थतपाः मर्यतनक्रत्वर्थतया तेनक्षत्रि
यवैश्ययोरालिंग्यंनतुक्षत्रियवैश्ययोर्ब्राह्मणपरित्याज्यनियमः क्रत्वर्थेनापिहिस्मृतः यत्तंयामथ्यामामध्युपक्रम्यब्राह्मणानामालिंग्यमितिस्वत्वकाराः क्रत्व
र्थेनस्मरंतीतिस्पष्टमेतत् तथाचभगवद्भाष्यमेणापि क्षत्रियोयाजकोयस्यचांडालस्यविशेषतः कथंसदस्योभोक्तारोहविस्तस्यसुरर्षयः इतिवृराद्देवताः
यपक्षक्रत्विक्मताःविदेवताद्विभागनिराकरणात्क्रतुवैगुण्यमेवदर्शितं राजयाजकराज्यस्यविनश्यतीयथार्हविरितिब्राह्मणालिंग्येहविर्विनाशः

विप्रस्याध्यापनादीनिक्षत्रस्याप्रतिग्रहः राज्ञोवृत्तिः प्रजागुप्तिरविप्राद्याकरादिभिः १५
वैश्यस्तुवार्तावृत्तिः स्यान्नित्यंब्रह्मकुलानुगः शूद्रस्यद्विजशुश्रूषावृत्तिश्चस्वामिनोभवेत् ॥ १६

८२
स्मृतः लिंगमपिचदर्शितनिब्राह्मणानामिदंहविरेवमादीनितस्माद्ब्राह्मणानामेवालिंग्यंसिद्धमितिराद्धांतिनः तस्मान्नराजन्यवैश्ययोर्याजनाध्या।
यनाधिकारः अश्वपतिकैकयप्रभृतीनांयदुक्तंतेषुपदेष्टृत्वमवगतंनतदध्यापनरूपंकिंतुसत्यादीनामिवब्रह्मस्वरूपतदुपासनाद्युपदेष्टृत्वरूपं अ।
ध्यापनंनाममंत्रोच्चारणानूच्चारणापशिष्यादिशेनभगवद्भ्यामेवदर्शितः सांगस्याक्षरःवर्णाधनपर्यंतापर्वकमुच्चारणं तस्मादप्रतिग्रहइत्यस्य।
४ राज्ञाद्विविध प्रमर्थः प्रजापालनाधिकृतस्यदूत पितृलब्धतिताविदपरस्यवृत्तिरनेनोच्यतेद्वितीयस्यतुक्तनाभ्यांदूरेनेनवक्ष्यतिप्रजागोप्तुः प्रजापालनानधिकृ
त स्यराज्ञोप्रजन्यस्यविप्राद्विजेतराकरादिभिर्वृत्तिः स्वामिप्राप्तस्वभागःकरःतदादिभिरादिशब्देनदंडशुल्कादिकंविवक्षितं वाराध्देनप्रजापालना
नधिकृतस्यतुदत्तंपरिमेवतिस्तत्त्वयति १५ अथवैश्यस्याह वैश्यस्त्विति नित्यंब्रह्मकुलमनुगच्छन्नुवर्ततेइतितादृशः सन्वार्ताकृषिवा।
१३ णिज्यादिलक्षणान्तृत्तिर्यस्यसभवेत् अथशूद्रस्याव्यापकधर्मवृत्तिरूपंचाह शूद्रस्येति तत्रद्विजशुश्रूषाशूद्रस्याव्यापकोधर्मःस्वा
मिनोवृत्तिश्चभवेत्स्वामिदत्तेनान्नादिनाजीवनंभवेदित्यर्थः १६ श्रीरामश्रीराम श्रीरामश्रीराम श्रीरामश्रीराम श्रीरामश्रीश्री

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ ७६
उच्चावचैर्नानाविधैःपसुरपसितैःकामैःप्रश्रयेणविनयेनउपशांतासंतैःप्रियैःप्रवाक्यैःप्रेमणाचकालेकालेउचितकालेसुसंतुष्टामयालाभेनसंतुष्टा
तावन्मात्रेणयोगेष्यैलोलुपादक्षाअनलसाधर्मज्ञाभर्तुःप्रियभूषणेस्वपरंधर्मंजानती प्रियासत्यान्ववागस्याःसा वाक्यैःसत्यैरितिपतिविषयेसत्या
क्समुक्तंप्रियसत्यवागित्यनेनतदितरविषयेप्रीतस्तेनयोनरतं २८ सर्वत्राप्यप्रमत्ताऽवहिताशुचिःपरिशुद्धाक्लिग्धाऽपतितंमहापातकरहि
३४ तंपतिंभजेत्तुशब्देनपतितंनभजेदितिलक्ष्यते यथाहयाज्ञवल्क्यः आशुद्धेःसंप्रतीक्ष्योहिमहापातकदूषितइति २९ एवंविधस्यभर्तृभजन
स्यफलमाहयेति याःलक्ष्मीर्हरिमिवयास्त्रीहरिभावेनतस्यरासपतिरेवपरोदैवतंयस्याःसापतिंभजेत्साहर्यालनाहरिरूपेणहरिणासहश्रीरिव
सहवहरेर्लोकेमोदतेमानैःपत्यासहमुक्ताभवेदित्यर्थः ३० अथसंकरजातीनांवृत्तिमाह वृत्तिरिति संकरजातयः प्रतिलोमजाः अनुलोमजा
श्चेतिद्विविधाः तत्रोत्तरवर्णात्पूर्ववर्णायांस्त्रियांजाताःप्रतिलोमजाः पूर्ववर्णादुत्तरावर्णायांजातास्त्वनुलोमजाः तेषांतत्तत्कुलकृताकुलपरं

कामैरुच्चावचैःसाध्वीप्रश्रयेणदमेनच वाक्यैःसत्यैःप्रियैःप्रेमणाकालेभजेत्पतिं २८ संतुष्टालोलुपादक्षाधर्मज्ञाप्रिय।
सत्यवाक् अप्रमत्ताशुचिःस्निग्धापतिंत्वपतितंभजेत् २९ यापतिंहरिभावेनभजेच्छ्रीरिवतत्परा हर्यात्मनाहरेर्लोकेपत्याश्री
रेवमोदते ३० वृत्तिःसंकरजातीनांतत्तत्कुलकृताभवेत् अचौराणामपापानामंत्यजानामवसायिनां ३१ प्रायःस्वभावविहितोनृणांधर्मो
युगेयुगे वेददृग्भिःस्मृतोराजन्प्रेत्यचेहचशर्मकृत् ३२ श्रीरामानुजायनमः श्रीमद्रामानुजोविजयतेतराम् श्रीरामश्री

पराप्राप्तेवर्णवृत्तिर्भवेदिति कुलक्रमागतमपिचौर्यहिंसादिकंनिषेधन्तान्विशिनष्टि अचौराणामपापानांचेति तत्रप्रदर्शना
र्थंकांश्चित्प्रतिलोमजविशेषानाह अंत्यजानांचावसायिनांच संकरजातीनांमित्यन्वयः तत्ररजकश्चर्मकारश्चनटोवर
टएवच कैवर्तमेदभिल्लाश्चसप्तैतेअंत्यजातयः अंतेवसायिनस्तुचंडालपुल्कसमातंगादयःतेषांपरंपराप्राप्ते ववस्त्रनिर्णेज
नादिर्वृत्तिरित्यर्थः ३१ श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितादितिभगवदुक्तमर्थमाह प्रायइतिद्वाभ्यां हेराजन्नृणांब्रह्म डा३
क्षत्रादिरूपेणावस्थितानांसर्वेषामपिप्रायशःस्वभावविहितःसात्विकादिस्वभावानुसारेणविहितः यद्वाभावःप्रकारःवर्णाश्रमादिरूपःस्ववर्णाश्र राम
मोदितेनविहितइत्यर्थः इज्याध्ययनादिरूपःसएवधर्मःइहलोकेप्रत्यच्चपरलोकेशर्मकृत्सुखकृत्वेददृग्भिर्मन्वादिभिःस्मृतःकथितः ३२। ७६
एवंवृत्तिरपिप्रा---- ज्यायसीतिवदन्नेवंवर्तमानस्यफलमाह श्रीगणेशायनमः श्रीरामानुजोविजयतेतराम् श्रीरामे

श्व३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वर्जयेदिति विप्रराजन्यवैश्यानां नीचसेवां स्यात्तत्र वर्णसेवां जुगुप्सितामिति तां परिवर्जयेत् जुगुप्सा तत्त्वेन नवरत्नेन राजयोः विशिनष्टि सर्ववेदमय इति प्राचुर्यमयट् यज्ञस्य याजकस्य सेवानिषिद्धेतिभावः २१ अथ वर्णानामभिव्यंजकान् धर्मानाह शमइति चतुर्भिः शमादिपराधीनामर्थाः लिंगा लक्षण धर्मा व्याख्यायामुक्ताः नगरत्वातिरस्त्रोधः अच्युतात्मत्वम् अच्युतप्रवणचित्तत्वं समादिकं ब्रह्मलक्षणं ब्राह्मणकुलाभिव्यंजकं स्यर्थः २२ शौर्यादि क्षत्रलक्षणं क्षत्रियकुलाभिव्यंजकं तत्र शौर्यं संग्रहेहव्ययुद्धे वा सामर्थ्यं वीर्यं परैरनभिभाव्यत्वं धृतिर्धैर्यमापद्गुः खिलत्वेतेजः पराभिभवसामर्थ्यं त्यागः लोभरहितं दानशीलता आत्मजयो देहजयः देहधर्मैरनभिभाव्यत्वं क्षमा सहिष्णुता ब्रह्मण्यता ब्राह्मणकुलानुवृत्तिः प्रसादोऽनुग्रहः रक्षा प्रजापालनं २३ सर्वदेवादि भक्त्यादिकं वैश्यलक्षणं तत्र देवगुर्वाद्यनुगा भक्तिः देवाच्युतगुरु अच्युतार्थीनां स्मृतेन वा भक्तिः त्रिवर्गणि धर्मादि पुरुषार्थत्रयेण परितोषणे परितुष्टिः आस्तिपरलोकं इत्यास्तिकस्तस्य भाव आस्तिक्यं नित्यमुद्यमः अर्थार्जने प्रयत्नः तत्र नैपुण्यं

वर्जयेत्तासद्विप्रराजन्यवैश्यजुगुप्सिता सर्ववेदमयो विप्रः सर्ववेदमयो नृपः २१ शमो दमस्तपः शौचं संतोषः क्षान्तिरार्जवं ज्ञानं दयाच्यु।

ता२ तात्मत्वं सत्यं च ब्रह्मलक्षणं २२ शौर्यं वीर्यं धृतिस्तेजस्त्यागश्चात्मजयः क्षमा ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणं २३ देवगुर्वच्युते भक्तिस्त्रि

वर्गपरितोषणं आस्तिक्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणं २४ शूद्रस्य सन्नतिः शौचं सेवा स्वामिन्यमायया अमंत्रयज्ञो ह्यस्तेयं सत्यं गोविप्र

रक्षणं २५ स्त्रीणां च पतिदेवानां तच्छुश्रूषानुकूलता तद्बन्धुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणं २६ संमार्जनोपलेपाभ्यां सेकमंडलवर्तनैः

स्वयं च मंडिता नित्यं परिमृष्टपरिच्छदाः २७

२४ शूद्रस्य सन्नत्यादिकं लक्षणमित्यन्वयः संनतिः पूर्ववर्णविषये नम्रत्वं शौचं स्नानादिजं स्वा ता१

मिन्यमायया निष्कपटभावेन सेवा अमंत्रयज्ञः नमस्कारेणैव यज्ञानुष्ठानं तथा च याज्ञवल्क्यः नमस्कारेण मंत्रेण पंचयज्ञान्समापयेदिति स्ते

यमचौर्यं सत्यममृतावदनं गवां विप्राणां च रक्षणं २५ अथ स्त्रीणां धर्मानाह स्त्रीणामिति पतिरेव देवो देवतं यासां तासां स्त्रीणां तस्य

पत्युः शुश्रूषा परिचर्या तदनुकूलता च तस्य पत्युर्बंधुषु पितृभ्रात्रादिष्वनुवृत्तिः तस्य तु पत्युर्व्रतं तदर्थो यो नियमस्तस्य धारणमित्येतच्चतुष्ट

यं पतिव्रतानां स्त्रीणां लक्षणं धर्म इत्यर्थः २६ किंच संमार्जनोपलेपाभ्यां गृहस्येति शेषः गृहसंमार्जनादिभिः पतिं भजेदित्युत्तरेणा

न्वयः सेकः जलसेकः मंडनं पिष्टैरलंकारः वर्तनं नित्यं स्वगृहस्य वा वस्थानं हस्तैः स्वयं कथंभूता मंडितालंकृता परिमृष्ट

विशोधिताः परिच्छदाः पात्र वस्त्र भूषणादयो यया तादृशी २७ श्रीसरस्वत्यै नमः श्रीहनुमते नमः श्रीरामाय नमः श्री

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ टी॰
भा॰
बी॰
६१

आहूतश्चैव सुयंत्रितः समाहितो गुरोः कृतांजलिः सन्नधीयीत नियमश्च अध्ययनोपक्रमसमाप्त्योर्गुरोश्चरणौ शिरसा नमेत् ३ यथाविहितं मेखलादीनि विभृ।
याकृष्टाधारणं तु केशप्रसाधनाभावमात्रं दर्भपवित्रं पाणौ यस्य ४ सायंप्रातरग्नौ समिदाधानं भैक्षं च कुर्यात् तद्भैक्षलब्धमन्नं गुरवे निवेदयेद्गुरोः सु।
रेतानिदध्यात् ततो यद्गुरुणाभ्यनुज्ञातं तदेव अन्नं भुंजीत नो चेत् कदाचिदुपवसेत् कदाचिदित्यनेन तन्मनःपरीक्षार्थं कदाचिद्गुरुर्नाज्ञापयेदिति
स्फुटं ५ मितं भुक्तं इति तथा सुशीलः सुस्वभावः सद्व्यवहारो वा दक्षो अनलसः श्रद्धानः गुरूपदिष्टार्थेषु विश्वासयुक्तो जितानींद्रियाणि येन सो
गुरुस्त्रीभिर्निर्जितो यस्त्रीवश्यस्तु युवा यावदर्थं यावत्प्रयोजनं तावदेव नाधिकं ताभिः सह संभाषेतेत्यर्थः ६ प्रमदागाथांस्त्रीविषयवार्तां वर्जये

२१

कृतांजलिरधीयीत गुरोराहूत एव सुयंत्रितः उपक्रमेवसाने च चरणौ शिरसा नमेत् ३ मेखलाजि
नवासांसि जटादंडकमंडलुः बिभृयादुपवीतं च दर्भपाणिर्यथोदितं ४ सायंप्रातरग्नि
भैक्षं गुरवे तन्निवेदयेत् भुंजीत यदनुज्ञातो नो चेदुपवसेत् क्वचित् ५ सुशीलो मितभुक्
दक्षः श्रद्धानो जितेंद्रियः यावदर्थं व्यवहरेत् स्त्रीभिः स्त्रीनिर्जितो युवा ६ वर्जयेत् प्रमदागाथाम
गृहस्थो ब्रह्मचर्यवान् इंद्रियाणि प्रमाथीनि हरंत्यपि यतेर्मनः ७ केशप्रसाधनाभ्यंगस्नपनाभ्यंजना।
दिकं गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा ८ ननु अग्निः प्रमदा नाम घृतकुंभसमः पुमान् सु
तामपि रहो जह्यादन्यदा यावदर्थकृत् ९ तप्यतः स्वयमगृहस्थो ब्रह्मचर्यवान् स्त्रीसंगादिरहितः ननु तज्ञा
याम् त्रिणकोदोषस्तत्राह इंद्रियाणि बलवंति संयतचित्तस्यापि मनः तद्गाथाश्रवणादिना स्ववशं कुर्वंति अतस्तां परिवर्जयेदित्यर्थः ७ गु
रुस्त्रीभिरन्याभिश्च युवतिभिः केशप्रसाधनादिकं न कारयेत् ८ कस्तत्कारणे दोषस्तत्राह नन्विति अग्निसमस्त्री प्रमदां यद्यग्नि सहच
रितं घृतकुंभं क्षरति तथा पुमानपि प्रमदासहचारी सन्भ्रष्टो भवेदित्यर्थः अतः पुत्रीमप्येकांते त्यजेत् अन्यथा केशप्रसाधनादिव्य।
तिरिक्तावसरे नैकांतावसरे यावदुक्तमर्थं प्रयोजनं तावन्मात्रं करोतीति तत्रादृशो भवेत् ९ एवं ब्रह्मचारिणो धर्मानभिधाय युक्तं सु
शीलो मितभुगित्यादि तद्यतिगृहस्थयोरपि ब्रह्मोपासनमिष्टयोरतिदेष्टुं ताव यावदरीरावसानेषु एवं धर्मा अनुष्ठेया इत्याह श्रीराम श्री

घृतकुंभसदृशः पुमान् ८

राम
६१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्तेति स्वभावकृतयावर्णाश्रमादिस्वभावकृतया वृत्त्या ऽध्यापनादिरूपयाजीविकया स्वकर्मणोऽध्यापनादिरूपेवर्तमानः स्वस्वकर्मानुतिष्ठन्स्व
भावजंसात्विकादिस्वभावजं प्रयुक्तं प्राकृतसत्वादिगुणवश्यताप्रयुक्तं बंधकं पुण्यपापात्मकंकर्महित्वा धर्मेणपाप मपनुदत्स्वविषयाम
संतीर्णत्यादिस्तुत्यर्थैस्त्रिभिः सहितः शनैर्निर्गुणतां सत्वादिगुणराहित्यं मुक्तिमियात् यावत् इयात्प्राप्नुयादिति शनैरित्यस्य भावमुपासन
निवृत्तिद्वाराप्राप्नुयादित्यर्थः ३३ ननु स्वभावकृतयावृत्त्या स्वकर्मणि वर्त्तमानस्य पुनः कामक्रोधादिवर्द्धकं बंधककर्मसंभवनयाक
थंनैर्गुण्यप्राप्तिरितिशंकांनिराकर्तुं हि तस्य तस्य ज्ञानवैराग्यवतः शास्त्राविरुद्धान्नपानादिसेवया रागवर्द्धकत्वाभावेनावद्दृष्टांतमाह उप्यमानमिति
यथामुहुर्मुहुरुप्यमानं क्षेत्रं निर्वीर्यतामसारतां प्राप्नुयात्पुनः सूत्यै सस्यप्रसवाय न कल्पते न समर्थं भवति तत्र उप्तं बीजं च नश्यति ३४ तथाका
मानामाशयमाश्रयं चित्तं पुनः कामानामतीवसेवया विरज्येत नाग्निवदिति यथाल्पविंदुभिरग्निरिव न वर्द्धत इत्यर्थः यथाप्रज्वलितोग्निर्घृतविंदु

वृत्त्यास्वभावकृतयावर्त्तमानः स्वकर्मकृत् हित्वास्वभावजंकर्मशनैर्निर्गुणतामियात् ३२ उप्यमानंमुहुःक्षेत्रंस्वयंनिर्वीर्यतामि
यात् नकल्पतेपुनःसूत्यै उप्तंबीजंविनश्यति ३४ एवंकामाशयंचित्तंकामानामतिसेवया विरज्येतयथाराजन्नग्निवत्का
मविंदुभिः ३५ यस्ययल्लक्षणंप्रोक्तंपुंसोवर्णाभिव्यंजकं यदन्यत्रापिदृश्येत तत्तेनैवविनिर्दिशेत् ३६ इतिश्रीमद्भागवतेसप्तम
स्कंधेएकादशोध्यायः ११ नारद उ० ब्रह्मचारीगुरुकुलेवसन्दांतोगुरोर्हितं आचरन्दासवन्नीचोगुरौसुदृढसौहृदः १ सायंप्रा
तरुपासीतगुर्वग्न्यर्कसुरोत्तमान् संध्येउभेचयतवाग्जपन्ब्रह्मसमाहितः २ भिर्नशाम्यतिकिंतुमहताप्रयत्नेनतथापितंकामंत्यजेत्

कंत्व २ नैशाम्यैतीवकामैरित्यर्थः ३५ शमादिभिरेवब्राह्मणादिव्यवहारोमुख्योनजातिमात्रादित्याह यस्मात्पुंसो यल्लक्षणंवर्णाभिव्यंजकंप्रोक्तंशमाद
यस्तपश्रुत्यादिनातद्यत्यद्यन्यत्रापिवर्णांतरेपिदृश्येत तर्हितद्वर्णांतरं तेनैवलक्षणनिमित्तेनैववर्णेननिर्दिशेन्नजातिनिमित्तेनेत्यर्थः ३६ इति
सप्तमेएकादशः ११ तदेवंचातुर्वर्ण्यधर्माननभिधायाधुनाश्रमधर्मान्विवक्षुस्तावद्ब्रह्मचर्याश्रमधर्मानाह ब्रह्मचारीति ब्रह्मचर्यं
द्विविधमुपकुर्वाणंनैष्ठिकंचेति तत्रगार्हस्थ्यादिवन्नैष्ठिकमप्युपकुर्वाणपूर्वकमेवेतिद्वयोरपितुल्यावेऽपकुर्वाणब्रह्मचर्यधर्मा उच्यंते योगुरुकुलेव
सन्नुपकुर्वन्ब्रह्मचारीत्यर्थः कथंभूतोदांतः उपशांतः दासवन्नीचः स्वैनैच्यमनुसंदधद्गुरोर्हितमाचरन्गुरौसुदृढसौहार्दं यस्यतादृशः १ किंच
प्रातश्चगुरुमग्निमर्कंसर्वसुरोत्तमंभगवंतंचोपासीत उभेसंध्येप्रातःसायंचयतवाग्मौनीसमाहितश्चित्तोब्रह्मगायत्रींजपन्गुर्वादीनुपासीतेत्यन्वयः २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

३८ नू३ मि२

स्कं॰ भा॰ टी॰ ७ ६७ उषित्वैवमिति द्वाभ्यां द्विजस्त्रैवर्णिकः स्वयमेवं गुरुकुले उषित्वा साङ्गोपनिषदं साङ्गाः शिक्षाद्याः त्रयीं यथाबलं पाठतोऽपि सितमधीत्यावबुध्य।
तदर्थं ज्ञात्वा अभिवृत्येति पाठे सुविचारितः वेदमधीत्याभिसमावृत्य कुटुंबेषु चोदैरिति श्रुतेरस्यायमर्थः अभिज्ञानात् इत्यत्र समावर्तनं कृत्वा १३
यदीश्वरः शक्तश्चेत्तदा गुरोः काममपेक्षितं वरं दत्त्वा गुरुणानुज्ञातः गृहं वनं वा प्रविशेत् गृहस्थाश्रमं संन्यासाश्रमं वा स्वीकुर्यादित्यर्थः वनशब्दः
श्रुतिनिर्देशोपलक्षकः कुटुंबेषु चोदैरिति श्रुतेः यथा वानप्रस्थाश्रमोपलक्षकः प्रव्रजेत् न तत्र तस्य रिप्सानुपपत्तेः सोऽगाद्
स्थानंतरभावि ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेत् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा इति जाबालश्रुतेः तत्र वा
वसेत् तत्र शब्देन ब्रह्मचर्याश्रमस्थं वा विवक्षितं ब्रह्मचर्यस्य नैष्ठिकतामेव वा प्राप्य विवक्षितं तथा नैष्ठिकतामेवाप्नुयादित्यर्थः १४ सर्वं चैवं प
रिगृहीतानां सर्वेषामाश्रमाणामनुगतधर्मं तत्फलं चाह द्वाभ्यां अग्नाविति तुर्याश्रमव्यतिरिक्ताभिप्रायकं तस्मान्निमित्तात् गुरावात्मनि स्वात्मनि

उषित्वैवं गुरुकुले द्विजोऽधीत्यावबुध्य च त्रयीं साङ्गोपनिषदं यावदर्थं यथाबलं १३ दत्त्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः गृ।
हं वनं वा प्रविशेत् प्रव्रजेत्तत्र वा वसेत् १४ अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजं भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत्
१५ एवंविधो ब्रह्मचारी वानप्रस्थो यतिर्गृही चरन्विदितविज्ञानः परं ब्रह्माधिगच्छति १६ वानप्रस्थस्य वक्ष्यामि निय
मान्मुनिसंमतान् यानास्थाय मुनिर्गच्छेदृषिलोकमिहाञ्जसा १७ न कृष्टपच्यमश्नीयादकृष्टं चाप्यकालतः अग्निपक्वमथा
ना१ मं वार्कपक्वमुताहरेत् १८

स्मिन्सर्वभूतेषु चांतः प्रविश्य धारकतया स्थितमिति शेषः अधोक्षजं भगवंतं पश्येत् पुनः स्वधामनि।
धामाधारैर्यथा तैर्भूतैः प्रविष्टं पश्येत् व्याप्य वस्तुगतदोषासंस्पर्शं पश्येत् अप्रविष्टवत् अप्रविष्टं तद्वत् व्याप्य स्थितत्वादिति भावः १५ एवंविध
ईशो ब्रह्मचारी यमतमस्त्वाश्रमधर्माननुतिष्ठन् विदितं ज्ञानं विज्ञानं चात्मपरमात्मयाथात्म्यं येन तादृशः परं ब्रह्माधिगच्छति प्राप्नोति
तै३ १६ तावद्वानप्रस्थधर्मान्वक्तुं प्रतिजानीते वानप्रस्थस्येति मुनीनां संमतान्वानप्रस्थस्य नियमान् धर्मान्वक्ष्यामि नियमान्विशिनष्टि यानिय राम
मानिह लोकेऽनुतिष्ठन्मुनिरञ्जसा ऋषीणां लोकं महर्लोकं प्राप्य भगवल्लोकं गच्छेत् १७ नियमानाह नेति कृष्टपच्यं कृष्या उत्पादितं ६५
धान्यं शालिप्रभृतिकं नाश्नीयात् अकृष्टपच्यमपि फलमूलादिकमकालतः पाककालं विना अपक्वमेव परिपाकावस्थायाः पूर्वमि
62 त्यर्थः अग्निपक्वमामं च नानाविधं पक्वं सूर्यकिरणपक्वं फलादिकमेवाहरेदश्नीयात् १८ स्ववृत्तिधर्मोक्तः अथ वानप्रस्थनियमानाह श्रीः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र्थं॰

कल्पयतीति ईश्वरो भगवानात्मविदात्मनआभासंरूपं शरीरं कल्पयति प्रवर्त्तितं मे करोति तावद्द्वैतं देवत्वमनुष्यत्वब्राह्मणत्वाद्यभिमा
नरूपं भेदज्ञानमनुवर्तत इति शेषः ननु अनुवर्ततां ततः किं तत्राह अस्य पुंसस्ततोऽध्यासाद्विपर्यय उत्तरोत्तरदेहात्मभ्रमः पुरुषार्थविपर्यो
व्यान्यानन्त्यमिच्छता दैवे च तदभावे स्यादितरेभ्यो यथार्हतः २ द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा भोजयेत्सुस
मृद्धोऽपि श्राद्धे कुर्यान्न विस्तरं ३ देशकालोचितं श्रद्धा द्रव्यपात्रार्हणानि च सम्यग्भवन्ति नैतानि विस्तरात्स्वज
नार्पणात् ४ देशे काले च सम्प्राप्ते मुन्यन्नं हरिदैवतं श्रद्धया विधिवत्पात्रे न्यस्तं कामधुगक्षयं ५ श्रीरामश्रीः।

वा ब्राह्मणं भोजयेत्सुसमृद्धोऽपि धनाढ्योऽपि बहून् ब्राह्मणान् भोजयेत् न तु श्राद्धे विस्तरं कुर्यात् ३ श्राद्धे विस्तरे दोषमाह देशेति देशकालपात्राणि यथोक्ता
११२ न्येव श्रद्धाविश्वासः कर्तव्यविषयत्वं वा अर्हणं द्रव्यसाधनं तानि समीचीनान्यपि स्वजनार्पणादि विस्तरान्न सम्पद्यन्ते विगुणानि भवन्त्वित्यर्थः नतु
कृतो विस्तरः श्राद्धः पतन्निषिध्येत इति शङ्कां वारयितुं स्वजनोऽर्पणा देहि ज्ञानिभ्योऽपि तस्य च तत्सुधाः कथं वा स्यादिति साधयेत् श्राद्धे हि स्वीयादित्यर्थः। ११३
४ श्राद्धे विस्तरमपि ब्राह्मणं भोजयेदित्याह देशेपर्वणि केवलाः परपक्षादिरूपे मतादिरूपे च काले कर्तव्यत्वेन प्राप्ते श्राद्धे पात्रे सत्पात्रे
विधिवच्छ्रद्धया न्यस्तं मुन्यन्नं मारण्यनीवारादिजं मुन्यन्नं हरिदैवतं भीनवेदितं तदुद्देशेन च दत्तं कामधुक्कामदम् अक्षयफलदं मुक्तिसाध
नं चेत्यर्थः ५ सर्वाश्रमसाधारणान्कांश्चिद्धर्मानाह श्रीरामश्रीराम श्रीरामश्रीराम श्रीरामश्रीराम श्रीरामश्रीरामश्रीराम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स. भा. टी. वी ७४

यस्त्विति पुंभिः सेव्यमानोऽध्यक्षत्वतुर्थ आश्रमः पृथक्क्लृप्तः आश्रमो वधकादिः स्वधर्मस्तु छन्दानां तरमेव धर्मस्य स्वत्वा धर्मेषि परधर्मानुष्ठेयस्य।
तु पौषादिस्यात् स्वभावेन ब्राह्मणादिस्वभावानुरोधेन विहितं इत्यादिरूपः स कस्य वा उपशांतये कल्पते ऽतान परधर्मस्योपयोग इत्यर्थः १४ स्वैः भ
गवदुपासनोपयुक्तावर्णाश्रमधर्माउक्ताः अथ प्रधानभूतभगवदुपासनात्मकाष्टांगयुक्तभक्तियोगानुसन्धानप्रकारं वक्तुं संस्तावतीद्रियैः काम
क्रोधलोभभयशोकमोहदंभतापत्रयनिद्रादीनां जयोपायानाह धर्मार्थमपीति नेहेत नचेष्टेत तत्र तावत्संतोषस्य लोभमूलत्वात्तदर्थं
त्वं तन्निमित्ताया धनलिप्साया त्याज्यत्वं च वक्तुं दैवादुपनतेनैव देहधारणं च कुर्यान्न तु तदर्थं धनं कामयेतेत्याह धर्मार्थमपीति यथा
लिङ्गः पुमान्स धर्मार्थमपि यात्रार्थं देहधारणार्थमपि वा धनं वित्तं नेहेत न कामयेत यात्रार्थमपि नेहेतेत्येतत्प्रपंचयति अनीहेति महाहे
रिवानीहमानस्य यात्रार्थं धनार्थमपि चेष्टामकुर्वतः दैवोपनतेन प्राणान् धारयमाणस्येत्यर्थः अनीहा कामना स्वरीतिदा जीवनावहा सैव

यस्त्वसद्ध्यासितः पुंभिराभासो ह्याश्रमात्पृथक् स्वभावविहितो धर्मः कस्य नेष्टः प्रशांतये १४ धर्मार्थमपि नेहेत यात्रार्थं वाधनो
धनं अनीहानीहमानस्य महाहेरिव वृत्तिदा १५ संतुष्टस्य निरीहस्य स्वात्मारामस्य यत्सुखं कुतस्तत्कामलोभेन धावतोऽर्थेहया
दिशः १६ सदा संतुष्टमनसः सर्वाः सुखमया दिशः शर्कराकंटकादिभ्यो यथोपानत्पदः शिवं १७ संतुष्टः केन वा राजन्न वर्तेतापि
वारिणा औपस्थ्यजैह्व्यकार्पण्याद्गृहपालायते जनः १८

मेतेन जीवेत् अकामयमानस्याकामेनैव नितरां सुखजननद्वाराद्भिदेति भावः १५
तेत्वाह संतुष्टस्येति निरीहस्य संतुष्टस्य दैवाल्लब्धेन संतुष्टस्य स्वात्मारामस्य स्वस्मिन्नात्मन्यात्मना परमपुरुषे स्वस्मिन् रममाणस्य स्वशरीर
कष्टलाभेनानुभवप्रस्यस्य यत्सुखं तत्कामलोभेन कामः शब्दादिविषयाभिलाषः लोभेन स्नेहेन निमित्तेनार्थेहया धनेच्छया कामलो
भनिमित्तकधनेच्छया सर्वा दिशः प्रतिधावतो भ्रम्यमाणस्य पुंसः कुतो हेतोर्भवति निरीहस्यापि सुखं तदीहयानस्तीत्यर्थः १६ स्वं दैवो
पनतपात्रमात्र संतोषस्य सुखं हेतुत्वमाह सदा दैवादुपनतेनैव संतुष्टस्य
योऽयं तस्य पुंसः सर्वा दिशः सुखमयाः यत्र क्वापि गतस्य तस्य सुखमेवेत्यर्थः यथा उपानहौ पादत्राणे पादयोर्यस्य तस्य शर्करा
दिभ्यः सुखं एवं तद्वत् १७ हे राजन् संतुष्टः केनापि पुमान्वारिणापि न वर्तेत संतुष्टस्तु वारिणापि यावज्जीवं धारयतीत्यर्थः असंतु
ष्टस्तु जनः औपस्थ्यजैह्व्यकार्पण्यादुपस्थजिह्वासुखार्थं तन्निमित्ताद्गृहपालायते गृहपालः श्वा तद्वदाचरति १८ अहो तु मतेन मस्को

रास ७४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तस्मात्स्वतैलिकात्तसु पूर्वकथोक्तरूपधर्मवित् मुमान् दैवादुपपन्नेन मुन्यन्नेनापि न तु मांसादिना अहरहः नित्यनैमित्तिकाश्च क्रियाः संतुष्टः कुर्यादित्यध्यत्र मुन्यन्नैः स्यात्परा प्रीतिस्तथा न पशुहिंसयेत्युक्तेन द्वयपक्षे र्वक्ष्यमाणमित्यनेन च मांसमश्राद्धश्रीयोमीयादिकर्मणि हिंसागर्भत्वेन पापमिश्रत्वं प्रतीयते तत्राश्वरूपभीतेन त्वत्राद्दारीतशारीरकाधिकरणन्यायविरुद्धं तत्र ह्यग्नीषोमीयादिकर्मणां पशुहिंसादिरूपपापमिश्रत्वेनाशुद्धियुक्तत्वं परिशोध्यैतदुक्तं कुतः शास्त्राद्दग्नीषोमीयादेः संज्ञपनस्य स्वर्गलोकप्राप्तिहेतुत्वादहिंसात्वाभावशास्त्रस्यशोधितसंज्ञपनानिमित्तां स्वर्गलोकप्राप्तिं वरं ते शराममन्नीति हिरण्यशरीर ऊर्ध्वं स्वर्गलोकमेतीत्यादि कर्मातिशयिताभ्युदयसाधनभूतो पापात्सद्यो दुःखदेपि न हिंसाप्रसक्तत्वक्षणमेव तथा च मंत्रवर्णः नवा उ वैतन्म्रियसे न रिष्यसि देवानी देवपथिभिः यत्र यंति सुकृतो नानपि दुष्कृतस्तत्र त्वा देवः सविता दधात्विति चिकित्सकं चतात्कालिकाल्पदुःखकारिणमपि रक्षकमेव वदंति प्रशंसति च तद्वत् इति हिंसाप्रभावः सिद्धांतितः तथाप्यत्र हिंसागर्भत्वमात्रेण स्वादिहिंसापापश्रवेम्रतसुहृत्संज्ञानिनामननुरूपत्वं तात्पर्यं न तु याज्ञीयहिंसायाः पापत्वं पततश्चैकवल्लभतानिविभतीत्येतावदेवोक्तं न तु हिंसापापपापत्वम् पो॥५

तस्माद्दैवोपपन्नेन मुन्यन्नेनापि धर्मवित् संतुष्टोऽहरहः कुर्यान्नित्यनैमित्तिकाः क्रियाः ११
विधर्मः परधर्मश्च आभास उपमा छलः अधर्मशाखाः पंचेमा धर्मज्ञोऽधर्मवत्त्यजेत् १२
धर्मबाधो विधर्मः स्यात्परधर्मोऽन्यचोदितः उपधर्मस्तु पाखंडो दंभो वा शब्दभिच्छलः ॥ १३

पीत्यस्य न शारीरकन्यायविरोधः ११ तेष्वप्यसंगिकात्साधारणान्स्ववर्णाश्रमधर्मानभिधायाथ तेषां धर्माभासेष्वविवेकात्तत्रापि नापतन्निति संग्रहेण दर्शयन् तेषां त्याज्यत्वमाह विधर्म इति विधर्मादयः पंचैते धर्माभासाः अधर्मस्य वृक्षरूपस्य शाखाभूताः ततस्तान् धर्मयाथात्म्यवित् अधर्मवत्त्यजेत् १२ विधर्मादीन् व्याचष्टे धर्मबाध इति धर्मं बुध्या यस्मिन् क्रियमाणे स्वधर्मबाधः स्यात्स विधर्मः अन्यस्य क्षत्रियादेश्चोदितो विहितो धर्मः स तु ब्राह्मणादेः परधर्मः उपधर्मः पाखंडः वेदविरुद्धागमोक्तः दंभो वा परवंचनार्थो वा उपधर्मः छलं व्याचष्टे शब्दभिच्छल इति शब्दस्य श्रुत्यापि कस्यचिदन्यथा व्याख्यानं यस्मिन् यथा अद्वाशाखरान्भोजयेदिस्युक्ते अद्वाशसंख्याकेभ्यो चरकेभ्योदद्यादि शब्दभिदिति पाठे धर्मशब्दमात्रं बिभर्तीति तथा गोदयादिस्युक्तेऽसरिस्य त्यागोदानं इति १३ आभासं व्याचष्टे श्रीहनुमतो विजयते तराम् श्रीराम श्रीरामश्री

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ ७५

यस्येति साक्षाद्भगवत्याचार्ये मर्त्य इति असद्बुद्धिः सा भगवद्बुद्धिलक्षणे ज्ञानदीपप्रदे गुरौ तस्य तत्त्वं व्यर्थमेव इत्याह यस्य पुंसो मर्त्यबुद्धिः सोऽपि मदरा। एवं कुर्वन्मर्त्यदृष्टिस्तस्य श्रुतमध्ययनं सर्वं कामादिजयं च कुञ्जरशौचवत् यथा कुञ्जरस्य स्नानं पुनर्धूलिप्रक्षेपेण नष्टमप्रकृतं तद्वदित्यर्थः २६
गुरोर्भगवत्त्वं श्रीकृष्णस्य दृष्टान्तेनाह एष इति श्रीकृष्णः साक्षादीश्वरः प्रधानपुरुषयोरीश्वरो योगेश्वरैरपि विमृग्यौ अङ्घ्री पादौ यस्य स भगवानेव नात्र संदेहः स त्वं तमपि यं श्रीकृष्णं नरं मन्यते नश्वररूपानभिज्ञो लोकस्तथा गुरुर्यथात्मानमभिज्ञस्तं नरं मन्यते तत्तथात्मानमपि तु साक्षाद्भगवन्तं मन्येतेत्यर्थः २७ एवं गुरुभक्तप्रभावे सर्वैवि फलमित्युक्तं अथ वर्णधर्माणामाश्रमधर्माणां चेन्द्रियजयार्थत्वं
अपर्द तदभावे तदुपयोगि इन्द्रियजयपर्यन्तानामपि तेषां भगवदुपासनात्मकयोगनिष्पादकत्वस्य सफलमन्यथा विफलं चाह षड्वर्गेति सर्वा नियमचोदना वर्णाश्रमानुगुणा तदुपकधर्मनियमविधयः चोदनाशब्देन चोदनालक्षणो धर्मो इत्यर्थः यदनियमस्यचोदना वर्णादिधर्माः षड्वर्गः मनःपर्यन्तषडिन्द्रिय

यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ। मर्त्यासद्धीः श्रुतं तस्य सर्वं कुञ्जरशौचवत् २६ एष वै भगवान्साक्षात्प्रधानपुरुषेश्वरः। योगेश्वरैर्विमृग्याङ्घ्रि-
र्लोको यं मन्यते नरं २७ षड्वर्गसंयमैकान्ताः सर्वा नियमचोदनाः। तदन्ता यदि नो योगानावहेयुः श्रमावहाः २८ यथा वार्तादयो ह्यर्था योगस्यार्थं न बिभ्रति। अ-
नर्थाय भवेयुः स्म पूर्तमिष्टं तथासतः २९ यश्चित्तविजये यत्तः स्यान्निःसङ्गोऽपरिग्रहः। एको विविक्तशरणो भिक्षुर्भैक्ष्यमिताशनः ३० देशे शुचौ समे
राजन्संस्थाप्यासनमात्मनः। स्थिरं सुखं समं तस्मिन्नासीतर्ज्वङ्ग ओमिति ३१ प्राणापानौ सन्निरुन्ध्यात्पूरकुम्भकरेचकैः। यावन्मनस्त्यजेत्कामान्स्वनासाग्रनिरीक्षणः

यवर्गः तस्य संयमो नियमः स एकान्ताः तेषां प्रयोजनानीत्यर्थः अन्यथा तेषां वैफल्यमेवेति भावः तदन्ताः षड्वर्गनियमपर्यन्ता अपि यदि योगान्योगावयवान् धारणाध्यानसमाधीन्नावहेयुर्न।
साधयेयुर्तर्हि केवलं श्रमावहा एवेत्यर्थः २८ एवमावे तदुपकधर्माणां इन्द्रियजयपर्यन्तानां योगावहत्वे सफलत्वमन्यथा केवलश्रमफलकत्वं चोक्त्वा यत्तत्तद्धर्माणामपि योग
प्रयोजनकत्वाभावे वैयर्थ्यं प्रस्तुतानर्थावहत्वं तैः सह तदुपकानामपि वैयर्थ्यं चाह यथेति वार्तादयो ह्यर्था वार्ता कृषिवाणिज्यादिजीवनस्य वार्तादयोऽर्था योगस्यार्थं न बिभ्रति योगानुष्ठाने
कप्रयोजनं जीवनं न विद्धति न पुष्णन्ति न कुर्वीत तदा अनर्थायैव भवन्ति तथा पूर्तमिष्टं असतः वर्ज्यमानस्य वार्तानिर्वाहानुयोगैकप्रयोजनजीवनमसाधयतः
पुरुषस्य पूर्तमिष्टं कर्म अनर्थाय भवेदिति कर्मवानर्थवत्पापमेव यावत् २९ अथेन्द्रियजयपर्यन्तस्ववर्णाश्रमधर्मकाम एव भगवदुक्तियोगमष्टाङ्गप्रकार
माह यश्च इत्यादिना यः पुमान् चित्तस्य विजये यत्तः प्रयत्नवान् स्यात् निःसङ्गः कलत्रपुत्रादिसङ्गरहितः अपरिग्रहः शरीरमात्रावशेषितः भिक्षुकश्च भैक्ष्यमिताशनः एकः
सहायविविक्तशरणः निर्जनदेशवासी इत्यर्थः ... भैक्ष्यमितं ... ३० शुचौ परिशुद्धे समे निम्नोन्नतवर्जिते देशे राजन् आसनं स्वासनं स्वस्य
निजकुशाजिनचेलोत्तरमित्युक्तविधमासनं स्थिरं सुखं समं तस्मिन्नासीत ऋज्वङ्गः ऋजुकायशिरोग्रीवः ओमिति प्रणवं जपन्निति शेषः ३१ पूरकुम्भकरेचकैः प्राणापानौ

राम ७५

मकैवलं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

किंवासंतुष्टस्यब्राह्मणस्यतेजआद्यः स्रवंतितेजोमहत्ववर्चसंविद्यायास्त्वजन्मंज्ञानंतपश्चनश्यन्तीत्यर्थः यथा तेषंछिद्रपत्रेणस्रवन्त्येवंद्रियाणिसत्या
ज्ञानेविवेकाख्यंज्ञानमवकीर्यतेचविक्षिप्यतेऽयगच्छतीत्यर्थः १९ किंचकामक्रोधाद्यस्सावधिकाः लोभस्त्वसंतोषात्मकोनिरवधिकइत्याह काम
स्येति जनः कामक्रोधलोभवान्क्षुत्तृड्भ्यांनिवृत्ताभ्यांइतिशेषः निमित्तभूताभ्यांकामस्यांतंयातिअन्नोदकादिनाक्षुत्पिपासादिनिवृत्तेसुतिअ
न्नादिव्यतिरिक्तकामांतराभावात्कामस्यांतंगच्छतीतिभावः तथाक्रोधस्याप्यंतंतस्यक्रोधस्ययत्फलंपरपीडादिरूपंतस्योदयान्निवृत्तेःहेतोर्यातिकिं
लोभस्यांतंतुभुवोद्वीपजित्वाभुक्त्वापिनैवयाति २० अतएवहेराजन्बहवः पंडिताः शास्त्रजन्यज्ञानवंतः बहुज्ञाः बहुविधलौकिकवैदिकन्यायाभिज्ञाः
अतएवसंशयान्छिंदंतीतितथा अतएवसभ्याः सभायाःपतयोप्येकेजनाः असंतोषाद्धेतोरधोनरकेपतंति २१ एवमसंतोषस्यानर्थावहत्वमु
क्त्वाथकामादीनांजयोपायानाह चतुर्भिः असंकल्पाद्भोगाईतावुद्धिवर्जनात्कामंशब्दादिविषयस्पृहांजयेत्क्रोधंतुकामविवर्जनात्त्यजेत्तथु

असंतुष्टस्यविप्रस्यतेजोविद्यातपोयशः स्रवंतीछिद्रपत्रेणज्ञानंचैवावकीर्यते १९ कामस्यांतंचक्षुत्तृड्भ्यांक्रोधस्यैतत्फलोदया
त् जनोयातिनलोभस्यजित्वाभुक्त्वादिशोभुवः २० पंडितावहवोराजन्बहुज्ञाःसंशयच्छिदः सदसस्पतयोप्येकेअसंतोषात्पतंत्यधः २१
असंकल्पाज्जयेत्कामंक्रोधंकामविवर्जनात् अर्थानर्थेक्षयालोभंभयंतत्त्वविमर्शनात् २२ आन्वीक्षिक्याशोकमोहौदंभंमहदुपासया योगांतरा
यान्मौनेनहिंसांकायाद्यनीहया २३ कृपयाभूतजंदुःखंदैवंजह्यात्समाधिना आत्मजंयोगवीर्येणनिद्रांसत्त्वनिषेवया २४ रजस्तमश्चसत्त्वेनसत्त्वंचोप
शमेनच एतत्सर्वंगुरौभक्त्यापुरुषोह्यंजसाजयेत् २५ ग: क्रोधः कामानुभवविरोधिविषयकोऽमर्षः लोभंत्वसंतोषात्मकमर्थानर्थेक्षयार्थेक्षे
अनर्थक्षयाऽनर्थहेतुत्वदर्शनेनजयेत् भयंतुतत्त्वावमर्शनात्त्वविरहितविचारणात्मपदतत्त्वत्रयानुसंधानात् २२ आन्वीक्षिक्याजातस्यविनाशोध्रुवइत्या
दिपर्यालोचनयाशोकमोहौजयेदित्यनुषंगः दंभंतुमहतामुपासनयाजयेत् योगांतरायान्योगस्यांतरायभूतान्लोकवार्तादींस्तु
मौनेनभूतहिंसांकायाद्यनीहयाकायदेहादिचेष्टानिरोधेनजयेत् २३ भूतजंदुःखंकृपयायेभ्योभूतेभ्यः स्वस्यदुःखंतेष्वेवकृपयापरिहरेत् दैवंदुःख
दंशोपसर्गादिनिमित्तंसमाधिनाचित्तैकाग्र्येणएवंमनःसमाधानेनात्मजंदेहजमाध्यात्मिकंदुःखंयोगवीर्येणयोगबलेनप्राणायामादिनानिद्रांसत्त्वनिषेवया
सात्त्विकाहारसेवनेन २४ रजस्तमश्चसत्त्वेनसात्त्विकाहाराद्युपजातसत्त्वगुणवृद्ध्या सत्त्वमंतःकरणंउपशमेनएतज्जयनमुखेन एतदुक्तं
कामादिरूपंसर्वंपुरुषोगुरौभक्त्यांजसासुखेनैवजयेत् २५ गुरुभक्तिप्रभावसर्वकामादिजयात्मकं वर्णयिष्यामि स्याद श्रीहनुमतेनमः श्रीरामश्री:

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ ७६

स्यात्परमात्मतत्त्वस्य तु ब्रह्मानन्दसुखरूपस्य तु यत्तेरिन्द्रियैर्लोकस्यैवासंभावितत्वमस्य स्वमायया मोहमावादित्याह आत्मानमिति परंब्रह्मेति पुरुषविलक्षणमात्मा।
नं यद्वा आत्मानं परं परमपुरुषं च किमानीयाद्वितद्ज्ञानेन निर्दूतवासनः कस्य कामाय इच्छन्संपदः किमिच्छन्देहं पुष्णाति देहपोषणेन स्वात्मनः परमपुरुषस्य नेष्टं
पद्यते स्वतस्सज्जनेसैवेत्यर्थः यद्वा इच्छन्शब्दादिविषयान्कामयमानः कस्य स्वपरयोरन्यतरस्य कामायेच्छार्थं देहं पुष्णाति किंनपुष्णात्येवेत्यर्थः कस्य कामायेत्यने
नेदं देहपोषणं स्वात्मनो नापि परमात्मनः स्वसुखाधायकं तयोः स्वतस्सवनिरतिशयसुखरूपत्वादिति सूच्यते निरतिशयानंदपरमात्मोपासनात्मकतत्सुखभव
दृष्टा निरीहितदेहपोषणजसुखार्थं यतते किंतु परमात्मप्राप्तये एव यतते इति सूचितं एवं मायाविमुक्तानि स्येनेन परमानंदरूपपरमात्मप्राप्तिसाधनानुष्ठानोपयुक्तशरी
रेंद्रियाद्यामग्रीं लब्ध्वापि न यतते स्वमायाविमूढा इति वाक्यं ४० नकेवलमन्यैव शरीरेंद्रियादेः परमात्मप्राप्तिसाधनानुष्ठानोपयुक्तसामग्रीत्वं अन्येनापितु
पनिषद्वाक्यान्यप्यात्मानं रथिनं विद्धि शरीरं रथमेव च बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च इंद्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् सोऽध्वनः पारमा
प्नोति तद्विष्णोः परमं पदमित्यादीनि संसाराध्वनः पारं वैष्णवपदं प्रेप्सुं तमात्मानं रथित्वेन तच्छरीरादीनि रथांगत्वेन रूपयितुं तान्यनुवदति आहुरिति र

ठि२

आत्मानं विद्धि जानीयात्स्वं ज्ञानधनाशयः किमिच्छन्कस्य वा हेतोर्देहं पुष्णाति लंपटः ४० आहुः शरीरं रथमिंद्रियाणि हयानभीषून्मनइंद्रियेशं
वर्त्मानि मात्रा धिषणां च सूतं सत्त्वं बृहद्बंधुरमीशसृष्टं ४१ अक्षं दशप्राणमधर्मधर्मौ चक्रेऽभिमानं रथिनं च जीवं धनुर्हि तस्य प्रणवं पठंति शरं तु जीवं प
रमेव लक्ष्यं ४२

यद्भगवानरूपयंस्ते तेषां परमात्मप्राप्तिसाधनानुष्ठानोपयुक्तसामग्रीत्वमभीष्टेद्वेष्टेच्छो जिगीषोश्च प्रसिद्धरथादीनां साधनत्वमित्याहुः।
विदंता इत्यर्थः शरीरं रथस्थानीयं इंद्रियाणि हयानश्वान् इंद्रियाणामश्वस्थानीयानां इशांकुशं मनः अभीषून् रश्मीन् इतियावत् मात्राः शब्दादीन् वर्त्मा।
निमार्गस्थानीयान् धिषणां बुद्धिं सूतं सारथिं सत्त्वं बृहद्बंधुरं देहादीनां बंधनं ईशसृष्टं इति यथायोग्यं विभक्ति विपरिणामेन शरीरा।
दीनां विशेषणं ईशेन परमात्मना सृष्टं ईशसृष्टं ४१ दशानां प्राणानां समाहारो दशप्राणं प्राणादिपंचकं नागकूर्मकृकलदेवदत्तधनंजयाख्य
पञ्चाणपंचकात्म [illegible] कमक्षमक्षस्थानीयं अधर्मधर्मौ पुण्यपापे च क्रे पुण्यपापात्मकयोः कर्मणो रथत्वरूपितशरीरप्रवृत्तिहेतुत्वात्तदाकत्वेन राम ७६
न चक्रत्वेन रूपणं अभिमानं देहाभिमानिनं जीवं रथिनमाहुः तस्य रथिनः प्रणवमोंकारं धनुः पठंत्याहुः शरं तु जीवं परं परमात्मानं तु लक्ष्यं
दंति प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते अप्रमत्तेन वेधव्यं शरवत्तन्मयो भवेदिति सन्यत्राप्युक्तं विप्रकृष्टयोः शरलक्ष्ययो।
रिव जीवपरयोः संबंधहेतुमनः तु प्रणवाधनत्वेनोक्तं ४२ रथित्वेन रूपितजीवस्य शरत्वेन रूप्यते तत्रैतत्त्व्यानाह अमीत्वमेतस्य:

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कामैः शब्दादिविषयध्यानैर्हतं विक्षिप्तं सन्मनो भ्रमद्यतो यतः यं यं विषयं निःसरति विषयीकरोति ततस्ततो विषया न्मनउपाहृत्य बुधस्तस्मात्प्रत्याहारविधिना हृद्युपरुन्ध्यात् ॥
अपि त्वनेन ध्यानाभ्यासेन चिंताप्रवर्तकं पित्तस्य नियमोपक्षिद्धः चित्तविजय इति । यमकः स्थिरं सुखमासीतेत्यनेनैव प्राणापानाविसद्विना प्राणायामः यावन्मनो
त्यादिना ततस्ततउपाहृत्येत्यनेन प्रत्याहार उक्तः निरुंध्याच्छनैर्बुध इत्यनेन ध्यानधारणे उक्ते ३३ अथ समाधिमाह एवमिति द्वाभ्यां एवमभ्यसतः सर्वदाऽभ्यसतः
तस्य यतेश्चित्तमल्पीयसैव कालेन निर्वाणं वाति शांतिं विनाशं याति यथा निंधनः ज्वालाधूमादिरहितो ह्यग्निरहितोंगाररूपेण वर्तते विशेषितो निस्तद्वदित्यर्थः ३४ न हि तु विक्षि
प्तं भवतीत्याह कामेति यच्चित्तं कामादिभिः शब्दादिविषयध्यानादिभिरनाविद्धमसंक्रांतं प्रशांता अपगता अखिला वृत्तयो व्यापारा लिकाः यस्य तादृशं चित्त
मत एव तस्मात् चित्तं ब्रह्मसुखस्पृष्टं ब्रह्मानंदसुखानुविद्धं सत् कर्हिचित् कदापि नैवोत्तिष्ठेत् न भ्रश्यत्युत्थितं भवति अपि त्वेवं समाधिपर्यंतं स्वानुभवं मनो निश्चलं भवतीति भावः
३५ एवमष्टांगयुक्तं भगवद्भक्तियोगं निरूप्य तत्फलत्वेन त्रिवर्गं कामयमानं यतिं निंदति यतिरिति त्रिवर्गस्य धर्मादेरावपनात् क्षेत्रभूतात् गृहात् पूर्वं प्रव्रज्य पुनर्यः पुमांस्तान् धर्मादी
न्सेवेत स वै भिक्षुर्निरपत्रपो निर्लज्जो वांताशी वांतान्भक्षयितुं तुल्यः यथा प्रवृत्तापि पुनर्भोगान् कामयते निंदितो यतिरिति ३६ नैवं स्वदेहं नेच्छेदित्याह यैः परिव्रा

यतो यतो निःसरति मनः कामाहतं भ्रमत् ततस्तत उपाहृत्य हृदि रुंध्याच्छनैर्बुधः ३३ एवमभ्यसतश्चित्तं कालेनाल्पीयसा यतेः अनिशं तस्य निर्वाणं यात्यनिंधनव
ह्निवत् ३४ कामादिभिरनाविद्धं प्रशांताखिलवृत्ति यत् चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ३५ यः प्रव्रज्य गृहात्पूर्वं त्रिवर्गावपनात्पुनः यदि सेवेत तान्भि
क्षुः स वै वांताश्यपत्रपः ३६ यैः स्वदेहः स्मृतोनात्मा मर्त्यो विट्कृमिभस्मसात् त एनमात्मसात्कृत्वा श्लाघयंति ह्यसत्तमाः ३७ गृहस्थस्य क्रियात्यागो व्रतत्यागो
वटोरपि तपस्विनो ग्रामसेवा भिक्षोरिंद्रियलोलता ३८ आश्रमापसदा ह्येते खल्वाश्रमविडंबनाः देवमायाविमूढांस्तानुपेक्षेतानुकंपया ३९

द्विःदर्वस्वदेहनाम।
स्मृतश्चात्मत्वेन निश्चितः किं त्वात्मनो व्यतिरिक्तो मर्त्यः मरणशीलः अंततः किंभूतावस्थामापद्यमानो विट्कृमिभस्मसादिति ते एव पुनस्तमेनं देहं स्ववालादिस्वं कृत्वा श्लाघयंति।
किंविसत्तमाः परिव्राज इत्यर्थः ३७ आश्रमस्य पतितं निंदासंगेन महाश्रमांतरस्यापि स्वधर्मादित्यागिनं निंदति गृहस्थस्येति क्रियात्यागः स्ववर्णाश्रमोचितक्रिया
त्यागः वटोर्ब्रह्मचारिणो व्रतत्यागः गुरुकुलवासादिव्रतत्यागः तपस्विनो वानप्रस्थस्य पुनर्ग्रामसेवा भिक्षोः संन्यासिन इंद्रियलोलता ३८ एते आश्रमापसदाः येषामाश्रमा
णां चतुर्णां क्रियात्यागादयस्त एते आश्रमस्येषु निकृष्टा इत्यर्थः एते ह्याश्रमस्यानुचितं वर्तयंत्यनुकुर्वंतीति ततश्च विडंबनमात्रमेवैषां न त्वाश्रमसिद्धिरित्यर्थः अ
तस्तान् देवमायया विमूढान् नित्यनिरतिशयानंदपरमात्मप्राप्तिसाधनभूततदुपासनतत्संगधर्मानुष्ठानोपयुक्तमनुष्यजन्मवर्णाश्रमादिस्वसामग्रीसत्त्वेपि स्व
धर्मादित्यागिनस्तान् देवमायाविमोहितानित्युक्तं अनुकंपया हेतुभूतया पतिताः किं विधेयमिति एवमनुकंपापूर्वकं चिंतयतान् उपेक्षेत तान् उपेक्षेत तन्नानुवर्तेतेत्यर्थः
३९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हि१ नि२ स्प३

स· भा· टी· ७०

प्रवृत्तमिति वेदविहितंकर्मप्रवृत्तंनिवृत्तमितिद्विविधंतत्रप्रवृत्तेनकर्मणाफलानुभावायलोकांतरंज्ञायतदनुभयावशिष्टेनततःपुनरिहावर्त्ततेनिवृत्तेनत्वमृतमश्नु
तेतत्फलरूपमनुत्तमांमुक्तिंप्राप्यततःपुनर्नावर्त्तते ४७ प्रवृत्तनिवृत्तभेदभिन्नस्यवैदिकस्यैवकर्मणस्तत्स्वरूपमिष्टसंज्ञकंतच्चवक्तुंतद्विशेषंतत्तदवांतरभेदा
न्दर्शयति हिंस्रमिति अग्निहोत्रनामधेयकंकर्मादिर्यस्यतदग्निहोत्रादि आदिशब्दस्यार्थान्दर्शयति दर्शश्चेति एतानि यःकर्मनामानिःपशुःपशुयागःसुतःसोम
यागः ४८ हुतंवैश्वदेवंप्रहुतंबलिहरणंतदेतत्सर्वंवैदिककर्मइष्टमित्याख्यं मेधतत्कर्महिंस्रंद्रव्यमयंहिंसाविषयद्रव्यप्रचुरंहिंस्रमितिपाठे

प्रवृत्तंचनिवृत्तंचद्विविधंकर्मवैदिकं
आवर्त्ततेप्रवृत्तेननिवृत्तेनाश्नुतेऽमृतं ४७ हिंस्रं
द्रव्यमयंकाम्यमग्निहोत्राद्यशांतिदं दर्शश्चपौर्णमासश्चचातुर्मा
स्यंपशुःसुतः ४८ एतदिष्टंप्रवृत्ताख्यंहुतंप्रहुतमेवच पूर्त्तंसुरालयारा
मकूपाजीव्यादिलक्षणं ४९ श्रीहनुमतेविजयतेतराम् श्रीरामः॥

पश्वादिहिंसागर्भपुरोडाशादिद्रव्यप्रचुरंचकाम्यंस्वर्गादिकामार्थमशांतिदंचवीक्तरागाद्यनिवृत्तिहेतुस्तदाप्रवृत्ताख्यमकाम
दंशांतिदंस्यात्तदानिवृत्ताख्यमित्यर्थः अथपूर्त्तसंज्ञकंकर्माह पूर्त्तमिति देवालयादिनिर्माणरूपं पूर्त्तं आजीव्यमाजीवि
का ४९ तत्रवृत्तिधर्मपरायणस्यैत्रैवर्णिकस्यतत्फलानुभवायलोकांतरारोहणमार्गफलानुभवावसानेततःपुनरव
रोहणमार्गमिचंसंचरतोमृतस्तस्यपरिव्यक्तात्वंचाह श्रीगुरुचरणकमलेभ्योनमः श्रीहनुमतेविजयतेतराम् श्रीरामश्री

राम ७०

13

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मे

मानोबु।
रागइति रागः शब्दादिविषयासक्तिः विद्वत्ताद्विरोधिविपर्ययः प्रीतिर्लोभः संतोषःमोहः कार्याकार्यविवेकः भयमानाभिदुःखदर्शनैस्त्रासःमदोगर्वः मानोबु।
मानः अपकारस्तिरस्कारः असूयागुणेषुसत्स्वपिदोषाविष्कारः मायावंचनंहिंसाभूतद्रोहः मत्सरःपरहत्वेद्रोहश्चिता ४३ रजःक्रोधःसत्वासर्वःप्रमोदनवधी
२ नता स्वमात्स्यःस्तब्धभूतयःशत्रवोजनयाखरितरजस्तमःप्रकृतयः कथितस्त्वप्रकृतयश्च रजस्तमसीप्रकृतीकारणेयासांतेसत्वप्रकृतिःकारणंयेषां
तेचेतिबहुव्रीहिः रजस्तमसोरन्यतरभिन्नसत्वप्रकृतयइत्यर्थः ४४ तेह्येवंशरीरेन्द्रियमनोविषयबुद्धिबलप्राणधर्माधर्मजीवात्मपरंयांगरण्यादिभेदेनपर
मात्मशानुपापसाधनानुष्ठानेप्रयुक्तत्वज्ञापनापरूपिताः प्रणवजीविशामुजीवपरयोःसंबंधज्ञानजनकत्वपरमात्मकेशावत्वप्राप्यत्वज्ञापनायध्रुवश
रत्वस्यभावनरूपिताः रूपत्वज्ञापनायरागादयः शत्रुत्वनरूपिताः अपयसैतेरपादयावशेतिर्दतिमस्वाधनःपारंवेभवपरमात्मेतीति साधनः
पारमात्मेतिततोहिंसाःपरमंपदमितिषुत्तेरपमभिप्रपन्नस्यादिकमपिउपेक्षितइत्याह यावदिति यावच्छरीरंसमीहि तत्साधनेदृसंस्ववशंचतावदेवगरिशनांमह
तांचरणाचिनयालब्धंनियातंज्ञानरूपंरक्षेद्धर्मादिआरणःअस्तानिरस्ताःशत्रवोरागादयोयेन अस्ततःस्वात्मिताकृतावतीयंसम्युताभगवानेववसंयस्य।

रजःप्रमादःक्षुन्निद्राशत्रवोह्येवमादयः रजस्तमःप्रकृतयःसत्वप्रकृ
रागोद्वेषश्चलोभश्चशोकमोहोभयंमदः मानोऽवमानोऽसूयाचमायाहिंसाचमत्सरः ४३ ... स्वाराज्यतुष्टउपशांतइदंविजह्यात् ४५
यःकश्चित् ४४ यावत्स्वकायरथमात्मवशोपकल्पंधत्तेगरिष्ठचरणार्चनयानिशातं ज्ञानासिमच्युतबलोदधदस्तशत्रुः स्वाराज्यतुष्टउपशांतइदंविजह्यात् ४५ तौदृष्टपशांतःशमा ६८
नोचेत्प्रमत्तमसदिंद्रियवाजिसूतानीतात्मथविषयदस्युषुनिक्षिपंति तेदस्यवःसहयसूतममुंतमोंऽधेसंसारकूपउरुमृत्युभयेक्षिपंति ४६

राकलुषितस्वितःस्वाराज्यतुष्टःस्वराज्यकर्मवरपःतस्यभावःस्वाराज्यंमुक्तेर्ष्वर्यतेनतुष्टःअवश्यमस्मुतःस्वाराज्यंप्राप्स्यतीतिसंतुष्टइदंस्वकायरथादिकंविजह्यात्
पत्नेतेतनुस्पृहारहिताभवेदित्यर्थः इदमितिसैरिकंफलंवाविवक्षितं ४५ यद्युक्तविधानस्यात्तदातस्यानर्थमाह नेति नोचेदुक्तविधानभवेत्तदाप्रमत्तमिमं
सा२ हिनमसंतावहिमुखाइंद्रियवाजिनइंद्रियाण्येववाजिनः सूतोबुद्धिश्चतिउत्पथं प्रस्थितमार्गेनीतावविषयरूपेषुदस्युषुक्षिपंतिति विषमास्वास्पूवःहयेःसूतेनव
सरूपत्तिमातंममुंप्रमत्तंरहितन्नवविधिकंमृत्युभयंयस्मिन्तस्मिन्नंधेतमस्यंधतामिस्रनैकदुःखसंसारकूपेक्षिपंति ४६ तदेवंवर्णाश्रमधर्मोऽभ्युसंभक्तिः
गंशरीरेन्द्रियादीनांतदनुष्ठानेपयुक्तत्वेतत्तुष्टिनवर्णाश्रमधर्मानुग्रहीतो नभक्तियोगनस्वाराज्यप्राप्तिसांसारिकफललिप्सयानुष्ठितानांतु।
धर्माणांसंसृतिरूपानर्थावहत्वंचाभिधायायंतेषामेवधर्माणामिष्टापूर्तभेदेनद्वैविध्यंसांसारिकफलसाधनत्वेनकृतानांप्रवृत्तिकर्माख्यत्वं
पुनरावृत्तिहेतुत्वंउपासनानुग्राहकतयाकृतानांतुनिवृत्तकर्माख्यत्वंतस्यापुनरावृत्तिहेतुत्वंचाह श्रीहनुमतेविजयतेतराम् श्रीराम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स. गी. टी. ७८

वाच्वंवर्णसमाम्नायेपंचाशदक्षरात्मिकौमनुसंदधीरन् वर्णसमाम्नायेमांकारंलर्गतंविद्युः तमोंकारंविंदुनादचतुर्थ्यमात्रायांविंदुनादंचप्राणेप्राणसहचारिणि।
मकारवाच्यजीवेवाच्वकत्वेनांतर्भावेयप्रुरमुंजीवंमहतिमहत्तत्त्वेनिपरब्रह्मणिसमर्पयेयुरित्यर्थः ५३ मनुक्तोऽनुसंधानप्रकारउक्तः अथएतस्यगतिहेतुभूतम
र्चिरादिमार्गंशंतोऽदर्शयति अग्निरिति अग्न्यादिशब्दास्तदभिमानिदेवतापराः अत्रनक्रमविवक्षाश्रोतक्रमविरोधान्नहिसर्वोग्निरनंतरादिवसादिभ्यःपूर्वम्
पतेकिंत्वेवंतद्यइत्थंविदुर्येचेमेऽरण्येश्रद्धांतपइत्युपासतेतेऽर्चिषमभिसंभवंत्यर्चिषोऽहरह्नआपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेतिमासांस्तान्मासेभ्यःसं
वत्सरंसंवत्सरादादित्यमादित्याच्चंद्रमसंचंद्रमसोविद्युतंतत्पुरुषोऽमानवःसएनान्ब्रह्मगमयत्येषदेवलोकःपंथाइति अत्रसंवत्सरादनंतरंवरुणंप्रजानी।
मालोकोपीतकीब्राह्मणे स एतंदेवयानंपंथानमापद्याग्निलोकमागच्छतिसवायुलोकंसवरुणलोकंसआदित्यलोकंसइंद्रलोकंसप्रजापतिलोकंइतिश्रवणात् ख
राद्यस्र्वमानवःप्रजापतिर्वा अयंचसकलक्रमस्याविरोधेननिर्णीतः क्रमश्चरत्यरुतिराहित्वः अग्निरहःसितपक्षश्रुत्गपनाइमरुदर्कौद्रत् अपिविद्युतवरुणे
प्राङ्‌: ८ न्द्रप्रजापतीनातिवाहिकानाहुरिति एवमेतेराकावानधीतशारवांतरेष्वामंतमेप्युत्तरमुत्तरायणं सर्वमुक्तिप्राप्यमार्गदिक्षितःतत्रप्राप्तस्यभगवतश्चतुर्व्यूहविशिष्टतामाह।

वाच्वंवर्णसमाम्नायेतमोंकारेस्वरेन्यसेत् ॐकारंविंदुनोदसंतंतुप्राणेमहत्यसौ ५२ अग्निःसूर्योदिवाप्राह्णःशुक्लोराकोत्तरंस्वराट् विश्वायतैजसःप्राज्ञस्तुर्यआत्मासमन्वयात्
५४ देवयानमिदंप्राहुर्भूत्वाभूत्वानुपूर्वशः आत्मयाज्युपशांतात्माह्यात्मस्थोननिवर्तते ५५ विश्वस्तिमपासर्वजसंहितायांसष्टिस्थितंतकारिणाशक्तयुक्तमऊर्जितोद्युप।
क्रमाकारशक्तिर्विश्वाख्योउकारस्थानुतैजसो मकारशक्तिःप्राज्ञाख्यातासांरूपंपुनःमरिवसादिना आत्मस्थवस्थानपादिकमुक्तास्तानिलोस्यात्मिकशक्तीसंप्रोर्थमानिं
तत्रनिरुद्धादिरूपास्ताः अंकुशौर्लीविचिंतयेत् अर्धमात्राधियादिव्याप्रकार्यार्थप्रकाशिका वासुदेवमयीशक्तिर्विचिंत्यामनुपरस्ततामिरुक्तं अतःसुषुप्तिस्थितजाग्रद
स्थानिर्वाहकोनिरुद्धोविश्वःस्थित्यधिष्ठातास्वप्ननिर्वाहकःप्रद्युम्नस्तैजसःसंहृतिशक्त्यधिष्ठातासुषुप्तिनिर्वाहकःसंकर्षणःप्राज्ञःएतेवाकारोकारमकारवाच्याः
सर्वकारणभूतःसर्वशक्तिमान्प्रदःप्रणवार्धमात्रवाच्योवासुदेवस्तुर्यश्चतुर्थमात्रासहितप्रणवस्यएवंमनुसंधेयतथासकलतदविंतस्यार्थःफलशायोथ्यतपाकाइ
दंदर्शनार्थमुक्तंपरव्यूहविभावादिसर्वेशांवस्थाविशिष्टोभगवानुक्तःप्राप्यइत्यर्थः समन्वयात्सर्वेषांव्यूहादीनांप्राप्यांतर्भावत्वादित्यर्थः ५४ इदंदेवयानंप्राहुर्विदांता।
इतिशेषः आत्मयाजीपरमात्मोपासकःअनुपूर्वशःक्रमेणार्चिरादीनाप्यउपशांतःनिःशेषनिवृत्तःआत्मप्रकृतिर्यस्यतादृशःपरमात्मनिस्थितःअधिपतयास्थितआत्मा।
विर्भूतापहतपाप्मत्वादिगुणाष्टकयुक्तेब्रह्मलोकेस्वरूपेस्थितःतत्कविधब्रह्मनिष्ठत्वेनालानमनुभवन्नित्यर्थः पुनस्तेतानिवर्ततेसर्वदेवयानपथगामिना
ननिवर्ततेजन्ममरणादिकंतद्धेतुभूतपुनरावृत्तिंनप्राप्नोतीत्यर्थः ५५ नैतस्तीपार्थजानन्योगीमुह्यतिकश्चन तस्मात्सर्वेषुकालेषुयोगयुक्तोभवार्जुनेतिभगवदुक्ता।

प्राप राम ७८

16

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

द्रव्यस्योदनासार्द्धद्वयेन निषेकादिश्मशानांतैर्गर्भाधानादिश्मशानांतैः संस्कारैः संस्कृतो द्विजस्त्रैवर्णिकः इष्टापूर्तदत्तकारी देहत्यागानंतरं द्रव्यसूक्ष्म
विपाकः द्रव्याणां पृथिव्यादिभूतानां सूक्ष्मा विपाकाः सूक्ष्मावस्था यस्य सूक्ष्मावस्थपृथिव्यादिभूतयुक्तः सन् तस्स्मात्परिष्वक्त इतियावत् इत्येवं पृथिवीपतेष्ट
मासपक्षाद्याः तदभिमानिदेवतापराः अपक्षयः अपरपक्षः अयनं दक्षिणं दक्षिणायनं सोमप्रभं च इति शब्दः प्रत्येकमन्वेति धूमइति रात्रिरिति तानेवैक
त्राप्यानुपूर्वेण भूत्वा भूत्वा प्राप्यावान्नेनेपरीभवति रत्नासपर्थः प्राप्य प्राप्य सर्वैः धूमादिक्रमेण चंद्रं प्राप्य तत्राप्मतमयशरीर युक्त इष्टादिकर्मफलमत्तु।
भूयतलः दर्शः दर्शस्य चंद्रकलाक्षयहेतुत्वादिनाद इदाद्धेन चंद्रं प्राप्य तस्मात् अम्मयशरीरनाशोत्सत्यलेविनष्टम्मतमयशरीरे इत्यर्थः चंद्रमसः स्थानात् क्रमेणा
पद्यादीन् प्राप्य प्राप्य इह लोके जायते एतच्च पितृयाणं पुनर्भवहेतुरित्यर्थः यद्वा चंद्रपर्यंतं पितृयाणं तत्र तावत् ततः पर्यंतं पुनर्भवयानं इत्यर्थः तत्र दक्षिणायनेषण्मासा
मंत्रपितृलोकाकाशाद्रष्टव्याः उक्तं पूर्वक्रमेणाकाशवायुधूमाभ्रमेघवर्षीणिदृष्टयानि तत्रारोहणं धूमरात्र्यपक्षाः दक्षिणायनषण्मासपितृलोकाकाश
१८ चंद्रक्रमेण वरोहणं तु चंद्रमसः स्थानादाकाशवायुधूमाभ्रमेघवर्षौषधीरेतस्पतनानंतरतः क्रमेणत्यर्थः यथा च श्रूयते छांदोग्ये अथय इमे ग्राम इष्टापूर्ते दत्त।

द्रव्यसूक्ष्मविपाकश्च धूमोरात्रिरपक्षयः अयनं दक्षिणं सोमो दर्श आम्रधिवौकधः ४९ अन्नैरेतः इति तेभ्यः पितृयाणं पुनर्भवः एकैकशो नानुपूर्वं भूत्वा भूत्वेह जायते ५१
निषेकादिश्मशानांतैः संस्कारैः संस्कृतो द्विजः ५२ इंद्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जुह्वति इंद्रियाणि मनस्यूर्मौ वाचि विवेकाग्निकं मनः ५२
मिष्टुपासते ते धूममभिसंभवंति धू
मार्त्रिरात्रेरपरपक्षमपरपक्षाद्यान्षड्दक्षिणेति मासांस्तान्नैते संवत्सरमभिप्राप्नुवंति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चंद्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्ष
यंति तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधि
दु२ वनस्पतयस्तिलमाषा जायंते ततो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिंचति तद्भूय एव भवति तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं वा क्ष ५४
त्रिययोनिं वा वैश्ययोनिं वाथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चंडालयोनिं वेति तत्रारोहण आयांपरमाय अभिमानी देवता सा
१२ कणमसे वै धूमादिभावो वरोहणे त्वाकाशवायुधूमाभ्रमेघवज्जीवानामतत्संसर्गरूपस्तत्सादृश्यापत्तिरेव तत्स्वाभाव्यापत्तिरुपपत्तेरिति शारीरकन्यायात् व्रीह्यादिभावोना
मजीवान्तराधिष्ठितव्रीह्यादिसंश्लेषमात्रं अन्याधिष्ठिते पूर्ववदभिलापादिति न्यायात् एवं वान्वयः द्रव्यसूक्ष्मविपाक इति द्रव्यसूक्ष्मविपाकादयः इत्येते सोमपर्यंताः
पितृयाणं दर्शाद्यो रेतःपर्यंताः पुनर्भवः गर्भाधानादिश्मशानांतैः संस्कृत इष्टादिकारी आनुपूर्व्यक्रमेण भूत्वा भूत्वा रात्र्यादीन्प्राप्य पुनरिह जायत इति ४९ ५१ ५२॥
अथ पुनर्भवं विधानं न कुर्वते ज्ञानिभिर्गीतानि दृष्टधर्माणि दर्शयता वह्नसमनुसंधायैवमाह द्वाभ्यां इंद्रियेष्विति ज्ञानदीपेषु चक्षुरादीन्द्रियेषु क्रियायज्ञान्कर्मेंद्रियव्यापारान् जुह्वति एवं
वेन निगमिषवइतिशषः चक्षुरादिज्ञानेंद्रियैः पाणिपादादिकर्मेंद्रियाणि निवर्तयेदित्यर्थः इंद्रियाणि चक्षुरादीनि ज्ञानेंद्रियाणि सकलानि स्वस्थानि वितमनसि जुहूति मनस्तानि नियच्छ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

॥२

स० भा० टी० ७८

तद्विस्थूलोऽहमितिप्रतीतिः कथमित्यपेक्षायांभ्रांतिरित्याह स्यादिति तत्रसंसर्गिनिमित्ताभ्रांतिर्मिथ्याप्रतिपत्त्यर्थः साक्षादुपनिमित्तत्वं प्रतिक्षिपति स्यादि
तिद्वयोरप्यर्थयोर्ज्ञानादिगुणविकल्पेसतिकस्यचिद्वस्तुनःकेनचित्साक्षात्वंभ्रमस्यभेदनिमित्तंस्यादितिहालनोवस्तुसमानजातिगुणाद्यभावात्साक्षात्वमनुपपन्नं
भंजनमितिसंसर्गभ्रमइत्यर्थः सिद्धमेवमालविषयकज्ञानाभावेपिजागृज्जामिमज्जानामोलिविभागप्रतिपत्तौ दृष्टांतमाह जाग्रत्स्वप्नेति कश्चित्तु विस्तात्। बु२
सज्जतमितिसंसर्गभ्रमइत्यर्थः सिद्धमेवमालविषयकज्ञानाभावेपि जागृत्स्वप्नज्ञानानां विभागप्रतिपत्तौ दृष्टांतमाह जाग्रत्स्वप्नेति
यामेवसुप्तंप्रबुद्धंवालानंपश्यतियदाप्रबुद्धस्ततस्तत्स्वप्नदृष्टप्रबोधोनवास्तवइतितद्भेदः एवमनालवित्संसारिणाकदाचित्सुजानामीतिज्ञानंनिषे
धस्यालयाथात्म्यज्ञानानवृत्तावेवभवतइतिविधिनिषेधताविधिनिषेधौस्वप्नदृष्टस्वापप्रबोधवत्तुल्यावित्यर्थः संसारिणामालज्ञानाभावात्सार्थविष
यज्ञानमप्यज्ञानतुल्यमित्युक्तंभवति यथातद्धानमज्ञानमेतान्यदुक्तमितिशास्त्रविरुद्धार्थविषयज्ञानंभ्रांतिरित्यपेक्षामिनानामसौसाह भावाद्वैतमिति य।
दामवेदेहावलक्षणालज्ञानिनामपियावत्स्थूलोहंब्राह्मणोहमितिदेहालभ्रमानुवृत्तिराप्रयाणं तावद्विधिनिषेधालशास्त्रवत्तपेत्याह जाग्रत्स्वप्नाविति यथाव
दामवेदेहावलक्षणालज्ञानिनामपि यावद्देहालभ्रमानुवृत्तिस्तावद्विधिनिषेधतास्येला
दुम जाग्रत्स्वप्नौस्वापनजाग्रत्स्वप्नावेस्यस्वप्नपर्यंते एवप्रबुद्धस्यतुतावुभौनिवर्तेतेतदुक्तमित्यर्थः ॥ एवंयावद्देहालभ्रमानुवृत्तिस्तावद्विधिनिषेधतास्येला

स्यासाक्षादुपलमस्तावद्विकल्पेसतिवस्तुनः जाग्रत्स्वप्नोपथास्वेप्नतथाविधिनिषेधता ॥ भावाद्वैतंक्रियाद्वैतंद्रव्याद्वैतंतथालनः वर्तयन्स्वानु
भूत्येहत्रीन्स्वप्नान्धुनुतेमुनिः ॥ कार्यकारणवस्त्वैक्यमर्शनंपटतंतुवत् अवस्तुत्वाद्विकल्पस्यभावाद्वैतंतदुच्यते ॥ ब्रह्मालणोहमितिप्रतीतिर्देहाल॥
स१८
भ्रमेकसमूलकत्वेनप्रतिबिंबैकिमेवमेवसर्वमिदंतमभ्रमविषयमुतकिंचित्प्रमितिविषयमस्तीत्याशंकायांयत्ज्ञात्वात्र मतमद्वैतंतत्प्रमाविषयंतन्मुमुक्षोरनु॥
न्याद नोपेदेश्भ्रमसमूलकत्वेनप्रतिबिंबैकिमेवमेवसर्वमिदंतमभ्रमविषयमुतकिंचित्प्रमितिविषयमस्तीत्याशंकायां भावाद्वैतमिति यथोक्तालनेनिदिध्यासनमतोनुसंधेयः तथाभावाद्वैतादि॥
संधेयंसेवतिवर्तंतरद्वमतंदर्शयन्तदनुसंधानस्यभ्रमसमूलकद्वैतत्रयनिरोधकत्वमाह भावाद्वैतमिति यथोक्तालनेनिदिध्यासनमतोनुसंधेयः तथाभावाद्वैतादि
रूपंत्रिविधमद्वैतमालमःस्वस्यवर्तयन् यद्वात्मालेनोमानेसावर्त्तयन्मनसिप्रतिष्ठितंकुर्वन्नप्रवस्पलितिपावत् इहमुनिः परमालोपासकःस्वानुभूत्यादेहक्लिष्टणत्रि
लकत्वात्स्यायाल्पान्मेवनत्रीन्स्वप्नावाद्वैतकमिद्वैत[redacted]दृश्यद्वैतज्ञानानिभ्रमालकानिधुनुतेनिरस्यति ॥ भावाद्वैतादिस्वरूपंविवृण्वन्त्रिविधमा
लकत्वात्स्यायाल्पान्मेवनत्रीन्स्वप्नावाद्वैतकार्यकारणयोर्वस्तुनोरैक्यदर्शनंतद्भावाद्वैतंकार्यकारण। राम ७८
तिनिरासंश्लोकत्रयेणविवृणोति कार्येति तत्रोपादानस्यच कार्यस्यचानन्यत्वपराभावाद्वैतविषयःश्लोकः यत्कार्यकारणयोर्वस्तुनोरैक्यदर्शनंतद्भावाद्वैतंकार्यकारणा
वैक्यपटतंतुवदितिदृष्टांतः यथातंतनांस्वव्यतिषंगविशेषभाजांनामरूपालकावस्थांतरापत्तिःपटावस्थत्वमितिपटस्यतंतोनन्यत्वंतद्वत्कृत्स्नंजगच्चिदचिदात्मकंस्व
कारणात्पृथक्
स्मविदविद्धिशेषाद्वलेणानन्यदितितद्भावाद्वैतंभावयोःकार्यकारणवस्तुनोरद्वैतं अवस्तुत्वाद्विकल्पस्येत्येननभावाद्वैतंनिरस्यतिविकल्पस्योपादानातिरिक्तद्व्यक
स्यनरूपाज्ञानस्यावस्तुत्वाद्वस्तुशून्यत्वात्भावयोर्द्वैतंकिंचिदद्वैतमेवत्यर्थः एवमसत्कार्यवादभ्रमोनिरस्तः ॥ श्रीरस्तुसतांविजयतेतराम् श्रीराम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मस्तत्वाभितिपः पुमान्मुमुक्षुर्वदन्नित्मिते वस्त्वेवाधिते धिष्ठे देवतानां यानेन वर्मनीदिवयानपितृयाने शौशालमकेन तत्त्वबुधावेत्सेपि पुमान्नमुसति जनस्यापीतिपाठे २॥
दृस्यापित्वात्त्वक्षितभयवक्तृत्वयोगेनेमाएं नक्त्रातीत्यर्थः ४६ अथशाप्यतयाप्रकृतस्यभगवतः सर्वात्मकत्वमाह आदीशेति सच्चद्रादौ अतिप्रलेपन्वमर्थं स्या२
नांजनानामंतर्विहिः ध्वसच्छमानः किंचयत्परावरं तत्त्वरूपसत्त्वं वा तदात्कृष्टमाह ज्ञानंज्ञानानामकं जीवस्वरूपं ज्ञेयमपि तत्त्वपरं वचोनामवाच्यं रूपंनामरूपात्
कं विदीर्णं पत्मकं सर्वंवस्त्वित्यर्थः तेमाम्लप्रकृतिर्ज्योतिः समष्टिजीवभ्रेसेन तत्सर्वं साक्षादपि मेव परमात्मात्मकमेवेत्यर्थः ५७ सर्वंसर्वात्मकत्वमभिधाय
तस्यैवप्राप्यस्वरूपत्वेनानिरतिशयपुरुषार्थत्वज्ञापनाय प्राकृतदेहस्यतच्छब्दभ्रभ्यपशब्दादिविषयाणां चापुरुषार्थत्वमाह अबाधितइति आभासोदृश्योदेहः
अबाधितोपिविनष्टोप्यनुवर्तमानोपि अवस्तुतया पुरुषार्थतया स्मृतः सर्वं शब्दार्थरूपेण विकल्पितमैंद्रियवस्तुजातमप्य वस्त्वपुरुषार्थं यद्यौकारेण ह
या चरं शरीरं यथा निर्मेहे पेतथा मम कात्मगोचरः शब्दादिर्न पुरुषार्थः न स्थिरः तस्य नित्यपुरुषार्थतया दुर्घटत्वादित्यर्थः यथाभ्रा भासः स्वप्नदेहः सततमीम
निद्रेसापि प्रबोधे वस्त्रापाम वस्तुतयानात्मतयाश्रुतः जात्यादिविकल्पितं जाग्रच्छरीरमपि तद्वदनात्माऽत्मधर्माणां नित्यत्वादीनां तद्दुर्घटत्वादित्यर्थः

यद्यपि तद्विज्ञानामयनेन वदनिमित्तं शास्त्रेण चक्षुषा वेदजनस्यापि न मुसति ४६ आदावंते जनानां सद्ब्रह्मरंतः परावरं ज्ञानंज्ञेयं वचोवाच्यं तमोज्योतिस्त्वयं स्वयं ४७ त्व१
अवाधितोपि ह्याभासो यथावस्तुतयास्मृतः दुर्घटत्वादैंद्रियकं तद्वदर्थविकल्पितं ४८ क्षित्यादीनामिहार्थानां छायानकतमापिहि नसंघातो विकारोवान पृथङ्नान्वितोमृषा ४९
धातवोवयवित्वाच्च तन्मात्रावयवैर्विना नस्युर्ह्यसत्यवयविन्यसन्नवयवोंऽततः ५०
५८ शरीरस्य सर्वेष्वस्तर्वकालेषु सर्वेषामन्यत्वात्मनः र्तात्मानं विनास्थितमभावाभावा शरी
रसंघातस्याक्षितिशंकानिरासार्थमाह क्षित्यादीनामिति पृथिव्यादि परिणामरूपाणां छायासंघातादिष्वेषु नकतरोपि संघातविकारपृथक्त्वं तयावा प२
वद्रूपभावित्वकाभ्वा द्येपीत्यर्थः तदेवविवृणोति तनसंघात इति वृक्षसंघातोनछायानापि वृक्षविकारः नापि वृक्षात्पृथक्वृक्षसंश्लिष्टत्वमस्यास्तु
तुयोग्यः नान्वितः नवि तावत्तः यावद्वृक्षसत्ताकेनान्वितोम्भयोभिप्रायः पुंल्लिंगनिर्देशः मृषाश्चनित्याः एवं शरीरमप्यात्मानं विना
स्थितमभावात तत्प्रतिछायासदृशं नचात्मसंघातः शरीरं नचात्मविकारः नचात्मानीहत्वात्तिष्ठति न यावदात्मभावीश्चनित्यत्वा
देतानात्मा शरीरमित्यर्थः ५९ शरीरस्यानित्यत्वादात्मप्रतिपत्त्यर्थं तत्तुल्यन्यायेषु पृथिव्यादिषु नित्यत्वमुपपादयति धातवइति पृथिव्याद्याधातवः अव
यवित्वात् संघातरूपत्वात्तन्मात्रावयवैर्विनानस्युरवयव विनाशे संघातोनश्यतीत्यर्थः संघातरूपत्वमेव प्रतिपादयति असतीति यतावयवसंघातरूपोवयवी अतस्तस्वावय
विन्यसति विनष्टे तेतावयवो सत्त्वे वावयवैरप्यनुपलभ्यमाने अवयवाश्च धातवोनानुपलभ्यं तस्वयमवयवित्वादनित्यः शरीरं नित्यात्मानं भवतीत्यर्थः ६० श्रीहनुमतेनमः॥

वि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ वी॰ ८० यस्य स्वं गृहस्थस्य तां पदवीं विधिना येन चाञ्जसा यायाद्व्रजन्नेव गृहीतितस्यात्तरमुत्तरं उपसंहरति एतैरिति एतैरन्यैश्च वेदोक्तैरितिव
दशाष्टत्तन्मूलकस्मृतिपुराणादीनामपि प्रदर्शनार्थः वेदादिभिरुक्तैः कर्तव्यत्वेनोक्तैरेतैर्भावांछितानुसंधानादिभिरन्यैश्च।
हात्मजीवेश्वरादिभेदानुसंधानैः स्वस्ववर्णाश्रमोचितकर्मभिश्च तस्य भगवतो भक्तिभाङ्नरस्तत्कुर्वन् गृहेपि जनः गृहस्थोपि
तस्य श्रीकृष्णस्य गतिं प्राप्नुयादित्यर्थः ६७ मा गृहे गृहमेधी स्थितेनाभिप्रेतां स्वस्य मुक्तिर्दौर्लभ्यशंकां किं पुनर्न्यायेन।
निराकरिष्यमाणस्तावद्वीकृष्णसेवयैवतरिष्यसीत्याह यूयमिति हे नृपदेव यथा प्रभोः सर्वशक्तेरात्मनोन्तरात्मनः श्री

एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः गृहेप्यस्य गतिं यायाद्राजंस्तद्भक्ति
भाङ्नरः ६७ यथा हि यूयं नृपदेव दुस्त्यजादापद्गणादुत्तरतात्मनः प्रभोः यत्पादपं
केरुहसेवया भवानहार्षीन्निर्जितदिग्गजः क्रतून् ६८ अहं पुराभवं क
श्चिद्गंधर्व उपबर्हणः नाम्नातीते महाकल्पे गंधर्वाणां सु
संमतः ६९ श्रीराम

कृष्णदेवहेतोर्यूयं दुस्त्यजादापद्गणादुत्तरत अउत्तीर्णाः यथा च भवान्यस्य श्रीकृष्णस्य पादपंकजयोः सेवया हेतु
भूतया निर्जितादिग्गजादिकचालोयेन ताहशः सन्महर्षिभिः सह क्रतून्कार्षीदिति शेषः तथा तस्यैव सेवया मोक्ष्यसि
इत्यध्याहारः ६८ लब्धतदीयसेवामात्रेण हेतुना मादृशानां मुक्तिसंभवे तत्किंपुनः साक्षाल्लब्धतत्सेवानां भवादृशाना राम ८०
मिति प्रतिपादनार्थं स्वपूर्वजन्मवृत्तांतमाह अहमिति अतीते ब्रह्मकल्पे पूर्वजन्मन्यहं नाम्नोपबर्हण इति प्रसिद्धः क
श्चिद्गंधर्व अभवं आसम् नं विशिनष्टि गंधर्वाणां सुसंमतः ६९ श्रीहनुमतो विजयतेतराम् श्रीरामानुजाय नमः॥

78

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

क्रियाइतिविवृणोति यदिति हेपार्थसाक्षात्परेब्रह्मणि यत्कारणत्रयेणसर्वकर्मणांसमर्पणंतत्क्रियामइतिभगवदारा
धनत्वेसर्वकर्मणांमिकफलावच्छेदः क्रियाइतमेनेनकर्मणामीश्वरप्रीतिमनपेक्ष्यस्वातंत्र्येणफलवत्त्वभ्रमोनिर
स्तः ६४ द्रव्याइतिविवृणोति आत्मेति अर्थशब्दोधनपरः कामशब्दः काम्यत्वकचंदनादिभोगवस्तुविषयः संभो
गोपकरणभोगस्थानादिप्रदर्शनार्थः यदर्थकामयोरात्मजायादिसर्वदेहिनामैक्यंतद्द्रव्याइतिविमृश्यतेत्रपात्रत्वक्चं
मा५ दनादीनामात्मजायाघतैर्माक्रूचर्गसाधारणत्वंद्रव्याइतमित्यर्थः एतेनगृहादीनांस्वाधारणत्वभ्रमोनिरस्तः यदा
इत्यादिष्वाविदविद्वयोरद्वैतंद्व्याइतं तत्रविदविदद्वैतंदर्शयति आत्मजायेति आत्मादीनांसर्वदेहिनांज्ञानेक
कारत्वेनैकरूपेणदर्शनंविदद्वैतं अर्थकामादीनांसर्वेषामचित्परिणामरूपत्वेनदर्शनमविद्वैतं एवंप्रतिशरीरंजीवा ८१
नामन्याकारभ्रमः अर्थकामादीनामचिदन्यपरिणामरूपत्वभ्रमश्चनिरस्तः ज्ञानाद्वैतमितिपाठेप्येवंविधदर्शनंज्ञानाद्वैतमित्य

यदुक्तमितिपरेसाक्षात्सर्वकर्मसमर्पणं मनोवाक्तनुभिःपार्थक्रियाद्वैतंतदुच्यते ६४ आत्मजायासुतादीनामन्येषांसर्वदे
हिनां यत्स्वार्थकामयोरैक्यंद्रव्याद्वैतंतदुच्यते ६५ यद्यस्यवानिषिद्धंस्यादेनयत्रयतोन्प सतेनेहतत्कार्योगितरेणान्पेरना।
यदि ६६ श्री

र्थः ६५ नकेवलंत्रिविधमेवाद्वैतंमनुसंधेयमपित्वन्यदपिशास्त्रानुमतंचेतदर्शयाह यदिति हेनृपयेनशास्त्रेणयस्यपुंसःयस्यवस्तुनः
यतोयस्माद्वस्तुनःसकाशाद्वैतस्य निषेधंकिंत्वनुमतंसपुमानेतेनानुसंधीयमानेनेतिशेषः तदनुसंधानपूर्वकंकार्याणिकर्तव्यानीतिकुर्या
दनेनात्मप्रतिषिद्धंवस्तुनकुर्यादित्यतोपमायादिनविषयतेत्रापसंसारोयतस्तस्यांज्ञाननिष्ठायांवर्तमानः यथाचाचारंभणंविकारोनामधेयं
तंच५ व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदनेत्यादिशास्त्रेणभावाद्वैतंप्रतिपाद्येतेनतत्त्वाप्रकाराद्वैतंप्रकार्याद्वैतंगुरुदेवताद्वैतादिकमपिशास्त्रेणप्रतिपाद्य
तदद्वैततदनुपारपेमेवसभिप्रायेणायंश्लोकःप्रवृत्तः तत्रप्रकार्याद्वैतं सर्वंखल्विदंब्रह्मेत्यादि ... ब्रह्मप्रकरणेषुसामानाधिकरण्येनब्रह्माद्वैत
प्रतिपादनात्सामानाधिकरण्यस्यप्रकारभेदविशिष्टप्रकार्यैक्यपरत्वाद्ब्रह्माद्वैतमेवप्रकार्याद्वैतंनित्योनित्यानांचेतनश्चेतनानांइत्यादिश्रुतिभिर्जीव।
स्वरूपभेदप्रतिपादनेनस्वरूपेणाभेदानुपपत्तेःबद्धमुक्तादिव्यवस्थानुपपत्तेःसुखादिव्यवस्थानुपपत्तेश्चब्रह्मविशेषैकत्वप्रतिपादनंप्रकारैक्याभिप्रायकमे
वेतितदद्वैतप्रकाराद्वैतं आचार्यंमांविजानीयादाचार्यदेवोभव आचार्यःसद्धिःसाक्षाच्चरणेनसंशयः इत्यादिभिर्गुरुदेवतादीनामद्वैतंप्रतिपाद्यतएव ६६ श्री

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ ८१

शापमेवाह याहीति कृतं हेलनं येन स त्वं नष्टश्रीर्गंधर्वशोभा यस्य स तथाहेराः आशु शूद्रत्वं याहि शूद्रयो
निं प्राप्नुहीति तदाहं दास्यां शूद्रायां जज्ञे जातः तत्रापि शूद्रजन्मन्यपि ब्रह्मवादिनां शुश्रूषया ऽनुषंगेण तत्संगे
न च हेतुना ऽस्मिन्कल्पे ब्रह्मणः पुत्रत्वं प्राप्तः ७३ अध्यायार्थमुपसंहरन् तच्छ्रवणतदनुष्ठा
न फलमाह धर्म इति तुभ्यं गृहमेधीयो धर्मो वर्णितः कथंभूतः पापनाशनः येन गृहमेधी येन धर्मेण श्रुतेनानु
ष्ठितेन च गृहस्थः संन्यासिनां भगवति संन्यस्तात्मनां पदवीं मुक्तिरूपामियात् आप्नुयादित्यर्थः ७४ तं तु कृतार्थ
एवेति हर्षेण पर्वश्लोकानेव पुनः पठति यूयमिति श्लोकाः पुरस्तादेव आख्याताः कैवल्यनिर्वाणसुखानुभू

याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः तावद्दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनां शुश्रूषया
नुषंगेण प्राप्तोहं ब्रह्मपुत्रतां ७३ धर्मस्ते गृहमेधीयो वर्णितः पापनाशनः गृहस्थो येन पदवीमंज
संन्यासिनामियात् ७४ यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोभियंति येषां गृहानावस
तीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिंगं ७५ स वा अयं ब्रह्म महद्विमृग्यकैवल्यनिर्वाणसुखानुभूतिः प्रियः
सुहृद्वः खलु मातुलेय आत्मार्हणीयो विधिकृद्गुरुश्च ७६ न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तु
तयोपलंभितं मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ७७ शुक उ॰ इति देवर्षि
णा प्रोक्तं निशम्य भरतर्षभः श्रुत्वा कृष्णं परं ब्रह्म पार्थः परमविस्मितः ७८

तिः निर्दोषनिर्दुःखसुखरूपा विना
न्मयः विधिकृ[illegible]न्नियोगकारी वस्तुतया इदं तया ७५ ७६ ७७ स्कंधादावुपक्रांतमैत्रेवादाहृतः सर्वमितिहासः सुरर्षिणेति। राम
नारदयुधिष्ठिरसंवादमुपसंहरति भगवान्शुकः इतीति इत्थं देवर्षिणा प्रोक्तं निशम्याकर्ण्य भरतर्षभो युधिष्ठिरः सुप्रीतः कृष्णं ८१
श्रवणवेलायामपार्थीस्थितं वशात् देवर्षिं च प्रेम्णा विह्वलः पूजयामास ततः पूजितो देवर्षिः कृष्णपार्थावुपामंत्र्यानुज्ञाप्य ताभ्या
मनुज्ञातः प्रययौ पार्थो युधिष्ठिरः कृष्णं परं ब्रह्म आत्मानं श्रुत्वा परमविस्मितः निरतिशयाश्चर्ययुक्तो बभूव ७८ श्रीराम श्रीः

79

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

माधुर्य

रूपादिभिः प्रियदर्शनः प्रियं यथा भवति तथा हस्य तद्इति तथा रूपसौंदर्यं परत्वं सौकुमार्यं दृष्टिविलापरा रित्वेन रसा वहत्वं सौगंध्यं कस्तूरी चंदनादिगंधवत्वं रूपादिभिः प्रियदर्शनं यस्येति वा स्त्रीणां नित्यं सदा प्रियतमः मतः एवंविधिकं संपदः ७० स्वयंभूतोहं स्थितः तत्रैकदा देवसौंदर्य पूतनालक त्रलसत्रैविभ्रमः

रूपेसत्वमाधुर्यसौगंध्यप्रियदर्शनः स्त्रीणां प्रीयनमोनित्यं मतस्तु
पुरुः संपदः ७० एकदा देवसत्रे तु हरिगाथोपगायने उपह
तावि भ्रस्तौ गंधर्वाप्सरसां गणाः ७१ अहं च गायं
स्तत्रिकान्स्त्रीभिः परिवृतो गतः ज्ञात्वा विश्वसृजस्तन्मे
हेलनं शेपुरोजसा ७२ श्रीमते रामानुजाय नमः

स्त्रिः अजायेतभिः हरिकथा गायनेतिमिलित तदर्थमप्सरसां गणाः उपहूताः ७१ तथाहमपि तत्र गंधर्वो हूत नां ज्ञानस्त्री भिः परिवृत्तः गायन्ह रीतरगायां गायन्तत्तत्रगतः अगायन्नित्तिपाठे गायन्ले व गलश्रत्यर्थः तन्मेममहेलनं मपराधं ज्ञात्वा विश्वसृजउँजसा तपोबलेन शेपुः ७२ श्रीगणेशाय नमः श्रीरामजी श्रीरामजी

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स॰ भा॰ टी॰ वी॰ ८२

षष्ठस्कंधस्य तृतीयाध्याये देवासुरनृणां सर्गो नागानां मृगपक्षिणामित्यादिना तस्योत्तरं ततः प्रसूयते तावत्स्वयं तेन कृतमुक्त
रत्नस्यांतरावसरप्रदानाय उपसंहरति इतीति इत्थं दाक्षायणीनां दित्यादीनां वंशाः पृथक् ततत्परंपरानुवर्त्याः प्रकीर्तिताः
कथंभूताः यत्र वंशेषु देवादयश्चराचरा लोका जाताः इति शेषः यद्यपि दाक्षायणी वंशवर्णनोपसंहारः षष्ठे तस्य कर्तव्यस्त
थैव समाप्तत्वात् पितृगोत्रभूतदितिजप्रसंगात् प्रसक्तशंका परिहार तदनु प्रसक्त वर्णनासकत्वादस्य स्कंधस्य तदंत एव ९४

एवं यामास सुप्रीतः कृष्णं च प्रेमविह्वलः कृष्णपार्श्वमुपागम्य प्रसन्नितः
प्रययौ मुनिः ७९ इति दाक्षायणीनां तेषां वंशाः प्रकीर्तिताः देवा
श्रे२ सुरमनुष्याद्या लोका यत्र चराचराः ८० इति श्रीमद्भागवते महापुराणे
सप्तमस्कंधे पंचदशोऽध्यायः १५ समाप्तिमगमत् श्रीरस्तु श्रीरामः।

दाक्षायणीवंशवर्णनमुपसंहृतमित्यवगंतव्यं ८० इति श्रीवत्सान्वयपयः पारावारराकासुधाकरस्य सर्वविद्यानिधेः।
श्रीशैलेशगुरोः सुतेन तच्चरणाब्जसेवाप्रसन्नतद्भक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवीरराघवविदुषालि
खितायां सप्तमे पंचदशोऽध्यायः १५ समाप्तिमगमत् ७ श्रीरस्तु कल्याणमस्तु शुभं भूयात् यादृशं पुस्तकं दृष्ट्वा ता राम ८२
दृशं लिखितं मया यदि शुद्धमशुद्धं वा मम दोषो न दीयते १ श्रीहनुमंताविजयतेतराम् लिखितं देवकीनंदन सं॰ १९८७।
ति॰ १

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham